
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

Acc. No. ~~5592~~ M-1602

Title - मदनपारिजात

Author - विश्वेश्वरभट्ट (ascribed to मदनपाल the author's royal patron)

Date - संवत् 1618 / शके 1483. (M.S. over 400 years old scribed in Vidarbha.)

Sub - धर्मशास्त्र.

folio - 97.

Xerox - 201

Scribe - नरहरि.

८२ मांसभक्षणे प्रा०

सूतकेन श्राद्धादि निषेधनिर्णयः ५५

८१ संन्यासिनो गार्हस्थ्यपरिग्रहनि०

५३ पर्वनिर्णयः।

…न … त्रे …था …वै …गे …तेः

नयं मदनरत्नकपारिजातनामांकितस्मृतिग्रंथानुगतनिबंधं वर्णाश्रमप्रमुखधर्मविवेचनार्थं विद्वन्मुखेन सुकृती मितमातनोति ॥१९॥ मतिर्यथा यांशा ख्याप्रशस्ति रमणीयाय्य वदति प्रशाशी
लंघ्राघ्रं जगति निजवस्तु कतिपयाः ॥ चिरं चिन्ततेषां मुकुरतलसूतस्थितिमियादियं ग्रंथसारस्य प्रसंवरमु निर्मिताल्पेऽसाणि ति ॥२०॥ मातापुत्रस्य चरित्रकीर्तिविनवायस्यां बिकानाम तः सांकल्प्य
पारमूर्तिरार्यचरितः श्रेयेदितद्वः पिता ॥ सोऽयं कोशिकवंशभूषणमणिः श्रीसद्विश्वेश्वरो वेदे स्मार्तमतेन नायय्यु सपदेवाकयन्ती वर्द्धताः ॥२१॥ हेमाद्रिकल्पद्रुमसापराकस्मृत्यर्थसाराः स्मृति
चंद्रिकांतः ॥ मिताक्षरादीन वलोकयत्नान्निबध्नुसंते ग्रहातानि बंधः ॥२२॥ स्तबकः प्रथमो ह्यत्र ब्रह्मचार्यात्तिथिः परः ॥ गृहस्थाश्रयस्तृतीयः स्याद्दाश्निकं तदनंतरं ॥ श्रमुख्यत्वषि नादिसंस्कारास्तुरीय
:स्तबको मतः ॥ आशौचस्तबकः पश्चाद्द्व्यशुद्धि क्रियो मतः ॥२४॥ सप्तमः श्राद्धसंज्ञात्ति विस्तागास्व्योष्टमस्ततः ॥ नवमस्तबकश्चात्र प्रायश्चित्तालिधोमतः ॥२५॥ स्तबका स्तेव निर्दिष्टा निबंधेस्मिन्नतुन
मातृ ॥ स्मर्त्तप्रदर्शनं कर्मप्रशंसा तदनंतरं ॥ धर्माः साधारणाः कालादयो मौंजीविवेचितिः ॥ नमस्कारस्य युवादिलक्षणानि ततः परं ॥ भिक्षाचर्याप्रकारादि नियमा ब्रह्मचारिणः ॥ उच्चारस्य विधिः ॥ शौचर
विधिस्त्वाचमनस्य च प्रातःस्नानस्य संध्यायाः प्राणायामस्य चैव हि ॥ मार्जनादिविधिः संध्यामध्याह्नस्य तथा पुरा ॥ जपेसंख्याविधानाध्यस्त्तपाकर्म ततः परं ॥ उत्सर्जनं तथा वेदव्रतान्यध्यायनवि
धिः ॥ ततः परमध्यायो गुरुकुलेवासो गुरोस्ततः ॥ नैष्ठिकस्य तथा धर्माः समावर्तनमेव वा ॥ स्नातकस्य व्रतादीनि चैवं प्रकरणानि तु ॥ स्तबके ब्रह्मचार्याख्ये प्रथमे सप्तविंशतिः ॥ ॥ सपिंडावर्णनं प्रथ
लक्षणानीतरस्य च ॥ दत्तानुकन्योद्वाहश्च निरूपणमतः परं ॥ विवाहे सदास्याधानमावसथ्यानलस्य च ॥ आवसथ्यस्य कालाद्या गौणकालनिरूपणं ॥ द्विरागमनकालश्च ततः स्यादधिवेदनं ॥
स्त्रीधर्मा द्वितीयेस्मिन् स्तबके गृहमेधिनः ॥ एवं प्रकरणान्येकादशाख्यानानि संग्रहात् ॥ ब्राह्मे मुहूर्ते कर्तव्यं ततः स्यादंतधावनं ॥ कच्छप्रसाधनाद्याश्च पोष्यवर्गस्य चिंतनं ॥ वृत्तिः तत्तस्य वैश्यमस्य
शूद्रवृत्तिरतः परं ॥ आपद्वृत्तिश्च मध्याह्नस्नानं नैमित्तिकं तथा ॥ काम्यस्नानं तथाशौचे माघस्नानविधिस्ततः ॥ मलापकर्षणं स्नानं क्रियास्नानं ततः परं ॥ परिणिस्नातवासांसि तिलकस्य विधिस्ततः ॥
ब्रह्मयज्ञविधानं च तर्पणाय मतर्पणं ॥ अर्चनं देवतानां च पंचाध्यायस्तथैव च ॥ नित्यश्राद्धे महायज्ञस्वरूपाणि ततः परं ॥ नित्यश्राद्धं ततो वैश्वदेवं तत्पाकनिर्णयः ॥ तत्कालनिर्णयः पूजा चातिथोत्त
जने विधिः ॥ ताज्यानान्यं तथा ताज्यान्नाशयने विधिः ॥ एवं प्रकरणान्यत्र त्रिंशच्चाद्यान्निकायके ॥ तृतीये स्तबके सम्यग्वर्णितानि यथाक्रमात् ॥ ऋतुकालस्तथा गर्भाधानं पुंसवनं ततः ॥ सीमंतोन्नयनं जात
कर्म तन्नामकर्म च ॥ ततानिष्क्रमणाख्यस्य संस्कारस्य विधिः स्मृतः ॥ कर्णवेधस्तथैवान्नप्राशनं चौलकर्म च ॥ स्त्रीसंस्कारास्ततो विद्यारंभो विरवान साश्रम ॥ त्वर्याश्रमस्तुरीयस्मिन्नेवं प्रकरणानि [illegible] ॥
गर्भाधानादिसंस्काराः स्तबके दशपंच च ॥ आशौचविषयो चं भूर्वस्याप्यसवाद्यशौचमेव च ॥ आशौचमनुपेतस्य दशाहप्रमुखास्ततः ॥ अनुलोमसपिंडस्य चाशौचं स्याद्ततः परं ॥ समानसलिलानां च प्रो
षितापरातो तथा ॥ मृतस्य प्रोषितस्यैव दायविधिरतः परं ॥ उपाध्यायाद्युपरमे पत्न्यजादिमृतौ तथा ॥ अनुगच्छच्छवाशौचमाशौचानां परस्परं ॥ संमानसलिलानां करे निर्णयो दाहकाले ---- वि
धिः ॥ दशाहमध्ये देशस्य संजातेस्तत्र निर्णयः ॥ देशांतरगते जीववार्तानां कर्मनिविधिः ॥ एवं प्रकरणान्यत्र स्तबके दशपंचवा पंचमे तु विनिर्दिष्टान्याशौचपदसंज्ञिते ॥ शुद्धिः सौवर्णपात्रादेर्वस्त्रादेस्तदन

श्रुत

तदंशस्नानादिश्राद्धिशुद्धिः स्यास्मिन्नानादस्ततःपरं। स्तस्याहत शुद्धिरपवादस्तथेति षट्। प्रबंधेस्मिंस्तबके द्रव्यशुद्धिप्रकरणानि ७॥ ॥आदौ श्राद्धस्य महिमा तत्स्वरूपं च तद्भिदा। तत्राधिकारिण
स्तद्दाम श्राद्धाधिकारिणः। श्राद्धदेशास्तथा काला अग्न्याधानस्य चैव हि। अग्न्याधानस्य पिंडादि पितृयज्ञस्य चाप्यथ। दर्शश्राद्धस्य चैवेष्टिसोमे कस्मिन्वासरे ऽपि। अपराह्णस्य समय अमावास्या विनिर्णयः।
मृताहकालस्तस्यैवाज्ञानकालविनिर्णयः। आमश्राद्धस्य कालश्च नित्यनैमित्तिकं तथा। प्रातःस्नानं श्राद्धयोश्च ततस्त्वापरपाक्षिकं। काम्यकाला अर्धसंक्रांति कालाराज्यहेतुस्तथा। कालायुगादिमन्वादा
श्राद्धे जीवति तु स्तथा। विहितानि निषिद्धानि मलमासे ततः पुनः। हविर्विशेषा वर्ज्यानि ब्राह्मणानां परीक्षणं। पंक्तयो ब्राह्मणास्तेषां अनुक्रमस्ततः परं। वर्ज्या विप्रा ब्राह्मणानामामंत्रणविधिस्त त
दिन श्राद्धस्य सर्वाङ्ग संचयं यज्ञस राक्षिकं। अग्नौ तस्याग्निमीमांसा तथाग्नौकरणे विधिः। परिवेषणकर्मादि श्राद्धपिंडकस्य च। संकल्पसंज्ञकं श्राद्धमेकोद्दिष्टमतः परं। नवश्राद्धानि तद्वत्स पिंडी
करणं ततः। वृद्धिश्राद्धविधानं च जीवच्छ्राद्धमतः परं। इत्थं प्रकरणान्येवं चत्वारिंशदनुक्रमात्। श्राद्धाकये सप्तमेस्मिंस्तबकेस्मिंस्तु समासतः॥ ॥आदौ विभागकालाः स्युर्मुख्यगौणसुतासुतः। विभ
तीयसुतानां च विभागस्तदनंतरं। पितामहधने पौत्रभागो मात्रंशसंमितिः। स्त्री तस्त्रीधनग्राहित्वधिकारिनिरूपणं। तथा पुत्रधनग्राहितागःसंबंधिनां ततः। अंशानर्हस्ततात्यद्यमविभाज्यमतः
परं। विभागः सविभागस्येत्येवं प्रकरणानि ७। एकादशास्मिंस्तबके दायभागप्रदेशमाः। सर्वपापफलोद्देशो नवकाल्लदनंतरं। विपाककर्मणां प्रायश्चित्तकर्तव्यनिर्णयः। कामाकाममहापापप्रायश्चि
त्तविकल्पानां तद्ध्यांप्रयमादीनां लक्षणानि पृथक् पृथक्। इति कर्तव्यता तेषां प्रत्याम्नायास्तथैव च। सामान्यतस्तथा सर्वपापनिष्कृतिहेतवः। पर्षत्पर्षदुपस्थानं प्रायश्चित्तविनिर्णयः। ब्रह्मघ्नस्य ग्रहणेका
ला विप्रस्तस्वग्राहस्तथा। महत्त्राः पातकानां च ब्रह्महत्यादिनिष्कृतिः। उपपातकलेदशास्तस्मिंन्निष्कृतिरतः परं। असत्प्रतिग्रहादीनां निष्कृतिस्तदनंतरं। जातिभ्रंशकरादीनां निष्कृतिश्च ततः परं।
प्रकीर्णकेषु पापेषु प्रायश्चित्तमिति क्रमात्। एवं प्रकरणान्येकविंशतिर्नवमेऽपुनः। प्रायश्चित्तानि धनेस्मिंस्तबकेस्मिंस्तु समासतः। धर्मशास्त्रप्रवृत्तानां तदधिगमोपाय तयानस्थास्त्वप्रणेतारः
प्रदर्शिताः। तत्र यद्वै किंचिन्मनुरवदत्तद्भेषजमिति मनोर्वृद्धात्तत्वेन तत्त्वमुख्यधर्मशास्त्रप्रणेतारः। अथ मंदर्यातत्र याज्ञवल्क्यः। मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः। यमापस्तंबसंव
र्ताः कात्यायनबृहस्पती। पराशरव्यासशंखलिखितादक्षगौतमौ। प्रजापवीतिना कार्याः सर्वकर्मप्रदक्षिणं। मनःप्रमोदाः संयोगात् तपेध्यानकर्मणि। आचांतः प्याचमेत्सुद्धिः स्त्वा कर्मसमारंभे
तु कर्माय्यथाद्यंतं शाचातावदेव पुनश्चरेत् तु प्रधानस्यांगि यायांगसांगं तत्क्रियात् पुनः। तदंगाकरणे कुर्यात्प्रायश्चित्तं न कर्म तत्। प्राचीं दिशामनुक्तौ स्यादुदीचीमानदिक्तथा। नित्यं च प्रक्रान्तत्क
वासीनस्वं च कर्मस्वकर्तुगानामनुक्तो दक्षिणां गतं वेन्तुथा। कुसितावामहस्तां स्याद्दक्षिणे स्याद्कुसितं। प्रभुःप्रथमकल्पस्य योनकल्पेनुवर्तते। न संप्राप्नोति फलं तस्य परत्रेति श्रुतिस्मृतिः। व
कल्पं वा स्वशाखोक्तं यस्य यत्कर्मचोदितं। तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्। श्रौतस्तु सर्वशास्त्रोक्तं सर्वस्यैव यथोचितं। स्मार्तं साधारणं तच्च ग्राह्यं श्रौतस्तु कर्मसु सामान्य चारिकाधर्मादिराजा
दिकुलोद्भवाः। आमाचाराः परिग्राह्यास्ये च विधाविरोधिनः। युगधर्माः परिग्राह्याः सर्वैरेव यथोचितं। देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः। दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च। दीर्घकालं ब्रह्मचर्यं समुद्रयात्रास्वीकारः

शातातपोवसिष्ठश्च धर्मशास्त्रप्रयोजका इति नियमपरिसंख्या।। किंतु प्रदर्शनार्थमेतत्।। बोधायनादयोपि धर्मशास्त्रप्रयोजकाः सर्वे ते। न चैतेषां मन्वादिधर्मशास्त्राणां वे
दमूलत्वेन परस्परमनपेक्षप्रमाणत्वात् नान्योन्यमाकांक्षा।। तत्र च कश्चिदधिकांतकर्मविधिः कश्चिन्न्यूनांतकर्मविधिरिति परस्परविरोधादप्रामाण्यप्रसंग इति चेत्।
मैवं। सर्वशाखाप्रत्ययमेककर्म्मेति न्यायेन सर्वत्र विधेयस्य कर्म्मण एकत्वेन प्रमाणविरोधाभावात्। अंग — स्यातीति कयः परस्परविरोधः। तत्परिहारान्।
स्या।। सत्वपरिहारा आकांक्षावशात्। आकांक्षा चेतिकर्तव्यतायां सा चेतिकर्तव्यता। यस्मिन् शास्त्रे न्नात तच्छास्त्रं स्वावगतार्थं अनापन्न प्रधानमपि अनवगतार्थं
य शास्त्रं तानमापद्यत इति नायं तमनपेक्ष्य। अतएव विरोधान्नाप्रामाण्यं। समग्रांगकर्मण्यनुष्ठितधर्म्मापि समग्रासवत्। धर्म्माद्दिष्टसिद्धिः। धर्मश्चा
चारश्चेतः।। तथा च मनुः।। आचारः परमो धर्म्मो विद्वद्भिः परिकीर्तित इति। तत्र कार्यकारणयोरात्सदोपचारः। धर्म्मस्तज्जन्यं सुकृतापूर्वं।। तथा श्रुतिस्मृत्यु
दितः सम्यक्। श्रुतिर्यश्चासेवितः।। तमाचारं निषेवेत धर्म्मकामो जितेंद्रिय इति। आचारश्च मध्यदेशादिप्रसूतेभ्यो विज्ञेयः।। यथाह मनुः।। सरस्वतीदृ
षद्वत्योर्देवनद्योर्यदंतरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते।। अस्मिन् देशे य आचारः पारंपर्यक्रमागतः। वर्णानां मानवानां च स सदाचार उच्य
ते।। हिमवद्विंध्ययोर्मध्ये यत्प्राग्विनशनादपि। विनशनं सरस्वत्या अंतर्धानदेशः।। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः।। आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चि
मात्। तयोरेवांतरं गिर्योरार्यावर्तं विदुर्बुधाः।। इति। शंखस्तु प्रकारांतरेणार्यावर्त्तमाह।। कृष्णमृगो यावद्विचरति तावदार्यः स्यादिति। यावद्विचरति स्वत इत्यर्थः।
आर्यावर्त्त इत्यनुवृत्तौ वशिष्ठोपि।। यावद्वा कृष्णमृगो विचरतीति। अन्यच्च मनुराह।। कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनजाः।। एष ब्रह्मर्षिदेशो वै ब्रह्मा
वर्त्तादनंतरं।। अतस्तरः ईषन्न्यून इत्यर्थः।। एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। आचारात्तु विच्यु
तो विप्रो न वेदफलमश्नुते। आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत्। तथा। एवमाचारतो दृष्ट्वा धर्म्मस्य मुनयो गतिं। सर्वस्य तपसो मूल

नपा०

मावार्रजगद्गुः परमिति॥ ॥ॐ॥ ॥अथ कर्म्मप्रशंसा॥ ॥तत्र मत्स्यपुराणे॥ ज्ञानायोगमहद्धु द्धिकर्म्मयोगः प्रशस्यते। कर्म्मयोगोद्भवं ज्ञानं तस्मात्त
त्परमं पदं। कर्म्मज्ञानोद्भवं कर्म्म ब्रह्म न च ज्ञानमकर्म्मणि॥ तस्मात्कर्मणि युक्तात्मा तत्त्वं प्राप्नोति शाश्वतं। वेदोऽखिलो धर्म्ममूलं आचारश्चैव तद्विदां। अ
ष्टावात्मगुणास्तस्मिन् प्रधानत्वेन संस्थिताः। दयासर्वेषु भूतेषु क्षांती रक्षातुरस्य च। अनसूया तथा लोके शौचमनद्धिद्विजाः। अनायासस्तु काय
षु मंगलाचारासवनं। न च द्रव्येषु कार्पण्यमार्त्तेषूपार्जितेषु च। तथा स्पृहा परस्त्रीषु परार्थेषु च सर्वदा। अष्टावात्मगुणाः प्रोक्ताः पुराणे विवाकाविदैः।
अयमेव क्रियायोगो ज्ञानयोगस्य साधकः। कर्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते। देवानां च मनुष्याणां पितॄणां चैव सर्वदा। तृप्तिं करोति विपुलां
कर्मकुर्वन्यथोदितं। अथ साधारणाधर्म्माः॥ ॥तत्र मनुः॥ यद्यत्परवशं कर्म्म तत्तद्यत्नेन वर्जयेत्। यद्यदात्मवशं कर्म तत्तत्सेवेत यत्नतः॥
सर्वं परवशं दुःखं सर्वमात्मवशं सुखं। यद्याद्विद्या मम सितलक्षणं सुखदुःखयोः॥ यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः। तत्प्रय
त्नेन कुर्वीत विपरीतं तु वर्जयेत्। यत्कर्म कुर्वत इति। शास्त्रविरुद्धमित्यर्थः॥ शास्त्रविरुद्धे पि कुसिदपवादादेरपातात्। यथाह याज्ञवल्क्यः॥ ॥
कर्म्मणा मनसा वाचा यत्नाद्धर्म्मं समाचरेत्। अस्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्न तु। तच्च कर्म कथं कार्यमित्याह छायां सारसंग्रहे॥ ॥यत्नोप
वीतिना कार्यं सर्वं कर्म प्रदक्षिणं। मनःप्रमोदः संयोगक्रमात्तापाज्ञान कर्मणि। आचांते पापमेव बुद्धिं च चाकर्म समाचरेत्। कर्मयथास्तं ज्ञात्वा तावदेव पुनश्चरेत्। प्रधानस्यात्रि
यायां तु सांगं तत्क्रियते पुनः। तदंगाकरणे कुर्यात्प्रायश्चित्तं न कर्म तत्तु। प्राचीं दिशामनुक्तौ स्यादुदीचीशानदिक् तथा। नियच प्रक्रमानुक्तावासीनं यच्च कर्मसु। कर्तृगानामनु
क्तो दक्षिणं सव्ये तथा। कुसितानामहस्तः स्यात् दक्षिणः स्याद कुसितः। प्रभुः प्रथमकल्पस्य योनकल्पेनुवर्त्तते। संप्राप्नोति फलं तस्य परत्रेति श्रुतिं स्मृतिं। ब्रह्मणे वा स्वगृह्योक्ते
यस्य यत्कर्म चोदितं। तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत्। श्रौतेषु सर्वशास्त्रोक्तं सर्वस्यैव यथोचितं। स्मार्त्ते साधारणं तेषु गार्ह्य श्रौतेषु कर्मसु। सामान्य चारिका धर्मा दिग्राजानि।
कलौ वर्ज्या ये च विद्याविरोधिनः। युगधर्माः परिग्राह्याः सर्वे त्रिवयथोचितं द्वेवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः। दत्तायाः कन्यायाः पुनर्दानं परस्य वै। समुद्रयातुः स्वीकारः। स्वीकारः

चार. परिग्राह्या १४

कमंडलुविधारणं॥ कमंडलुविधारणमिति॥ नैष्ठिकब्रह्मचारिणः स्यात्॥ महाप्रस्थानगमनं गोपशुश्च सुराग्रहः॥ सुराग्रह इति सौत्रामणी॥ अग्निहोत्रहवण्याः अलोह्यालीढपरिग्रहः॥ अग्निहोत्र
हवणी यज्ञपात्रविशेषः॥ तत्र स्थितस्य हविषो लेहः आस्वादनं॥ चमसे स्थितसोमवत्॥ लीढाया अग्निहोत्रहवण्याः परिग्रहः स्वीकारः॥ असवर्णासु कन्यासु विवाहः अद्विजातिषु …
ध्वस्य सापत्न्यम् … संकोचनं तथा॥ वर्णयायावरे … स्वाध्यायो वेदः॥ अधमाधौ प्रायश्चित्तविधानं च विप्राणां मरणांतिकं॥ संसर्गदोषः पापेषु मधुपर्के पशोर्वधः॥ दत्तौरसेत
रेषां तु पुत्रत्वेन परिग्रहः॥ शामित्रं चैव विप्राणां सोमविक्रयणं तथा॥ शमिता यज्ञपशुहिंसकः॥ तस्य कर्म शामित्रं॥ दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ॥ कलौ युगे विमान्धर्मान्विवर्ज्यानाहुर्म
नीषिणः॥ इज्याचारदयाहिंसादानस्वाध्यायकर्मणां॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनं॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः॥ दानं दमो दया क्षांतिः सार्वेषां धर्मसाधनं॥ ॥अथो
पनयनकालादयः॥ द्विजन्मनामनुपनीतानामेव श्रौतस्मार्तकर्माधिकाराज्ञाधारण … उपनयनकालो निरूप्यते॥ तत्र मनुः॥ गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनं॥ गर्भादेका
दशे राज्ञां गर्भात्तु द्वादशे विशां॥ अथ काम्यकालः॥ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे इति॥ तथा॥ सप्तमे ब्रह्मवर्चसकामम् अष्टमम् आयुःकामं नवमे तेजस्कामं दशमम् अन्नाद्यकामं एकाद
शे इंद्रियकामं द्वादशे पशुकाममुपनयेदिति॥ तथा वसंते ब्राह्मणमुपनयेत् ग्रीष्मे राजन्यं शरदि वैश्यमिति॥ पारस्करोऽपि ब्राह्मणस्याष्टवार्षिकस्य गर्भाष्टवर्षस्य वा क्षत्रियस्यैका
दशवार्षिकस्य वैश्यस्य द्वादशवार्षिकस्य उपनयनं कुर्यात्॥ यथामंगलं वा सर्वेषामुपनयनमिति॥ यथामंगलं पूर्वोक्तब्रह्मवर्चसादिकामानतिक्रमेण॥ तथा मासविशेषाद् … वि
शेषः॥ तत्र सुरेश्वरे॥ माघमासि महाधनो धनपतिः प्राज्ञो बली फाल्गुने मेधावी … व्रतोपनयने चैत्रे च वेदान्वितः॥ वैशाखे सुभगः सुखी पटुमतिर्ज्येष्ठे बलिष्ठो बुधे … आषाढे … महावि
द्विजयी ख्यातामहापंडितः॥ तथा नक्षत्रादिविशेषा अपि॥ हस्तत्रये … पुष्याश्विरेवतीषु वारे शुभे … बृहस्पतीनां हितानुबंधी द्विजमुंजबंधः॥ तृतीयैकादशी …
चमी दशमी तथा॥ द्वितीयायां च मेधावी स वेदार्थबलान्वितः॥ रिक्तायामथ हानिः स्यात्पौर्णमास्यां तथैव च॥ प्रतिपद्यपि चाष्टम्यां कुलबुद्धिविनाशकृत्॥ सप्तम्यामष्टम्यां प्रतिपदि रिक्ता चतुर्दश्यां॥ आय
विधाना … व्रतबंधः पंचदश्यां वा न षष्ठ्यामथाष्टम्यां पंचदश्यां न पर्वणि॥ इति पक्षे न कर्तव्यो नानाविधकारणं तथा॥ रिक्तासु च न कर्तव्यं … दिवसे तथा॥ न विप्रजन्मतारासु … धन प्रत्यरासु
च॥ संप्रकरेत … सार्धके … संज्ञिक॥ परामप्यथ … ताराः सर्वत्र शोभनाः॥ … सुरापाधर्मिमानाधिरोगा … कपरिहीनः॥ गदवान्मन्मथलग्ने … कलिक
विरिणि बलवान्विद्यावान् … विनिक्रूरः॥ सुभगः सुखपालः … विनाशमुपयाति धनुषि धनाढ्यः … परित्यक्तः॥ वृद्धमतिरतः स्यात् मीने धनवान्सुवक्ता
चा वृषस्तथा तुला कन्या ब्राह्मणानामुदाहृता॥ सिंहो धन्वी तथा मीनः क्षत्रियाणां प्रकीर्तिताः॥ मेषश्च युग्मस्तथा कर्की विप्राणां परिकीर्तिताः॥ उपयन्निकालवर्ष्य … व्रतोपनयनं द्विज॥ नामधारोप
… आचार्यो मासि … पूर्वं … तथा … प्रगणे … जयतीति॥ प्राग्यातः पूर्वमित्यर्थः॥ पूर्वतां …
भूकंपे निर्घातन ग्रहे … एवं विधप्रावृत्ति के विशिष्ट काले आचार्यो …

ह्योक्तो विज्ञेयः। अपरो विशेषः। शौनकोक्तः। अलंकृतं कुमारं कुशलीकृतशिरसमहतेन वाससा संवीतमिति। कुशलीकृतशिरसं कृतशिरोवपनं वस्त्रधारणादिकर्मक्रमस्तु गृह्योक्तो विज्ञे-
यः। वासांसि च मनुनोक्तानि। तसीसंख्या चतुःपूर्वेणाशानक्षौमाविकानि चेति। आनुपूर्व्येण वर्णानुपूर्व्येण। गौतमः। वासांसि शाणक्षौमचीरकुतपाः सर्वेषां कार्पासं वाविकृतमिति। चीरं वस्त्रखंडं।।
वसिष्ठः। शुक्लमहतं वासो ब्राह्मणस्य मांजिष्ठं क्षत्रियस्य हारिद्रं कौशेयं वैश्यस्येति। कौशेयं पट्टविशेषः। मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रि-
यस्य तु मौर्वी ज्या वैश्यस्य शणतांतवी। मुंजालाभे तु कर्तव्याः कुशाश्मंतकबल्वजैः। त्रिवृता ग्रंथिनैकेन त्रिभिः पंचभिरेव वा। मौर्वी मूर्वातृणनिर्मिता ज्या धनुर्गुणः। अत्र च विशिष्टवचनाल्लिंगाद्वा वि-
नाशप्रसंगात् मुंजाद्यभावे वृषक्रमेण कुशाद्या ग्राह्याः। अश्मंतकः स्वनामप्रसिद्धं तृणं तथा बल्वजमपि। ग्रंथिस्तु सुखावसुमौंजीषु चायं यज्ञोपवीतलक्षणं छंदोगपरिशिष्टे। त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधो-
वृतं। त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। तथा पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिं। तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं। महाकार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्। शणसूत्रमयं
राज्ञो वैश्यस्याविकसूत्रजं। ऊर्ध्ववृतलक्षणमाह संग्रहकारः। करेण दक्षिणेनोर्ध्वगतेन त्रिगुणीकृतं। वलितं मानवे सूत्रे शास्त्रमूर्ध्ववृतं स्मृतं। ऊर्ध्वगतेनोर्ध्वस्थितेन दक्षिणकरेणायवलितं तदूर्ध्ववृतं
मित्यर्थः। उपवीतास्तो वदेवलः। कार्पासक्षौमगोवालशणवल्कतृणोद्भवं। तदासंभवतो धार्यमुपवीतं द्विजातिभिः। कुमारस्तस्यावलंबं तदभावे। असंभवतः। सार्वविवक्षिकस्य सिलसुखात्स-
वर्णार्थः। तथा आश्वलायनपरिशिष्टे। सूत्रं संहतांगुलिमूलके आवर्त्य मन्त्रवद्यावत्त्रिगुणीकृत्य यत्नतः। अब्लिंगकैस्त्रिभिः सम्यक्प्रक्षाल्योर्ध्ववृतं त्रिवृत्। सप्रदक्षिणमावृत्य सावित्र्या त्रिगु-
णीकृतं। ततः प्रदक्षिणावर्तं सममस्यान्नवसूत्रकं। त्रिरावेष्ट्य दृढं बध्वा ब्रह्मविष्णुमहेश्वरान्नमस्येत्। अजिनान्याह मनुः। कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः। तथा दंडानपि। ब्राह्मणो बैल्व-
पालाशौ क्षत्रियो वाटखादिरौ। पैलवौदुंबरौ वैश्यो दंडानर्हंति धर्मतः। तथा केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः। ललाटसंमितो राज्ञः स्यात्तु नासांतिको विशः। ऋजवस्ते तु सर्वे स्यु-
र[-]णाः सौम्यदर्शनाः। अनुद्वेगकरा नृणां सत्वचोनग्निदूषिताः इति। यथासमयं च गायत्र्यनुपदिशेत्। सा च प्रणवव्याहृतिपूर्विका पच्छोऽर्धर्चशस्ततः। सर्वामिति गायत्रीछंदस्कां वेदमातरं सूर्य-
देवतां महाव्याहृतिपूर्विकां ब्राह्मणाय ब्रह्मचारिणे। क्षत्रियाय त्रिष्टुप्छंदस्कां बृहती दृष्टां सावित्रीं देवतां देवसवितरित्यादिकां वाजपेये विनियुक्तां। वैश्याय प्रजापतिदृष्टां जगतीछंदस्कां
सवितृदेवतां उखापाशसमोचने उखासंभरणे विनियुक्तां विश्वारूपाणि प्रतिमुंचते कविरिति तामृचं ब्रूयात्। सर्वेषां वा ब्रह्मक्षत्रविशां गायत्रीमेव ब्रूयात्। गायत्रीछंदस्कां सावित्रीमिति कल्पतरौ।।
आह शातातपः। तत्सवितुर्वरेण्यमिति सावित्री ब्राह्मणस्य। देवसवितुरिति राजन्यस्य। विश्वारूपाणीति वैश्यस्येति। कात्यायनोऽपि। सावित्र्या ब्राह्मणमुपनयेत् त्रिष्टुभा राजन्यं जगत्या वै-
श्यं सर्वेषां वा सावित्रीति। आह लौगाक्षिः। ऋग्यजुः सर्वत्र स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्धर्चशः सर्वामंततः इति। अथ समिदाधानमुपनयनांगभूतं स्वस्वशाखोक्तविधिना ।।४
एवं प्रतिदिनमपि अग्निकार्यं च कुर्वीत तदनंतरमिसंवर्त्मभरणात् तदनंतरं संध्योपासनानंतरं। तच्च कालद्वयेपि कार्यं आह याज्ञवल्क्यः। अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपीति। क-

ति॰

सिन्नायामवछंति। तथाच लौगाक्षिः। सायमवाग्निमिंधतां इध्मैकमिति। मरु -- दूरादाहृत्य समिधः संनिदध्यात् विहायसि। सायंप्रातस्तज्जुयात्तानिरग्निरनं डिता॥ दू
रान् अन्यापरिगृहीतदत्तादिग्यर्थः। विहायसि -- पादो अन्यपरिगृहीतनिषेधमाहर्त्तं ब्र॥ यथा कथंचित्परिग्रहमसिमन्यात्स्तेनो हि सवतीति। अनविज्ञाप्य स्मृत्यंतरा। पुरास्तम
मयात्प्रागुदीचीं दिशं गत्वा समिध आहरेदिति। पुरास्तमयादिग्यस्तधनादसमितां निषेधे॥ अतएवापस्तंबः। नास्तमिते समिधगाच्छेदिति। समिन्नियमो वायुपुराणे॥ पा
लाश्याः समिधः कार्याः खादिर्यस्तदलाभतः। शमीरोहितकाश्वत्थास्तदभावेर्कवेतसाविति॥ समिद्धरणं काश्यायन आह। नांगुष्ठादधिका कार्या समित्स्थूलतया क्वचित्। नवियु
क्ता त्वचा चैव न सकीटा न पाटिता। प्रादेशान्नाधिका नोना तथा नैव द्विशाखिका॥ अथाभिवादनं॥ तत्र याज्ञवल्क्यः। ततोभिवादयेद्वृद्धानसावहमिति ब्रुवन्। ततः अग्निका
र्यादनंतरमित्यर्थः। ब्रह्मपुराणे। उपाध्यायमातापितरौ पूर्वमेवाभिवादयेत्। आचार्यश्च ततो नित्यमभिवाद्यो विजानता। मनुः। वैदिकं लौकिकं वापि तथाध्यात्मिकमेव वा। आददी
त यतो ज्ञानं तं पूर्वमभिवादयेत्। अभिवादात्परो विप्रो ज्यायांसमभिवादयेत्। असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्। अभिवादये इत्येतस्माच्छब्दात्परममुकनामाहम
स्मीति स्वं नाम परिकीर्तयेत्। विप्रग्रहणं द्विजात्युपलक्षणार्थं। आपस्तंबः। स्वदक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोभिवादयेत्। उरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शू
द्रः प्रांजलिः। सर्वत्र मनुः। भोशब्दं कीर्तयेदंते स्वस्य नाम्नोभिवादने। नाम्नां स्वरूपभा -- हिताः। भोभाव ऋषिभिः स्मृतः। आयुष्मान्भव सौम्येति वाच्यः स्यात्। अभिवादकस्य नाम
वाच्यं विष्णुशर्मन्निति तस्य चांते अकारो वाच्यः। पूर्वाक्षरः प्लुतः। भोः शब्दो नाम्नां स्वकीयानां स्वरूपभावः। स्वरूपस्य संबोधनं प्रतिपादितं। अयमर्थः। भोः शब्देन हि बोधितोसाव
स्य नाम बुध्यते। अत्र भावः प्राप्तार्थो भो इति पाठे। भोः शब्दस्य भावः सत्ता। आयुष्मान्भव पूर्ववत्। पूर्वाक्षरं प्लुतं छांदसो लिंगव्य -- यः। यद्यपि पूर्वाक्षरं नकारस्तथापि तस्य व्यंजन
त्वेन प्लुतत्वायोगात्। शर्मन्नित्यत्र योयमकारः स एव पूर्वपदाभिधेय इति तस्यैव प्लुतता। पूर्वाक्षरः प्लुत इत्यपि पाठः। तत्र पूर्वमक्षरं प्लुतमस्येति चतुरश्रः। अथवा अकारस्था
स्य नाम्नोंत इत्यस्यायमर्थः। अस्याभिवादकस्य नाम्नोंते योयमकारः। अकार इति स्वरमात्रोपलक्षणं। सार्वेषां नाम्नामकारान्तत्वनियमाभावात्। नासएवं वाच्यः स्वरः पूर्वाक्षरः। पूर्वाणि
मगवीताच्च राणि यस्य स तथोक्तः। एवंविधः प्लुतो वाच्यो न त्वन्य एवाकारो वाच्य इति। तथाच वसिष्ठः। आमंत्रिते स्वरोस्य प्लवत इति। आमंत्रितेन कर्तव्ये अभिवादकनाम्नेत्य
र्थः। स्वरः सप्लवते त्रिमात्रो भवतीत्यर्थः। मनश्चाभिवादयोरेवं प्रयोगो भवति। अभिवादनाय विवे नामाहमस्मि भो इति। आयुष्मान्भव सौम्य विष्णुशर्म३न् इति। अथवा आयुष्मा

सै २

५॥

न्तस्व सोम्य विष्णुशर्मन् इति। एतन्नियमविरुद्धत्वात्तु धर्मगुप्तशब्दप्रयोगः॥ योऽस्य नाम गृह्णाति सवति॥ आत्मनाम गुरोर्नाम नामयन्नाम संपाणस्य च। आयुष्कामो न गृह्णीयाज्ज्येष्ठपुत्र
कलत्रयोरिति विधिनिषेधेनतयोरभिवादनप्रसक्तिरिक्तस्थलं विषय इति विज्ञेयं। एतच्चाभिवादनं हस्तद्वयेन कार्यं। अन्यथाकरणे विष्णुना दोषस्य संकीर्त्तनात्। अद्य प्रवृत्ति यावत्किं
चिदेतसाधर्ममाचरेत्। सर्वं तन्निष्फलं याति एकहस्ताभिवादनात् इति। एतदपि विहितविषयं। यतः स्मृत्यन्तरे। अजाकर्णेन विदुषो मूर्ध्नि नामैकपाणिना। अजाकर्णेनोञ्चसामेकरो
द्धस्याप्रुनः संपुटितेन करद्वयेनेत्यर्थः। अपि वा जाकर्णोसंपुटितो यथा तथैव संपुटितं करद्वयमपीत्यजाकर्णो क्षिप्रत्यभिवादने पिदीक्षितस्य नामग्राह्यं। तथा च मनुः। अवाच्यो
दीक्षितो नाम्ना यवीयानपि यो भवेत्। भो भवत्पूर्वकं त्वेनमभिभाषेत धर्मवित्। भो आदी चितस्य दीक्षितस्येति। भो भवत्पूर्वकं योगिकैः शब्दैरेणां प्रत्यभिवादनादि घ्नतिसा
षेते इत्यर्थः। यानात्यत्यभिवादस्य विप्रः प्रत्यभिवादने नाभिवाद्य स विदुषा यथा शूद्रस्तथैव सः। यमः। अभिवादे तु यो विप्र आशिषं न प्रयच्छति। श्मशाने जायते वृक्षः काक
गृध्रादिसेवितः॥ शातातपः। पाखंडं पतितं व्रात्यं महापातकिनं शठं। सोपानत्कं कृतघ्नं च नाभिवादयेत्। धावंतं च प्रमत्तं च मूत्रोच्चारकृतं तथा। भुंजानमाचमानं च ना
स्तिकं नाभिवादयेत्। वमंतं जृंभमाणं च ऊर्ध्वं दंतधावनं। अभ्यक्ताशिरसं चैव स्नातं नैवाभिवादयेत्। बृहस्पतिः। जपयज्ञगणा ... समित्पुष्पकुशानलान्। उदपात्रं च
भिक्षान्नं वहंतं नाभिवादयेत्। उदक्यां सूतिकां नारीं भर्तृघ्नीं ब्रह्मघातिनीं। अभिवाद्य द्विजो मोहाद्दिनाशं... जमदग्निः। देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदंडिनं
नमस्कारं न कुर्याच्चेत् प्रायश्चित्ती भवेन्नरः। मनुः। अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्धंते आयुः प्रज्ञा यशो बलं। एतच्चाभिवादनमधिकवयसामे
व कार्यं। तथा च मनुः। ज्यायांसमभिवादयेदिति। अनयेव गोतमः। ऋत्विक्श्वशुरपितृव्यमातुलानां यवीयसां प्रत्युत्थानमभिवाद्या इति। ज्यायस्त्वं च कियता कालेनेत्याकांक्षा
यां मनुः। दशाब्दाख्यं पौरसख्यं पंचाब्दाख्यं कलाभृतां। त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि स्वयोनिषु। दशाब्दपर्यंतमाख्यायत इति दशाब्दाख्यं एवं पंचाब्दाख्यं इति घञर्थे कवि
मानमिति कप्रत्ययः। पुरे सवाः पौराः। एकपुरनिवासिनां विद्यादीनां दशाब्दैः पूर्वः सखा भवति। न तोधिको न्याय्यात्। कलाभृतां गीतादिविद्यावतां पंचाब्दपूर्व। यथा श्रो
त्रियाणां वेदाध्यायिनां त्र्यब्दपूर्वः। तताधिको ज्यायान्। स्वयोनिषु तु ज्ञातिषु स्वल्पेनापि कालेन एकदिनपूर्वकत्वेनापि ज्येष्ठता। एकदिनजातं चेत् सखा। तत्क्रमात् पूर्वत्वेन व ॥५॥
यस्यः समाने हि निजा त इति। अथ प्रसंगात्कुर्वादिलक्षणं॥ तत्र याज्ञवल्क्यः। स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति। उपनीय ददद्वेदमाचार्यः स उदाहृतः। एकदेशमुपा

सं

मिस्योमानागरीयसीति। मनुः। उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते। एकदेशं तु वेदस्य
ध्यस्यत्नि विग्यज्ञ स उच्यते। एतमाचार्यया पूर्व वेदस्येकादशीं हि तां ब्राह्मणं चा वेदांगमात्रं वाध मर्थिमध्यापयति अपरि ना बिनत्वलिसंधा नू न वा पूर्वक्लिमध्य
वेदांगान्यथवा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते। निषेकादीनि कर्माणि यः करोति यथाविधि। संभावयति चान्नेन स विप्रो गुरुरुच्यते। विप्रपदं पि तु पलक्षणं॥ अतश्च नेवं विधः पितव
पयति। एतत्रयोप्युपाध्यायादयर्थः। निषेकादीनि कर्माणिय करोतिय यथाविधि। संभावयति चान्नेन स विप्रो गुरुरुच्यते। तथा। उपाध्यायान्दशाचार्य आचार्याणां शतं पिता। सहस्रं तु पि
स गुरुरितिगम्यते। अग्न्याधेयं पाकयज्ञं अग्निष्टोमादिकान्मखान्। यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते। तथा। उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता। सहस्रं तु पि
तॄन्माता गौरवेणातिरिच्यते। उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता। ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतं। ब्रह्मजन्मनि ब्राह्मणो वेदाजन्म उपनयनं। प्रथमोद्दे
तु मातापितृभ्यां गौरवेणातिरिच्यते। उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता। तमपीह गुरुं विद्यात्सुलाप
साधनपर्यंतस्याग्नि तापादकत्वात् इह च सर्वकर्माधिकारापादकत्वात्तु शास्त्रं तस्थायि फलं भवति। अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तथा। ब्राह्मणो जन्मनः कर्ता स्वधर्मस्य च शासिता। बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः। विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः। वैश्यानां धान्यधनतः शूद्राणा
मेव जन्मतः॥ ॥ अथ वैश्यलिंगाचरणं॥ ॥ तत्र याज्ञवल्क्यः। आदिमध्यावसानेषु वच्छ्रुतपलक्षितौ। ब्राह्मणक्षत्रियविशां भिक्षाचर्यं यथाक्रमं। भिक्षेति काकदं बकां भिक्षादिय्या
णु। मनुः। प्रतिगृह्येप्सितं दंडमुपस्थाय च भास्करं। प्रदक्षिणं परीत्याग्निं चरेद्भैक्ष्यं यथाविधि। इप्सितं यद्यस्य विहितं वचनांतरप्रतिनियतदंडविधानादनेन विजातीयस्य ह
णानिषेधः। भास्करं सारमेव रूपस्थाय। अग्निं प्रदक्षिणीकृत्य एतत्रितयं तिक्षां गं विक्षयय यथाविधिव क्षमाणविधिना भैक्षं चरेत्तु। भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः। भव
मध्ये तु राजन्यो वैश्यस्तु भवदुत्तरं। भवदित्यनेन यालक्षते। अस्तुनेत्यर्थ इत्येत यति सच्छयति कर्मविस क्रियाते न स्वार्थसिद्धाति भिक्षां देहीति वाक्यरचना। तत्र याज्ञवल्क्य
भवत्पदमादिमध्यावसानेषु ब्राह्मणादिभिः। क्रमेण कार्यं तच्च संबध्यते। आयावाद्द मिथिलां देहि भिक्षायै एव भिक्षां ददतीति सामर्थ्यात् स्त्री प्रत्ययवद्यत्तत्पदं भवति। तत्र याज्ञवल्क्यो
गः भवति भिक्षां देहीति विप्रः। भिक्षां भवति देहीति क्षत्रियः। भिक्षां देहि भवती ति विरूपा नाम नियमः। स्त्रिय एव भैक्षणीया इति। अत एवाह शौनकः। अप्रत्याख्यायिनमग्रे भिक्षेत नाम
प्रत्याख्यायिनी वति। भिक्षाचरणे विशेषमाह याज्ञवल्क्यः। ब्राह्मणेष्वचरेद्भैक्षमनिंद्येष्वात्मवृत्तये इति। भिक्षां चरेत्तु। भिक्षां प्राप्नुं चरेदित्यर्थः। आत्मवृत्तये स्वशरीरयात्रार्थमभवनाधि
यदाचार्याः सीदन्तु इत्निर्नित्र्यादिविकल्पस्तदा। तत्परायणैर्भैक्षं चरेत्तु। अन्यथा प्रधानभूताध्ययनविरोधः स्यात्। ब्राह्मणेषु चरेदिति ब्राह्मणविषयं। अत एव व्यासः। ब्राह्मणक्षत्रि

यविद्यां श्रातस्मृत्युक्तिमनुवदं । स्वजातीयगृहेष्वेव सार्ववर्णिकमेव वा वृत्तिः सर्वशाखः प्रकृतं वर्षत्रयपराः ॥ नायमेव भिक्षाविकल्पः ॥ अपि तु व्यवस्थितविकल्पः ॥ तथा च सविष्णुपुराणे ॥
सार्ववर्णिकविवरेखा भैक्षवर्णिकानामसंभवे । अश्यूवर्णं महापातकइति ॥ अत्र शूद्राः ॥ त्रैवर्णिकेष्वपि विकल्पवादमाह मनुः ॥ गुरोः कुले न भिक्षेत न ज्ञातिकुलबंधुषु ॥ मातरं वा स्वसारं वा मा
तुर्वा भगिनीं निजां ॥ भिक्षेतेति ॥ इदं प्रथम भिक्षायने न विरोधः स्यादिति चेत् । मैवं । एतदुपनयनांगभिक्षाविषयकं । इदं वेदिकं तु नित्यभिक्षाविषयं । एवं भिक्षां भिक्षित्वा ब्रह्मचारी गुरवे
निवेद्य अदः शेषं अवाप्य तन्निर्दिष्टदासीनः स्नायानो वा सावतु तू । ततः सायं संध्यां विधाय यस्मिन्नुपनयनहोमो विहितस्तस्मिन्नेवाग्नौ समिधो हुत्वा स्वगृह्योक्तप्रकारेण ।
भाययवान्न विसर्जत् ॥ ॥ ततश्च तदैवं भुंजीत । तत्र याज्ञवल्क्यः ॥ सताग्निकार्यं भुंजीत वाग्यतः पूर्वमनुज्ञया । आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ॥ अमृतोपस्तरण
मसीत्यादिका अपोशानं पूर्वं ह्यया भुंजीतेत्यर्थः ॥ गौतमः ॥ सायंप्रातस्त्वन्नमभिपूजितमनिंदन् भुंजीतेति ॥ सायंप्रातरित्यनेन मध्ये भोजननिषेधः ॥ तथा च श्रुतिः ॥ सायंप्रातरा
शपवस्यादिति ॥ अत्रैव वसिष्ठः ॥ अष्टौ ग्रासा मुनेर्भक्ष्यं वानप्रस्थस्य षोडश ॥ द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ॥ नोक्तनियममाह मनुः ॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिण
मुखः ॥ श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते ह्युदङ्मुखः ॥ आयुषे हितमायुष्यं यशसे हितं यशस्यं ॥ श्रियमिच्छन् ऋतमिच्छन्नित्यर्थः ॥ पात्रनियमो हारीतेनोक्तः ॥ लोहे मृन्मय एव पा
त्रे भुंजीतेति ॥ तच्च स्वयमेव प्रक्षालयेत् ॥ भुक्त्वा स्वयममत्रं प्रक्षालयेदित्यापस्तंबस्मरणात् ॥ एवं भैक्षेण वर्तयेन्नित्यमिति यदुक्तं तत्रापवादमाह वसिष्ठः ॥ याज्ञवल्क्यः ॥ ब्राह्मण
काममश्नीयाच्छ्राद्धे व्रतमपीडयन्निति ॥ व्रतमपीडयन् मधुमांसादि वर्जयन्नित्यर्थः ॥ अकामोपपन्ने मधुमिश्रे दोषमाह वसिष्ठः ॥ अकामतो मधु वाजसनेयके न दुष्यतीति ॥ ॥
उपनयनकालस्य परमावधिमाह मनुः ॥ आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते ॥ आद्वाविंशात्क्षत्रियस्य आचतुर्विंशतेर्विशः ॥ अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृ
ताः ॥ सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः ॥ उक्तपरमावधेरूर्ध्वमपि व्रात्यस्तोमरूपप्रायश्चित्तानंतरं संस्कार्या एव ॥ तथा च याज्ञवल्क्यः ॥ सावित्रीपतिता व्रात्या व्रात्यस्तोमादृ
तेक्रतोरिति ॥ ॥ तथान्योऽपि विशेषः स्मृत्यंतरे ॥ षंढांधबधिरस्तब्धगद्गदपंगुषु ॥ कुब्जवामनरोगार्तशुष्कांगविकलांगिषु ॥ मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये ॥ स्तब्धपुंस्त्वे
पि चैतेषु संस्काराः स्युर्यथोदिताः ॥ यस्मिन् संस्कारे क्रियमाणे तद्विहितकर्मसु समर्थो न भवति तेन संस्कारेण संस्कार्य इत्यर्थः ॥ मूकोन्मत्तौ न संस्कार्याविति केचित् ॥ एतेषामसंस्कृतत्वेऽपि पातित्यं ना
स्ति कर्मस्वनधिकारात् ॥ तदपत्यं तु संस्कार्यमेव ॥ ब्राह्मण्यां ब्राह्मणेनोत्पन्नो ब्राह्मण एवेति श्रुतेः ॥ अत्र ब्राह्मणग्रहणाज्जात्यादि क्षत्रियादीनप्युपलक्षयति ॥ असंस्कृतेऽपि जातिमात्रस्यानपायात् ॥

ती

ब्राह्मण एव भवति द्विजातिरेव सव यर्थः॥ ॥स्त्रीणां तु विवाह एवोपनयनं तथा च मनुः। वैवाहिको विधिः स्त्रीणामौपनयनिकः स्मृतः। इति। यत्तु हारीतेनोक्तं। द्विविधाः स्त्रियो ब्र
ह्मवादिन्यः सद्योवध्वश्च। तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे भिक्षाचर्येति। सद्योवधूनां तूपस्थिते विवाहे कथंचिदुपनयनमात्रं कृत्वा विवाहः कार्य इति
तत्कल्पान्तरविषयं। पुराकल्पे कुमारीणां मौञ्जीबंधनमुच्यते। अध्यापनं च वेदानां सावित्रीवचनं तथेति स्मरणात्। यदा तु मेखलादीनि त्रुटितानि तदा। तेषां प्रतिपत्तिकर्म
मनुना विहितं। मेखलामजिनं दंडमुपवीतं कमंडलुं। अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रवित्। यस्य गृह्ये यो मंत्र उदितस्तेन मंत्रेण ग्राह्याः॥ ॥इत्युपनयनं॥ ॥अथ ब्र
ह्मचारिनियमाः। तत्र याज्ञवल्क्यः। मधुमांसांजनोच्छिष्टं शुक्तं स्त्रीप्राणिहिंसनं। भास्करालोकनाश्लीलपरिवादांश्च वर्जयेत्। मांसवर्जनं व्याधिरहितविषयं वेदितव्यं। तथा च
वसिष्ठः। स चेद्व्याधितः कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति। व्याधिजितव्याधिमिन्नमनुसवतीत्यर्थः। अंजनं तैलादिना शरीरस्याक्तं कज्जलादिना नेत्रयोः। ए
तन्निषेधोप्यौषधादन्यत्र। तथा च स्मर्यते। अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं इति। उच्छिष्टं गुरूच्छिष्टेतरत्। स्वस्य परस्य च वर्जयेत्तु।
तथा च वसिष्ठः। उच्छिष्टं गुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतं चेति। शुक्तं कल्कद्रव्यं तक्रादि। श्रवाश्लीलं परुषं वचः। प्रयुक्तं स्त्रीशब्देन तद्विषयप्रेक्षणालंभनाल ष्ये
लोलनं तथा च गौतमः। स्त्रीप्रेक्षणालंभनमैथुनशंकायामिति। भास्करालोकनं तु मनुनाप्युक्तं। नेक्षेतोद्यंतमादित्यं नास्तं यंतं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो
गतमिति। अश्लीलं सनाय्यार्थवचः। परिवादः। सदासदूप परदोषप्रकाशनं। आदिशब्दाद्गंधमाल्यादि निषेधः। मनुः। वर्जयेन्मधुमांसं च गंधमाल्यरसान् स्त्रियः। शुक्तानि चैव
सर्वाणि प्राणिनां चैव हिंसनं। अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणं। कामं क्रोधं च लोभं च नर्तनं गीतवादनं। द्यूतं च जनवादं च परिवादं तथानृतं। स्त्रीणां च प्रेक्षणालंभ
मुपघातं परस्य च। एकः शयीत सर्वत्र न रेतः स्कंदयेत्क्वचित्। कामाद्धि स्कंदयन्रेतो हिनस्ति व्रतमात्मनः॥ व्रतं ब्रह्मचर्यं॥ ॥स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्ना
त्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्। पुनर्मामैत्विंद्रियमित्यादिना सा विश्वासूनुवचः। यदि दिवा यदिनक्तमेनांसि चकृमा वयमिति। इंद्रियाणां विचरतां विषयेष्वप
हारिषु। संयमे यत्नमातिष्ठेद्विद्वान्यंतेव वाजिनां। बुद्धींद्रियाणि पंचैषां श्रोत्रादीन्यनुपूर्वशः। कर्मेंद्रियाणि पंचैव पाय्वादीनि प्रचक्षते। एकादशं मनो ज्ञेयं स्वगु
णेनोभयात्मकं। यस्मिन्जिते जितावेतौ भवतः पंचकौ गणौ। इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयं। सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति। न जातु कामः कामानामु
पभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते। यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत्। प्रापणात्सर्वकामानां परित्यागो विशिष्यते। न तथैतानि शक्यंते

ने

स्त्रीशूद्र

13

संनियंतुमसेवया। विषयेषु प्रदुष्टानि यथा ज्ञानेन नित्यशः॥ इंद्रियाणां तु सर्वेषां यद्येकं क्षरतींद्रियं। तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकं। वशीकृत्येंद्रियग्रामं संय
म्य च मनस्तथा। सर्वान् संसाधयेदर्थान् क्षिण्वन्योगतस्तनुं॥ स व्रतमांस्तु नियमान् ब्रह्मचारी गुरौ वसन्॥ सन्नियम्येंद्रियग्रामं तपोवृद्ध्यर्थमात्मनः॥ इंद्रियाणां विचरतामित्याद्यास्त्वेते
हिता धर्मा न केवलं ब्रह्मचारिण अपि चितरेषामपि भवति॥ ॥अथाचारविधिः॥ तत्रादौ वस्कः॥ ब्राह्मे मुहूर्ते उत्थाय मूत्रपुरीषोत्सर्गं कुर्यादिति। ब्राह्ममुहूर्तलक्षणं पिताम
हः आह॥ रात्रेस्तु पश्चिमे यामे मुहूर्तो ब्राह्म उच्यते इति। पश्चिमे यामे पश्चिमार्द्धप्रहरे ब्राह्ममुहूर्त इत्यर्थः॥ ॥अंगिराः॥ उत्थाय पश्चिमे यामे रात्र्याचम्योदकं ततः। अंतर्धाय
तृणैर्भूमिं शिरः प्राव्रत्य वाससा। वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः॥ कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इति। आचम्य स्वापाद्याचमनं निमित्तमस्ति। तृणैरयज्ञि
यैः। तृणग्रहणं काष्ठादेरप्युपलक्षणार्थमिति। तिरस्कृत्योच्चरेत्काष्ठपात्रलोष्ठतृणानि चेति मनुस्मरणात्॥ ॥पराशरः॥ ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव चानेन्द्रिया
दिषु विरूपमतीर्थाधिकेषु च। ग्रामाच्छरशतं गच्छेन्नगराच्च चतुर्गुणमिति॥ ॥याज्ञवल्क्यः॥ ॥दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः॥
विण्मूत्रमाचरेन्नित्यं संध्यासु परिवर्जयेत्। संध्यासु वर्जनं निरुद्धतरविषयं। नावगंक्तरत्यन्नावगुच्छं क्रियां कुर्यादिति मनुस्मरणात् इंद्रियमविकल्पो वेदितव्यः। यच्च मनु
नोक्तं॥ छायायामंधकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः कुर्यात् प्राणबाधभयेषु चेति। तत्राहा रात्र्यंधकारजनितदिङ्मोहविषयं॥ ॥विष्णुः॥ [illegible] वि
मूत्रधारी ग्रीवायां वा यामासज्य पश्चात्तु मूत्रधारी मृत्तिकाधारी ग्रीवायां वा यज्ञोपवीतधारी मासज्य॥ अंगिराः॥ यज्ञोपवीतं तु पृष्ठतः कंठलंबितं। विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितः॥
कर्णनिधानमेकवस्त्रविषयं। तथा च शंखः स्नायने गृह्यो यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति। हारीतः॥ उच्चारमैथुनं चैव प्रश्रावं दंतधावनं स्नाने
भोजनकाले तु षट्सु मौनं समाचरेत्॥ उच्चारः पुरीषोत्सर्गः॥ विष्णुपुराणे॥ दूरादावसथान्मूत्रं पुरीषं च विसर्जयेत्। पादावसेचनोच्छिष्टे न क्षिपेच्च गृहांगणे॥ इति विष्णुः॥
अंतर्धाय तृणैर्भूमिं शिरः प्राव्रत्य वाससा। वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः॥ मनुः॥ वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गां। न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनं॥ प
श्यन्सन्मुखः॥ न फालकृष्टे न जले न चित्यां न च पर्वते। न जीर्णदेवायतने न वल्मीके न शाड्वले॥ न ससत्त्वेषु गर्तेषु न गच्छन्न पथि स्थितः। नदीतीरं समासाद्य न तस्मिन्निम्नगामये॥
नैन च पर्वतमस्तके इति पाठे पूर्वत्र पर्वतग्रहणेनैव तत्सिद्धावपि पुनर्ग्रहणाद्दोषाधिक्याद्यायातात् ज्ञापेत अयं तावत् सपर्वते दोषाभावप्रतिपादनार्थमित्युक्तं॥
विष्णुपुराणे॥ उत्सर्गे विट्पुरीषस्य मूत्रस्य च विसर्जने। तिष्ठेन्नातिचिरं तत्र न च किंचिदुदीरयेत्॥ भारद्वाजः॥ अपरस्य च विण्मूत्रं काष्ठलोष्ठतृणादिना। उदकवासा प्रतिष्ठेद्दृढवि

धृतामरुन॥ अथ शौचविधिः॥ याज्ञवल्क्यः॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः। गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ उद्धृतैरिति जलांतर्निषेधः। गंधलेपक्षयक-
रमिति सर्वेषां साधारणं शौचं वक्ष्यमाणमृत्संख्यानियमस्त्वदृष्टार्थः॥ दक्षः॥ शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥ यमः॥
आहरेन्मृत्तिकां प्राज्ञः कूलात्ससिकतां तु याम्। कूलग्रहणमनुपहतदेशोपलक्षणार्थं॥ वापीकूपतडागेषु नाहरेद्बाह्यतो मृदं। आहरेज्जलमध्यात्तु परतो मणिबंधनात्॥ शा-
तातपः॥ शुचिदेशात्तु संग्राह्या शर्करादिविवर्जिता। रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृता॥ कश्यपः॥ विप्रे गौरा मृदः प्रोक्ता क्षत्रे रक्ता तथोदिता॥ वैश्यस्य हरिता प्रो-
क्ताः कृष्णा स्त्रीशूद्रयोस्तथा॥ विष्णुपुराणे॥ वल्मीकमूषकोत्खातां मृदं नांतर्जलां तथा॥ शौचावशिष्टां गेहाच्च मृदं शौचे विवर्जिताः॥ विष्णुः॥ अनंतः प्राण्युपघातवर्जं लोष्ठोत्खातां न वा-
हारेत्॥ मनुः॥ आहृतां न च शौचार्थं वालुकां पांसुरूपिणीं॥ न मार्गान्न श्मशानाच्च नाद्याद्वाकुड्यतः क्वचित्॥ तथा यस्मिन्देशे शौचं यावद्भिर्मृत्तिकाभिः शिष्यते तत्र प्रशस्तास्या-
न्नया शौचं विधीयते। मृत्संख्यानियममाह दक्षः॥ एका लिंगे करे तिस्र उभाभ्यां मृद्द्वयं स्मृतमिति॥ करसंख्या एतच्च मूत्रशौचविषयं। एका लिंगे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः।
मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं भवेत् इति आतातपस्मरणात्॥ विट्शौचे तु मनूक्तो विशेषः॥ एका लिंगे गुदे तिस्रस्तथैकत्र करे दश। उभयोः सप्त दातव्या मृदः शौचे पाद-
कां॥ यमदत्तो॥ चैकलिंगे मृत्तिके देये गुदे पंच करे दश। उभयोः सप्त दातव्या इति शंखः॥ मेढ्रे तु मृत्तिकाः सप्त लिंगे द्वे परिकीर्तिते। एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेया चतुर्दशेति।
तिस्रस्तु मृत्तिका देयाः कर्तुर्निरवशेषणं। तिस्रस्तु पादयोर्देयाः शिवकामस्य सर्वदा॥ शौचमेतद्गृहस्थानां तथा गुरुनिवासिनां। द्विगुणं स्याद्वनस्थानां यतीनां त्रिगुणं स्मृतं॥ मृत्तिकाश्च
समुद्दिष्टा त्रिपर्वं पूर्यते यया इति॥ अत्र मृत्तिकाधिक्यं मूत्रपुरीषनिर्हरणार्थं कार्यं॥ यदा चैवमपि गंधलेपक्षयो न भवति तदा संख्यातिक्रमेणापि कार्यं। तथाह मनुः॥
यावन्नापैत्यमेध्याक्ताद्गंधो लेपश्च तत्कृतः। तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिष्विति॥ हस्तशौचे तु हारीतो विशेषमाह॥ दश वामे सप्त पृष्ठे प्राग्दोषास्यां तिस्रस्ततः पादौ प्रक्षालये-
दिति॥ पृष्ठे सव्यपश्चाद्भागे॥ लिंगशौचे तु मृत्प्रमाणमाह दक्षः॥ लिंगे तु मृत्समाख्याता त्रिपर्वं पूर्यते यये ति॥ विट्शौचे तु मनुः॥ अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥ द्वितीया च
तृतीया च तदर्धार्धा प्रकीर्तिता॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणं॥ न्यूनाधिकं न कर्तव्यं शौचं शुद्धिमभीप्सता॥ प्रायश्चित्तेन युज्येत
विहितातिक्रमे कृते॥ बालः॥ नोद्धृतशौचेन कुर्वीत कुर्वीतोद्धृतवारिणा॥ कथमप्युद्धरणाशक्तौ॥ आदित्यपुराणे॥ क्षितिमात्रं जलं यत्र कार्यं शौचं च तत्र वै। पश्चात्तु शोधयेत्तीर्थमथान्य-

पो हतं

कौ ८

वस्तु विसर्जयेत् । दक्षः । यद्दिवा विहितं शौचं तदर्धं च निशि स्मृतं । तदर्धमातुरे प्रोक्तं आतुरस्यार्धमध्वनि । आदित्यपुराणे । स्त्रीशूद्रयोरर्धमानं शौचं प्रोक्तं मनीषिभिः । योषिन्मूत्रे त्रीणि नाम्रज
नेयाय विष्टसंनं करोति तस्याप्यर्धशौचं । आह बृहत्पराशरः । उपविश्य तु विण्मूत्रं कर्तुं यस्तं न विंदति । स कुर्यादर्धशौचं तु स्वस्थः शौचं तु सर्वदेति । यत्संख्याया विषमत्वेनाधिकरण
संतवस्त्रमध्यमृद्र्धपरिमाणग्राह्या । आर्त्तः कुर्याद्यथाशक्ति स्वस्थः कुर्याद्यथोदितं । बालस्यानुपनीतस्य गंधलेपक्षयावधिः । वृद्धपराशरः । अरण्ये निर्जले रात्रौ चौरव्याघ्राकुल
पथि । तत्र मूत्रपुरीषं च द्रव्यहस्तो न दुष्यति । मृदादिहस्ते धारयित्वा न दुष्यतीत्यर्थः । अन्ये तु द्रव्यहस्तो न दुष्यतीत्यस्यान्यथार्थं वर्णयंति । एवंविधस्थले अशौचनीयद्रव्यं हस्ते गृहीत्वा
मूत्रपुरीषकरणेपि न द्रव्यं शुद्धमेवेति । तन्न द्रव्यं हस्ते गृहीत्वा वा वमनेन तत्स तिष्ठेद्देवतीत्यर्थः । भोजनकाले गुदशौचविनिरोषमाह बृहस्पतिः । भुंजानस्य तु विप्रस्य कदाचित्स्रवते गु
दं । उच्छिष्टमशुचित्वं च तस्य शौचं विधीयते । पूर्वं कृत्वा तु शौचं तु ततः पश्चादुपस्पृशेत् । ततः उपवासं च पंचगव्येन शुद्ध्यतीति । विप्रग्रहणमुपलक्षणार्थं । बोधायनस्तु नियममाह । देवलः ।
धर्मविद्दक्षिणे हस्तमधः शौचे न योजयेत् । तथा च वामहस्तेन नाभेरूर्ध्वं न शोधयेत् । अत्रेदं विचारणीयं । विण्मूत्रयोर्मिलितयोः करणे एकालिंगकैरिति संख्येयं तच्छौचं प्रवर्तते । आहोस्वित्
प्रत्येकं करणेपीति प्रत्येककरणे तावदुक्तं । केवलमूत्रोत्सर्गे तावत्पवचनविरोधस्तु वचनं । एकालिंगेकरसत्येति ... हस्तयोर्द्वयोः । मूत्रशौचं समाख्यातमिति । अथ केवलपुरीषोत्सर्गविष
यत्वमुच्यते लिंगशौचनिमित्तानामपि निमित्तं तच्छौचमापद्येत तदप्युक्तं । अदृष्टार्थं च प्रसंगात् पूर्ववचनादुक्तमितिवचनात् एकालिंगे तस्याः शास्त्रे केवलमूत्रोत्सर्गविषयत्वेनाप्युपपत्तेः ।
आगमिकादियं गतिः । यद्दृष्टकल्पनं । अतो विशिष्टोत्सर्गे एवेति युक्तं । तत्रापि लिंगशौचं पूर्वं वचनप्रतीतौ किं क्रमेण कारणाभावात् संनिहितत्वात् प्रथमतः एतत्करणे सा त्वान्मू
त्रलेपस्य मणिबंधोपरिसार्गोपि संसर्गप्रसक्तेः शुद्धहस्तपादादिशौचं वृत्तान्तरेणैव । दृश्यकालकर्त्ता शौचस्वरूपप्रकारस्यैकत्वात् । । अथ विण्मूत्रव्यतिरिक्तशारीरमलशौचं । मनुः । ऊर्ध्वं
नाभेर्यानि खानि तानि मेध्यानि सर्वशः । यान्यधस्तादमेध्यानि देहाच्चैव मलाश्च्युताः । इति खानींद्रियच्छिद्राणि । मूलानामपि स एवाह । वसा शुक्रमसृङ्मज्जा मूत्रं विड्घ्राणकर्णविट् । श्लेष्माश्रु
दूषिका स्वेदो द्वादशैते नृणां मलाः । वसा मांसस्नेहः । मज्जा अस्थिस्नेहः । कर्णविट् कर्णमलं दूषिका नेत्रमलं । एते पद्याने बौधायनः प्राह । आददीत मृतापश्चात्षट्सु पूर्वेषु शुद्धये । उत्तरे
षु तु षट्स्वद्भिः केवलाभिर्विशुद्ध्यतीति । मनुस्तु । विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत् । देहिकानां मलानां च शुद्धिषु द्वादशस्वपीति । विण्मूत्रमुत्सृज्य तेयेन तत्राह ... तच्छुद्ध्यर्थं अ
र्थवत् प्रयोजनवत् । एवं च बौधायनमनुवचनयोर्विकल्पः । स च देशकालाद्यपेक्षया । तथा बौधायनः । देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं । उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ।

त्रा० २

यमः॥ स्मृतेरिति॥ दयोस्तु हस्तयोस्त्वत्र पवत्राम्हदः पं वदखामे धोहस्तादीनां विशेषमतः॥ एतदात्मीयमूत्रादिस्पर्शनिरोधमुदाहृतं॥ उत्सर्गकालादन्यत्र परकीये तु पद्यते॥ परस्य प्राणित

स्पर्शेरिता॥ विण्मूत्रजे तथा॥ रवत्रापि पिबेन्मुनिः॥ षाविंशन्मृत्तिका सप्तम्या स्मृता॥ विष्णुः॥ नाभेरधः स्पृष्ट्वा बाहू... कायिके मले॥ सुरास्तिमद्यौ वा प ... तेम्हृ ... येस्तदंशं प्रक्षाल्याचान्तः शुद्धो नु

अन्यत्रापहता मृत्साद्येस्तदं गंधरूपाल्यस्नाले वेदं इंद्रियोपहतास्तापा— स्नात्वा पंचगव्येन दशानुष्ठादापहत शुद्धतिं॥ शौचप्रकरणं॥ ॥ अथाचमनं॥ ॥ तत्र हृद्ध्यानात पाः॥ हयाचो

वं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः॥ निबद्ध शिखः कृतहस्तु द्विज आचमनं चरेत्॥ अनुष्णाफेनसिता सिताश्च मेद्दिति॥ आउराणामुष्णा दकुमप्यविरुद्धा॥ तथा वापस्नान्वा॥ ज्ञान कुनाजराणा उत

थ्योत्तो नोऽप्पायिनामिति॥ अवाचमनं तत्वनीतिशेषः॥ याज्ञवल्क्यः॥ अंतर्जानुः शुचौ देश उपविष्ट उदङ्मुखः॥ प्राग्वा ब्राह्मणतीर्थेन द्विजो नित्यमुपस्पृशेत्॥ तथा कनिष्ठादेशीन्यंगुष्ठमू

लान्यग्रं करस्य तु॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥ दक्षः॥ प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बुवीक्षितं॥ संमृज्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं॥ बोधित्समेतदत्र विषयं॥ राजाव

लान्यग्रं करस्य तु॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् दक्षः॥ प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बुवीक्षितं॥ ... याचामे ---- द्विः प्रमृज्यात्ततो मुखं॥ खानि चोपस्पृशेदद्भिरात्मानं शिर एव च॥ गौतमः॥ त्रिश्चतुर्वा अपआव

वीक्षितानवस्थुछिरू कामनीबिस्तिः॥ इति॥ यमस्मरणात्॥ मनुः॥ त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखं॥ खानि चोपस्पृशेदद्भिरात्मानं शिर एव च॥ ... व्याघ्रपादः॥ संहृतांगुलिनिसृष्टायं गृहीत्वा दक्षिणेन तु॥ मुक्तांगुष्ठकनिष्ठे तु शेषेणाचमनं चरेत्॥

मेदिति॥ वज्रग्रहणाद्देवपित्र्यकर्मापच्छायाति केचित्॥ त्रिर्ग्रहणेन उष्ट्रानस्विः त्रयोत्तरधाजः॥ नाकार्यं प्राजापत्येन विदशितं दिवं॥ यस्मिन्नाचमनप्रयोगाय ब्राह्मं तीर्थं स्मृतं॥ तेन प्रयाम

आह्नेणा विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्॥ कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन॥ आजापत्यं ... अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं॥ अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः॥ कनिष्ठांगुष्ठयोर्नाभिं हृदय

कायनितीर्थांतरेण॥ दक्षः॥ संहतांगुलिनिःसृते आस्याम वमुपस्पृशेत्॥ अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं॥ त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्॥ अत्र वि

यं तु तलेन विसर्वांस्तिरस्तु शिरः॥ पश्चाद्बाहू चाग्रेणसंस्पृशेत्॥ याज्ञवल्क्यः॥ अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः॥ त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्॥ मध्यमांगुष्ठयोगे

तु नासिका॥ हृदयं खवच्छन्न्याअपस्पर्शनमाह॥ तर्जन्यंगुष्ठयोगेन स्पृशेन्नासापुटद्वयं॥ मध्यमांगुष्ठयोगे

विशेषमाह॥ पैठीनसिः॥ सव्ये पाणौ शाखा आपानिनयेदिति॥ शाखा आचमनविशेषः॥ हृदछं ... तथा॥ अंगुष्ठेन कनीयस्या

नस्पृशेन्नेत्रद्वयं ततः॥ अंगुष्ठस्यानामिकाया योगेन श्रवणे स्पृशेत्॥ कनिष्ठांगुष्ठयोगेन स्पृशेन्नेत्रद्वयं पृथक्॥ मध्यमानामिकाभ्यां तु स्पृशेन्नासापुटे तथा॥ यत्र व्या

कर्णौ संयोगतः स्पृशेत्॥ तर्जन्यंगुष्ठयोगेन नासिके दितलं न्यसेत्॥ पैठीनसिः॥ अग्निरगुष्ठसन्मात्रे गोवसर्वाणि स्थानानि स्पृशेदिति॥ अत्र स्वस्वशाखानुसारेण व्यवस्थिता विकल्पाः॥ यत्र व्या

मायामंगस्पर्शनिमेर्दर्भाम्नातं॥ अंगुष्ठादिविशेषो वा नाम्नातः॥ तत्र द्वितीयानलिच्छिका विशेषः॥ येषां तु स्वशाखायां कतिपयांगस्पर्शनमाम्नातं तेषां तु स्वशाखोक्तं चाक्रमानुसारी शाखांतरो

क्तकमत्र अनुक्तांगस्पर्शनमिवातितिव्यवस्था॥ उदकग्रहणमाह याज्ञवल्क्यः॥ हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः॥ शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः॥ अंततः तालुगाभिः॥ हृत्कानां

स्पृशेरस्कंधद्वयं तथा॥ नाभिं च हृदयं तद्वत्स्पृशेत्पाणितलेन तु॥ संस्पृशेच्च तथा शीर्षमिति॥ संस्पृ॥ तालांगुलिवज्रयो स्पृशेच्चमूर्धनमाहितः॥ तर्जन्यंगुष्ठयोगेन ×पं ३× यत्रै×

= दि... मुज्या

परिमाणमाहोशनाः। माषमज्जनमात्रा हृदयंगमास्तवंतीति। आचमनप्रसंगात्सपवित्राचमने कश्चन विशेषः प्रदर्श्यते। तत्र मार्कंडेयः। सपवित्रेण हस्तेन कुर्यादाचमनक्रियां। नोच्छिष्टं त
त्पवित्रं भुक्तोच्छिष्टं तु वर्जयेत्। एतद्दक्षिणकराभिप्रायं। हारीतेनाचामे निषेधात्। वामहस्ते कुशान् धृत्वा समाचामति यो द्विजः। उपस्पर्शनं वृत्तं तेन रुधिरेणामलेन चेति। एतच्च केवलवामहस्ताभिप्रा
यं। हस्तद्वये श्रयणे गोतिलेन फलस्मरणात्। अत एव त्रिच्छिन्नैर्दर्भैः समाचामति यो द्विजः। सोमपानफलं तच्चतुष्कायज्ञफलं स वेदिति। अत्र विशेषमाह हारीतः। सव्यापसव्योऽर्वाचीनः सपवित्रो करोद्ध
धः। ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं भवेदिति। पवित्रलक्षणमाह कात्यायनः। अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्। मार्कंडेयः। चतुर्भिर्दर्भपिंजूलैर्ब्राह्म
णस्य पवित्रकः। एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं। त्रिभिर्दर्भैः शांतिकर्म पंचभिः पौष्टिकं तथा। चतुर्भिः साभिचारार्थं कुर्यात्पवित्रकं इति। अयं चाचमननिमित्तो तत्र यमः। त्रीर्यादिकमाचामेदव
नीयं तथैव च हारीतः। स्त्रीशूद्रोच्छिष्टोपहितभाषणे मूत्रपुरीषासृग्दर्शने देवताभिगं तु कामसन्नाचामेत्। अथ द्विराचमननिमित्तानि तत्र याज्ञवल्क्यः। स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्यापस
पीणा। आचांतः पुनराचामेदन्यत्रयसकृत्तु शं गिरा। चांडालादीनपिहाय म्लेच्छसंभाष्य विष्ठाध्याति। खादी स्पृष्ट्वापि वाचामेत्केशं वा दक्षिणं स्पृशेत्। जानुनोरधस्तात्खादिस्पर्शे आचमनं। अन्यत्र स्ना
नविधानात् चदकाराचो समर्थ्यवादलिंगात्केशस्पर्शः। अनेनाभिप्रायेण बृहस्पतिः। पितृमंत्रोच्चारे रौद्रे आत्मालंभेऽधमेक्षणे। अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे। मार्जारमूषकस्पर्शे प्रहासेऽनृ
तभाषणे निमित्ते वस्तु सर्वत्र दक्षिणं श्रवणं स्पृशेत्। तथा। आर्द्रतृणं गोमयं वा भूमिं वा संस्पृशेद्द्विज इति। सांख्यायनः। क्षुते निष्ठीवने चैव दंतोच्छिष्टे तथानृते। पतितानां च संभाषे दक्षिणं श्रवणं
स्पृशेत्। आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट्। विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति सर्वदा। आचारसागरे। अपःस्वयोपध्वंजग्ध्वा भुक्त्वा तांबूलचर्वणं। सौगंधिकानि सर्वाणि नाचामेत विचक्षणः।
अपो जग्ध्वापि। अमृतापिधानमसीत्यादिमंत्रैरपां जग्ध्वा तन्निमित्तं नाचामेदित्यर्थः। बौधायनः। पादप्रक्षालनशेषेण नाचामेद्वारिणा द्विजः। अशुद्धोत्तावपि बिंदुश्चिद्धिस्त्वा भूमौ जलं स्पृशेत्तु आ
पस्तंबः। संध्यार्थे भोजनार्थे वापि तर्पणार्थे तथैव च। शूद्राहृतेन नाचामेद्दारिद्र्यं हि वर्धते। यमः। यावन्नोपस्पृशेद्दिशो यावद्भोजनेन संस्पृशेत्। वामे हि द्वादशादित्या वरुणाग्निदशेश्वराः। उदकस्थोदकस्थस्तु स्थ
लस्थस्तु स्थले शुचिः। पादौ स्थाप्योभयत्रापि आचांतो भवति शुचिः। जले स्थले चैकपादं स्थाप्यापोद्धृत्याचांतः। अत्र तत्र जलकर्मणि स्थलकर्मणि वक्षो भवतीत्यर्थः। अत्र चापादयोः शौचं तिष्ठन्मुक्तशिखो
पिवा। विनायाकापनीतेन आचांतोऽप्यशुचिर्भवेत्। तिष्ठन्नितिष्ठन्न विपर्ययः। विष्णुनातिष्ठतापि जल्पानुशानात्। जान्वोरूर्ध्वं जले तिष्ठन्नाचांतः शुचितामियात्। अधस्ताच्छतकृत्वोपि समाचांतो न शु
ध्यतीति। अधस्तान्निषेधाज्जानुदघ्ने विरुद्धौ तयोः समर्थत। जानुमात्रे जले तिष्ठन्निति। अनाचांतात् शुचिरितिवोक्तरोषः। तथा सोपानकोऽननोष्णीषी पर्यंकासनयानगः। उद्दीराप्रपदं चैव नाच
मन्शुद्धिमाप्नुयात्। उरगो वक्त्रयानस्थ हस्ताधीरो हकस्तथा। आचांतः कर्मधीः स्यान्नाचलोऽध्यजघ्नस्तु। उत्कासनस्थोप्पावामेन्नान्यकाले कदाचन। नपादुकस्य पवित्रानायज्ञोपवीतकः। शांखायनः।।

दानमाचमनं होमं भोजनं देवतार्चनं । प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं ॥ आसनारूढपादस्तु जानुनोर्वाथ जंघयोः ॥ कृतावसक्थिको यश्च प्रौढपादः स उच्यते ॥ स्पृशंति बिंदवः पादौ य
आचामयतः परान् । भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥ पारशरमाचमनेयोदके दीयमानाय बिंदवः पादयोः पतंति तैर्न अशुद्ध इत्यर्थः ॥ इत्याचमनविधिः ॥ अथ प्रातःस्नानं ॥ तत्र मार्कंडेयपु
राणे ॥ अस्नातस्य क्रियाः सर्वा भवंति विफला यतः । प्रातः समाचरेत् स्नानं स्नानेन [illegible] स्मृतं इति । प्रातःस्नानं मंत्रवर्ज्यं मध्याह्ने मांत्रिको विधिः ॥ नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणं । योगी अर
स्नानमष्टेव ते मंत्रे -- न प्राणसंयमः ॥ सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ॥ योगी याज्ञवल्क्यः ॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥ यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारिणः ॥ वा
नप्रस्थस्य कालद्वयोः स्नानं ब्रह्मचारिणश्च सकृत्स्नानं अशक्तविषये ॥ अत एव याज्ञवल्क्यः ॥ स्नानं त्रिषवणाद्यायी निवृत्तश्च प्रतिग्रहात् इति स्मृतिसंग्रहे ॥ स्नायात् स्नातश्रमस्थश्च ब्रह्मचारी
तथा गृही तिरोरवः ॥ प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हि तत् । सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकं ॥ दृष्टं मलापनयनं तदंगशुद्धिः ॥ अदृष्टं निद्राद्येन पापक्षयं ॥ अलक्ष्मीकालक
र्णी दुःस्वप्नदुर्विचिंतितं । याम्यं हियात्तनाडीः खेनित्यस्नायी न पश्यति ॥ कालावसीडा सहकृहिता ॥ नित्यस्नानं प्रयात अपि पापकृतो नरः ॥ कात्यायनः ॥ यथाहनि तथा प्रातर्नित्यं स्नायादनातु
रः ॥ प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हि तत् । सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकं ॥ दृष्टं मलापनयनादंगशुद्धिः दंतान् प्रक्षाल्य नद्यादौ गेहे यत्तदमंत्रवत् ॥ अमंत्रवदिति प्रातःस्ना
नेन सर्वात्मनामंत्रनिषेधः ॥ अपि तु मंत्रबहुत्वनिषेधः ॥ यतः स एवाह ॥ अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्मणः ॥ प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः इति दक्षः ॥ अत्यंत
मलिनः कायो नवछिद्रसमन्वितः ॥ स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनं ॥ वामनपुराणे ॥ निषिद्धनीरं [illegible] अपि जलानि पूर्वोत्तरस्यां गिरिदंतमेव प्रक्षाल्य पादौ च मुखं च कंठं य
पवीतं च जलं पिबेद्वि [illegible] यज्ञोपवीतमासज्य यथाग्रहाराः एवं चेत्तत्कृतवतो उपवीतं विनीतं कृत्वा प्रक्षालयेदिति । द्विर्जलं पिबेदाचामेदित्यर्थः ॥ करास्यां भ्रमयेद्दत्तं त्रिरंवा बंधविक्षयच
प्राणायामं तथा कुर्यात् [illegible] कालज्ञानं यथाविधि । यथा [illegible] कालज्ञानं तिथिनक्षत्रादिज्ञानं कुर्यादित्यर्थः ॥ स्मृतिकौस्तुभे [illegible] रत्वा तानि केनालभयेत् । दक्षिणेन वहस्तेन अष्टावेतानतुक्रमात् ॥ अष्ट
वक्ष्यमाणा ॥ ललाटं मस्तकं [illegible] दरं हृदि हृदयं चेत्यष्टौ विज्ञेया ॥ ललाटमासोरुस्पृष्टमुदरं च सकृत्स्पृक् ॥ तातावासकरेणैव ना [illegible] घर्के दक्षिणादिक्रमेणैव वराणां चत्रित्रिस्त्रिरिति ॥ मुदं
तीयसागेन करौ चित्रिः प्रमार्जयित्वा शनैः मृदा स्नानं कृत्वा च मज्जनं विशोधन् ॥ नातिमात्रे जले स्नायात् केशान्न विधाव्येद्द्विज ॥ निरुध्य कर्णौ नासां च त्रिः कुर्यान्मज्जनं ततः ॥ द्विराचम्यातिषेकं च कुर्याद्दिष्ट
करेण तु । आपो हि ष्ठेति सूक्तेन द्विज आवर्तीयदयां ॥ द्रुपदादिव (?) कायेतिमंत्रेण विद्वानद्घमर्षणं ॥ जंबुकायेतिमंत्रेण । नाथनियमः ॥ अपि तु तावत् [illegible] पलक्षणार्थं ॥ जपं द्वादशवारान्तम
हापापप्रणुत्तये । अघमर्षणक्रियया धूतपापः समाहितः ॥ निमज्ज्य वारांस्त्रीस्ततस्तर्पणमारभेत् । तर्पणमिति स्नानांगतर्पणं ॥ यथा तैत्तिरीयशाखायां ॥ ७० ॥ ब्रह्मादेवांस्तर्पयामि । भुवादेवांस्तर्पयामि ।
सुवर्देवांस्तर्पयामि ॥ एवमेव माध्याह्निकस्नानमपि निःशेषस्याह्निकविशेषस्त्वादपि प्रदर्श्यते ॥ ॥ अथ प्रातःसंध्या ॥ ॥ तत्र व्यासः ॥ प्रातःसंध्यासनं चैव मध्यमं स्नानकर्मणि ॥ सादित्यां पश्चि
मां संध्यां समुपासीत यथाविधि ॥ मध्यमं स्नानकर्मणीति माध्याह्निकस्नाने जातेऽयमर्थः ॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥ संवर्तः ॥ अथ चमत्कारे

× तता २

मदनपा०

॥१०॥

शुद्ध आसनसमुपस्थितः ॥ करसंपुटकं कृत्वा संध्यां त्रिंय समारभेत् ॥ नत्वाथ पुंडरीकाक्षं तत्र पात्राघशांतया ब्रह्मवर्चसकामार्थं प्रातःसंध्यामुपासते ॥ इदं कृत्वा तु संकल्पं जलेनादाय
पाणिना ॥ नद्यां नद्युत्तमाद्यैस्तु गाढ वामकरे स्थितं ॥ त्रिर्वादितिं मंत्रैस्तु पंचभिर्मिलितैश्च तैः ॥ गायत्र्यावततैर्दर्यादि निषेकं तु ततः काले ॥ आर्षं छंदो दैवतं च विनियोगविधिं स्मरेत् ॥ आवाहन
च गायत्र्या प्राणायामं समस्य सन्तु ॥ गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमंडलुं ॥ चतुर्भुजां प्रणवात्मिकां रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थितां ॥ ब्रह्माणीं ब्रह्मदेवत्यां ब्रह्मलोकनिवासिनीं ॥ आ
वाहयाम्यहं देवीमायांतीं सूर्यमंडलात् ॥ ॐकारस्य ब्रह्मा ऋषिर्दैवाग्निस्तस्य कथ्यते ॥ गायत्री च स्वयं छंदो नियोगः सर्वकर्मसु ॥ त्रिमात्रस्तु प्रयोक्तव्य आरंभे सर्वकर्मणां ॥ व्याहृतीनां च सर्वासां
आर्षं चैव प्रजापतिः ॥ गायत्र्युष्णिगनुष्टुब्बृहती त्रिष्टुभेव च ॥ पंक्तिश्च जगती चैव छंदांस्येतानि सप्त वै ॥ अग्निर्वायुस्तथा सूर्यो बृहस्पतिरपांपतिः ॥ इंद्रश्च विश्वेदेवाश्च देवताः समुदाहृताः ॥ प्रा
णस्यायमने चैव विनियोग उदाहृतः ॥ भूर्लोकं पादयोर्न्यस्य भुवर्लोकं तु जानुनोः ॥ स्वर्लोकं तु हृद्देशे तु नाभिदेशे महस्तथा ॥ जनलोकं तु हृदये कंठदेशे तपस्तथा ॥ भ्रुवोर्ललाटसंधौ च सत्यलोकं
प्रतिष्ठितं ॥ सविता देवता तस्या मुखमग्निस्त्रयात्मकं ॥ विश्वामित्र ऋषिश्छंदो गायत्री सावित्री स्मृता ॥ जपहोमोपनयने विनियोगो विधीयते ॥ न्यासः ॥ ॐ भूर्विन्यस्य हृदये तु वा शिरसि विन्य
सेत्तु स्वरितीदं शिखायां तु गायत्र्याः प्रथमं पदं ॥ विन्यसेत्कवचे नैव द्वितीयान्नत्रयोर्न्यसेत् ततः तृतीयेनास्त्र विन्यासः एवं न्यासः ॥ घनाशनः ॥ या संध्या सा च गायत्री त्रिधा सत्त्वा व्यवस्थिता ॥ प्र
वासेव तु गायत्री सावित्री मध्यमा स्मृता ॥ या सवेत्पश्चिमा संध्या सा च देवी सरस्वती ॥ आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥ गायत्री छंदसां मातर्ब्रह्मयोने नमोऽस्तु ते ॥ कात्यायनः ॥ सर्वं सर्ववारि
त्याप सर्वं संच्य परिक्षिपेत् ॥ रक्षार्थमिति शेषः ॥ अथ प्राणायामः ॥ तत्र योगीश्वरः ॥ सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ गायत्री शब्द निरुक्तिम
हव्यासः ॥ गायं तत्रायसे यस्मा गायत्री तत्ततः स्मृता ॥ मार्कंडेयपुराणे ॥ प्रथमं साधनं कुर्यात् प्राणायामस्य योगवित् ॥ प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥ लघुमध्योत्तरीयाख्यः प्राण
यामस्त्रिधोदितः ॥ तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे ॥ लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ॥ त्रिगुणाभिस्तु मात्राभिरुत्तमः समुदाहृतः ॥ विष्णुपुराणे ॥ प्राणाख्यमनिलं वश्यमभ्यासात्कु
रुते तु यः ॥ प्राणायामः स विज्ञेयः सबीजोऽबीज एव वा ॥ पूरकः कुंभकश्चैव रेचकः स्थापनं क्रमात् ॥ बहिर्निःसरणं तस्य रेचकः परिकीर्तितः ॥ सबीजो ध्यानसहितः सगुणोपास्तिः ॥ अबीजो नि
र्गुणोपासनं तच्च परमं ह्यसाविनयं ॥ यथाहृ पराशरः ॥ सालंबानगवन्मूर्तिः स्थूलरूपं द्विजोत्तम ॥ अनालंबमनंतं तस्य योगिनो स्यात्सतः स्मृतः ॥ इडया कर्षयेद्वायुं बाह्यात् षोडशमात्रया ॥ धारयेत्पूरि
तं योगी चतुःषष्ट्या तु मात्रया ॥ सुषुम्णामध्यगं सम्यग्द्वात्रिंशन्मात्रया शनैः ॥ नाड्या पिंगलया चैव तं रेचयेद्योगवित्तमः ॥ न्यासः ॥ अंगुष्ठेन युतं चाद्यैर्नासाया दक्षिणपुटं ॥ कनिष्ठानामिकाभ्यां
तु वामं प्राणस्य संग्रहे ॥ अंगुष्ठतर्जनीभ्यां च ऋग्वेदी सामगायनः ॥ अंगुष्ठानामिकाभ्यां तु आहाहस्ते विरथर्वसि ॥ मनुः ॥ प्राणायामा ब्राह्मणस्य त्रयोपि विधिवत्कृताः ॥ व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं त
पः ॥ प्राणायामस्तु यः कार्यः संध्यासु वति स्थपि ॥ प्राणस्यायमनं कृत्वा आचमेत्प्रयतोऽपि सन् ॥ अंतरं बिंदते यस्मात्तस्मादाचमनं स्मृतं ॥ अथ मार्जनं योगीयाज्ञवल्क्यः ॥ आपो हि ष्ठेति तिसृभिर्ऋग्भिस्तु प्रयत
श्रुचिः ॥ नवाग्रस्य तु कार्दिंजलं शिरसि निक्षिपेत् ॥ प्रतिपदं आदौ प्रणवेनोच्चार्यमाणे नवऋचयोऽपि नव प्रणवा भवंती ति नव प्रणवसंयुक्तं भवति ॥ ब्रह्मांडपुराणे ॥ नद्यां वाथ सदेवाथ तडागे जने मृन्मये यथवा

॥२०॥

यथा ऊर्ध्वं सर्वाणामतमशिः।। आपो हि ष्ठेति सूक्तस्य सिंधुद्वीप ऋषिः। आपो देवताश्छंदो गायत्री मार्जने मंत्रं। मार्जितातीर्थमाहृत्य ×पं×२×

ॐ बारथासो वर्षे राजात दारके न लं तत्राथ यामरूस्तो वा संध्योपास्तिं समाचरेत्। एवं चवामरूस्तो दक संध्या निषेध वचनानि। पापांतर मन्ना वे सावकाशानि। प्रायश्चित्तः इत्याचाला निस्रुखं तेषां मूर्ध्नि बि
न्दु वेन ऊं आपो हि ष्ठेत्यृचा चार्यं माई नं चकु त्वा दाकः। प्रति प्रणव संयुक्तं क्षिपेन्मूर्ध्नि पादयोः। इत्यृचस्यांते। मार्जनार्थं निवलिकस्मि जाता निदेवता तीर्थे कुर्यादिति। एवं मार्जनं कृत्वा सूर्यश्चेत्य
पः पिबेत्। आह शौनकः। सायमग्निश्चमेत्यनेन प्रातः सूर्यश्चेत्यपः पिबेत्। आपः पुनंतु मध्याह्ने एवं विधायाचमनं चरेत्। तत्र सूर्यश्च मा मन्युश्चेत्यस्य मंत्रस्य प्रजापतिर्ऋषिः। अग्निर्ऋषिः सूर्यमन्युमन्युपतिरात्र्यो देवताः।
प्राशने संध्याचमने विनियोगः। केवन नारायणार्थं त्रिष्टुप् छंदः इत्यमन्वीत। अग्निश्च मा सूर्येति यजुर्वेदिको मंत्रो बौधायनोपि। अस्यार्थः। संध्योपासन विधिः। ख्याख्यास्यामहे... गत्यासुपाता सिंचि
तः। प्रक्षालित पाणिपादः अप आचम्याग्निश्च मा मन्युश्चेति मंत्रं पीत्वा सूर्यश्च मा मन्युश्चेति प्रातः। सावित्रेण प्राणानायम्य तिसृभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिर
न्यैश्च पवित्रैरात्मानं प्रक्षाल्य अंतर्जले तिसुरतिसमा दक्षिणा वरुण इति। अस्यावामदेव ऋषिः। अनुष्टुप् छंदः। दधिक्रावा देवता मार्जने विनियोगः। अग्निर्गायत्रि रापो हि ष्ठेयाति। हिरण्यवर्णाः हिरण्यव
र्णाः शुचयः पावकाः यासु जाताः सविता यास्वग्निः। शिवेन मा चक्षुषा पश्यत। स्वधितरुपस्पृशत। आसां त्रिष्टुप् छंदः। अग्निर्ऋषिः। आपो देवता मार्जने विनियोगः। केवनार्थं ऋषिः स्मृतिपमन्यात पावमानीति। त्यावादित्यर्ये चावलि। सा०
तापनीनां ब्रह्मा ऋषिः छंदांसि देवतानां वक्तिं चाक्षिपः। तयान्त्रो क्तं। तत्स्वरूपं छंदो गानां संध्याचमनो क्तौ मंत्रो दृष्टव्यो। अहश्च मादित्यश्च पुनातु इति प्रातः। रात्रिश्च मा वरुणश्च पुनातु इति सायं
पावमानीनां ब्रह्मा ऋषिः छंदांसि देवतानां वक्तिं च क्षिपः। नारायण इति। स्पृष्ट्वा वा विष्णुतां तायं मूर्ध्नि ब्रह्ममुखेन तु आपो हि ष्ठेति सूक्तेन दत्वा निमज्जिन मार्जयेत्। स्पृष्ट्वा आचम्य ब्रह्म सूक्तं मनुना
मिति। एता प्रजापतिर्दृष्टो लिंगोक्त देवताश्च संध्याचमने नाम नारायण। स्पृष्ट्वा वा विष्णुतां तायं ... इति सूक्तस्य कूर्म सिंधुद्वीप ऋषिः स्मृतः। अग्निर्देवता ...
ॐकार पूर्विका स्तिस्रो महाव्याहृतयोऽव्ययाः। त्रिपदा चैव गायत्री विज्ञेया ब्रह्मणो मुखं। इति स्मृतेः। आपो हि ष्ठा नव सूक्तं सिंधुद्वीप ऋषिः स्मृतः। अग्निर्देवता ...
र्घ्यं तस्य ... जलपूर्णं ततो हस्तं नासिकाग्रे समर्पयेत्। ... तं चैतिपचि ... ततो जलं तु क्षिपेत्। ... इह ही त्वा पाणिना वारिस्थ शाखा ... जपेत्। बिन्
प्राणायामं चापि ऋचं दृष्टा। मार्जनानंतरं बुद्ध्वा। जलपूर्णं ततो हस्तं नासिकाग्रे समर्पयेत्। ... तिष्ठंति पापानि तस्य देहे द्विजन्मन इति। अघमर्षणस्य ऋषिः ... देवताः ...
यान्नासिकाग्रे तु निरुध्य प्राणमारुतं। य एवं त्रिपदां नित्यं त्रिरंगः प्रयतो जपेत्। न च तिष्ठंति पापानि तस्य देहे द्विजन्मन इति। ... आपो देवता अनुष्टुप् छंदः। ततः सूर्यार्घ्यं निवेदयेत्। व्यासः। करास्यां तोयमादाय गायत्र्या चाभिमंत्रितं। आदित्याभि
मुखं द्रुपदादिव मुमुचानः इति द्रुपदा। अस्याः कोकिलो राजपुत्र ऋषिः। आपो देवता। अनुष्टुप् छंदः। ततः सूर्यार्घ्यं निवेदयेत्। व्यासः। ... अर्घ्यदाने मंत्रांतर माह नारायणः। करास्यामंजलिं कृत्वा जलपूर्णं समाहितः। उद्वयमिति मंत्रेण ततो यं त
मुख स्थित्वा ... ऊर्ध्वं संध्ययोः क्षिपेत्। मध्याह्ने तु सकृद्देव ... पाणीयं द्विजातिभिः। ... विंशको द्योम हावीर्यं मिंदेहा नाम राक्षसाः। ... सूर्यमिच्छंति खादितुं। ततो देव
क्षिपंतु इति। इति शाखानुसारेण व्यवस्था। उदके क्षेपणे कारणमाह। ... विंशको ... महावीर्याः मंदेहा नाम राक्षसाः। ... तेनोदकेन ... एतस्मात्कारणाद्विप्राः संध्यां नित्यमुपासते।
गणाः सावित्रिषयत पोधनाः। उपासते तदा संध्यां ... ऊर्ध्वं उदकांजलिं दद्यात्। तेन ... वज्रीभूतेन वारिणा।

नपा०

१९१।

ततः प्रदक्षिणमावृत्य जलं स्पृशेत् । तथा च पुराणे ॥ सायमेवं तु वदाचम्य प्रोक्ष्य मूर्ध्नि सांजलिं दद्यात् प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुद्ध्यति । सायमित्युपलक्षणं । तत्र कश्यपः । उ
त्तीर्य त्वर्घ्यत्रिकोऽस्याः प्रातस्तिष्ठेद्दिवाकरं । मध्याह्ने तु उरूस्थानां सायं तु कृतितो करो । देवलः । मित्रस्य चर्षणीति मंत्रो च सर्वं जपेति चोदयेत् । इदमिति च चतुष्कोणा सायं कुर्यादुपस्थितिं । व्या
सः । संध्यात्रयेप्येकमेव तु पस्थानं प्रवक्ष्यते । उद्वयं तदिति चित्रं तच्चक्षुरिति द्विवाकरं । एतच्चोपस्थानं प्रातर्जपानंतरमेव कार्यं । तदुक्तं कूर्मपुराणे । ओंकारव्याहृतियुतां गायत्रीं वेदमातरं । ऊ
र्ध्वाजलांजलिं दद्याद्भास्करं प्रति जन्मना । देवमातरमद्भुतार्यं प्रसाद्य तां जन्मना द्विजन्मना । ध्यायाद्वर्कमंडलगतां सावित्रीं विजपेद्बुधः ॥ अथोपदिष्टे दादित्यमुदयंतं समाहितमिति । अथ ज
पः । तत्र व्यासः । तेजोसीति मंत्रेण गायत्रीमावाहयेद्द्विजः ॥ उपस्थाय तुरीयेण नमस्कृत्य जपेत्ततो । याज्ञवल्क्यः । ओंकारं पूर्वमुच्चार्य भूर्भुवः स्वस्तथैव च । गायत्रीप्रणवश्चांते जपे चै
वमुदाहृतः । गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छंदः जपे विनियोगः । ध्यायेच्च मनसा मंत्रं जिह्वोष्ठौ न विचालयेत् । न कंपयेच्छिरो ग्रीवां दंतान्नैव प्रकाशयेत् । मध्यमा हि द्वयं सं
जपकाले तु वर्जयेत् । एवमेकं विजानीयादृषिं छंदश्च ब्राह्मणः स्वयं । विश्वतश्चक्षुरिति मंत्रेण जपांते साक्षरं द्विजः । कुर्यात्प्रदक्षिणं चैव त्र्यंबकं चोपासने ततः । देवागातुविदेति मंत्रेण कुर्याज्जपविसर्ज
नो प्रातः संध्यांगत्वेन गायत्र्या जपितेन वा । अष्टासंख्येन जप्येन ब्रह्मनामेप्यायतां रविः । उत्तमे शिखरे जाता भूम्यां पर्वतवासिनी । ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथासुखमिति । अनंतरं
ध्यास्य सूर्योदये सति प्रायश्चित्तं स्मर्यते । आदित्योत्पुदितायां च संध्योपास्तिमकुर्वतः । नाचाष्टाणां हिरण्यमुग्गायत्र्यष्टशतं जपेत् । प्राणायामत्रयं कृत्वा चैवार्थः ॥ ॥ अथ मध्याह्नसंध्यायाः सो
कर्याविशेषः कथ्यते । संकल्पावाहनाचमनोपस्थानानि जपनिवेदने । तद्यथा । अद्येत्याद्युक्त्वा लग्नाद्ये माध्याह्निकीं संध्योपास्तिमहं करिष्ये इति संकल्प्य । सावित्रीं युवतीं शुक्लां शुक्लवस्त्रां त्रि
लोचनां । त्रिशूलहस्तां वृषवाहनारूढां रुद्राणीं रुद्रदेवतां यजुर्वेदरतां सांगां जटामुकुटमंडितां । कैलासविहितावासां आयांतीं सूर्यमंडलात् । वरदां च शरासीं देवीमावाहयाम्यहं । आदित्या
त्मिकां । इत्यावाहनं । आपः पुनंत्विल्याचमनमंत्रः । अस्य नारायण ऋषिः आपो देवता अनुष्टुप् छंदः आचमने विनियोगः । एवं जलिं प्रक्षिपेत् । ऊर्ध्वबाहुः सूर्यमुदीक्षमाणः उपतिष्ठेत् । उपस्था
नमंत्रविशेषः स्मृत्यंतरे दर्शितः । गायत्र्या च यथासंख्यं उपस्थाय दिवाकरं । विभ्राडित्यनुवाकेन सूक्तेन पुरुषस्य च । शिवसंकल्पेन तथा मंडलब्राह्मणेन च । पवित्रैर्विविधैश्चान्यैर्गुह्योपनिष
दि तथा । जपयज्ञो हि कर्तव्यः सर्ववेदप्रणीतकैरिति । स्वशाखेति प्रायं । उपस्थानं स्वाके मंत्रेरादित्यस्य तु कारयेदिति वसिष्ठस्मरणात् । मध्याह्नसंध्यांगत्वेन गायत्र्या जपितेन च यथासंख्येन ।२१।
जप्येन रुद्रो मे प्रीयतामिति । अथ क्रमप्राप्त सायंसंध्याविशेषः । संकल्पावाहनाचमनोपस्थानजपनिवेदनेषु तद्यथाद्येत्यादि इत्युक्त्वा अद्य ब्रह्मा साय संध्योपासनमहं करिष्ये । वृद्धां सरस्वतीं कृष्णां

पीतवस्त्रांचतुर्भुजां। शंखचक्रगदापद्महस्तां गरुडवाहिनीं। बदर्याश्रमवासां तामायांतीं सूर्यमंडलात्। सामवेदस्तुतां श्यामां वनमालाविभूषितां। विष्णुबीजं हरां शांतां देवीमावाहयाम्यहं।
(अग्निरूपमिति नारायणऋषिः अग्निर्देवता अनुष्टुप्छंदः आचमने विनियोगः। इमं मे वरुण श्रुधीति स्वतस्त्रिरुपस्थानं। अवृष्टिपस्थानं प्रातर्वत् सायंसंध्यांगत्वेतेन गायत्र्या जपितेन च।
यथासंख्येन जप्येन विष्णुर्मे प्रीयतामिति। नोदकस्थो जपेत्। आज्ञे गायत्रीं वेदमातरं। अविचारयमुखात्तस्मात्तस्मादुच्छाय तां जपेत्। उच्छायेतेन सायंसंध्याविषयं जपन्नासीत्। सावित्रीं जप्य
गातारकोदयादिति याज्ञवल्क्यस्मरणात्। मध्याह्ने तु योगी याज्ञवल्क्यो विशेषः। तिष्ठन्नुदित्यमालोक्य जपं कुर्याद्दिक्षु दक्षिणां। अन्यथा प्राङ्मुखः कुर्यादिति। अथ जपसंख्याविशेषः। यथाह म
नुः। ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत्। वानप्रस्थो यतिश्चैव द्विसहस्राधिकं जपेत्। योगी याज्ञवल्क्यः। पूर्वसंध्यां जपंस्तिष्ठेत्सावित्रीमर्कदर्शनात्। पश्चिमां तु समासीनः सम्यग्विभावना
त्। यक्षराक्षसगंधर्वा नाना सिद्धविद्याधरोरगाः। अरंति प्रथमं यस्मात्तस्मात्संध्यां कारयेत्तु नवत्र — बहसनपश्चिमावलोकयेत् तु उपाश्रितो न कुर्यादि न नग्नः प्रयातानरः। नापाश्रितो न जल्प
न् नप्रावृतशिरस्तथा। न पदा पदमाक्रम्य न चैव हि तथा करौ। न वासमाहितमनाः न च संश्रावयंस्त्यजेत्। बृहस्पतिः। मनःसंहरणं शौचं मौनं मंत्रार्थचिंतनं। अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः
। न क्लिन्नया साच्छलाग जपादीनाचरेद्बुधः। जपकालेन भाषेत स्नानहोमादिकेषु च। क्षीमासन्न वा पतन्नवौ डालपतितादिकान् दृष्ट्वान वा शुद्धपठैनं स्पृष्ट्वा तावस्त्रावाचाविष्णुध्याति। विविध जप
यज्ञो विशिष्टो दशगुणः। उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः। विनाशांगुष्ठं जपो यस्तु चलजिह्वा द्विजोत्तमः। उपांशुं न जपं प्राज्ञः मनसा मानसं बुधः। वसिष्ठः। मानसः शांतिके यस्तु उपांशुः पौ
ष्टिके स्मृतः। स शब्दश्चाभिचारोयं त्रिविधो जप उच्यते। गृहे तु शतकता संध्या प्रातर्नदीवत् स्थितानाधिकफलेति — वत्तु गोष्ठे दशगुणो न वै तु नदी तु शतसाहस्रं मनंतं शिवसन्निधौ। शातातपः। अनूतं
मद्यं गांधं च दिवा मैथुनमेव च। पुनाति वृषलस्यान्नं संध्या बहिरुपासिता। ब्रह्मपुराणे। अंगुष्ठेन जपेन्मोक्षं तर्जन्या चाभिचारकं। मध्यमा धनसंपत्तिः शांतिपुष्टिरनामिका। स्कंदपुराणे। सौवर्णराजतन्ना
ग्रंस्फाटिकं रत्नजं तथा। अरिष्टं पत्रजीवं च शंखं पद्मं तथा मणिं। कुशग्रंथिं च रुद्राक्षं उत्तमं चोत्तरोत्तरं। ब्रह्मपुराणे। अंगुलिणाममरं च्युत्वा परिभ्रष्टादिदानवा। निखिला ग्रंथिताश्चांगा अन्योन्यं दृष्टिवर्जिता। स
शतार्धं च शतायासुवुटिता ग्रथिता शया। त्रिसूत्रेण ग्रथिता पापं खंडयत्युरं तनी। पाखंडस्य पाखंडसंबंधिनी यर्थ्य। मालाकुरवप्रदा यिन्याग्रंथितानि द्यतं श्रुतिः। अष्टोत्तरशतं कुर्याच्छुभं पंचाशिकाथवा सप्तविंश
तिका कार्या नाता निवाध माहिता। उमासंवादे। उच्छिष्टो वा विकर्मस्थः संलिप्तः सर्वपातकैः। नासौ लिप्यति पापेन रुद्राक्षस्य तु धारणात्। स्फटिके पुत्रजीवे कोटिर्भवति वासनात्। दशकोटिसहस्राणि पद्म
रणाक्षे तत्फलं। लक्षकोटिसहस्राख्ये कोटिशतस्थ च। जपेतु लक्षत तत्स्थानात् कार्या विचारणा। योगी याज्ञवल्क्यः। अतवोष्ठे मालाया ऊर्ध्वं यत्नाच्च पाणिना। जपएव हि कर्तव्यः एकाग्रमनसा सुम
दा। पाणिरेखालिंपते गणनात्सत् प्रकारमाह। समेवा अनामिकायां मध्ये च मध्यायां च क्रमेण तु। तर्जन्यादिगता तत्र अक्षमाला करे स्थिता। अस्यार्थः। अनामिकामध्यरेखामादिं कृत्वा तदधःक्रमेण द्वौ द्वौ

नयाप

१२॥

णावर्तनिर्गच्छादिरखाश्रंतकर्त्तव्याइत्ययंकारस्थितास्नद्मालासवति मध्यमा दिव्यं सर्वजपकालेत्र वर्जयेत्॥ एर्णामेरुं विजानीयाद्दूषितं ब्रह्मणा स्वयं॥ तर्जन्या न स्पृशेन्मेरुं नखं पेन्न विधूयते॥ अंगुष्ठ
स्य तु मध्यस्थं परिवर्त्तं समाचरेत्॥ नार्द्रवासा जपं कुर्यात् ग्रामदानप्रतिग्रहं॥ सर्वं तत्राच्च संसेद्यं बहिर्जानु वयत्कृतं॥ अंगुष्ठाग्रेण यज्जप्तं यज्जप्तं मेरुलंघने॥ असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत्॥ यमः॥ जात
कस्तके वापि संध्याकर्म न संत्यजेत्॥ यस्मात्संध्यं तथा स्नानं सूतके नापि संत्यजेत्॥ शिवविष्णु॥ मनसोच्चारयेन्मंत्रान् प्राणायाम विसर्जनात्॥ योगीश्वर॥ संध्यास्नानं च जयोदिप्रः सप्ताहाद्दूर्ध्वं व्रजेत्॥ तस्मात्संध्यां
स्नानं च सूतके नापि संत्यजेत्॥ शिवविष्णुर्वनं दीक्षायस्यं चाग्निपरिग्रहः॥ श्रौतकर्माणि कुर्वीत स्मार्त्तः [illegible] हिनवमुयात्॥ सदस्य [illegible] वार्षिकं द्विजः॥ महतां पुण्येन सोमाज्ञा च सवार्द्धविमुच्यते॥ याधना
ति च दर्द्दं तत्तात्रीणि वर्षाणि मानवः॥ स ब्रह्मपदमस्येति वायुभूतः स मूर्त्तिमान्॥ एत दत्तरमन्तांच जपन्याहृतिपूर्विका॥ संध्ययोस्तयोर्विप्रो वेदपुण्येन युज्यते॥ समावर्त्तिर्मुनायेषां दशालिः प्राप्नुयाद्विधं॥ विज्ञान
यानु सहाद्वीनयात ईश्वरालयं॥ अष्टोत्तरशतं जप्त्वा पूर्वजन्मसागरान्॥ सर्वेषां स्ववपापानां संकरे समुपस्थिते॥ दशसाहस्रिकोत्या सा गायत्र्याः शोधनं परं॥ वायुस्तद्दोदिनं तिष्ठेज्जात्रिंनीवा प्रभुस्सूर्यदृक्॥ जप्त्वा स
हस्रं गायत्र्याः शुचिर्ब्रह्मवधादृते॥ न गायत्र्याः समो मंत्रो न तपो वेदिकात्परः॥ न वासुदेवात्परो देव इति व्यासः स्वयं ब्रवीत्॥ ॥ अथोपाकर्म॥ तत्र याज्ञवल्क्यः॥ ॥ अध्यायानामुपाकर्म श्रावण्यां श्रावणेन वा॥
हस्तेनोषधिभावे न पंचम्यां श्रावणस्य तु॥ अधीयं तत्र्यध्यायाचदा॥ तेषां संस्कारकं कर्मोपाकर्माख्यं तच्च श्रावण्यां श्रावण्यां पौर्णमास्यां कार्यं तस्मात्युक्तं श्रवणेन नक्षत्रेण यस्यां सा श्रावणी श्रव
णेन वा युक्ते हनि चौ लहरो न युक्तायां पंचदश्यां वा उपाकर्म कार्यं॥ अन्ये उद्धस्तेन युक्ते हनि वा पंचम्यां वेति व्याचक्षते॥ अथवा श्रवणशब्दः सप्तम्यर्थे एव प्रयुक्तः॥ एवं हस्तशब्दादपि श्रवणेन हस्ते
हस्तेन च इत्यर्थः॥ ओषधिभावः॥ ओषधीनां ब्रीहिप्रभृतीनां प्रादुर्भावः॥ अंकुरोदय इति सावं॥ एतच्च विशेषणं श्रावणस्येति॥ सर्वैः संबध्यते॥ तदाओषधिप्रादुर्भावासंभवे ग्रहणसंक्रांत्यादिना भाद्रपदपौष
मास्यादिषु कार्यं॥ तथा च मनुः॥ श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि॥ युक्तश्छंदांस्यधीयीत मासान्विप्रोर्द्धपंचमान्॥ अर्धपंचमा मासा येषां ते तथोक्ताः॥ उपाकर्म प्रभृति अर्धसहितांश्चतुरो मासान्॥ उक्तं च
स्वपक्षे तु स्वाध्याय यदितं तु स्वाध्यायमधीयीतेत्यर्थः॥ एतच्च ग्रहणाध्ययनं गृहस्थस्यापि भवति॥ तथा च शौनकः॥ समाप्ते ब्रह्मचारी कल्पेन यथान्यायमितरे जायोपात्य कइति इतरे ब्रह्मचारिणः॥ जायोपेय
गृहस्थः॥ अपिशब्दाद्भाद्रपदश्रवणहस्ते पंचमी मात्र संग्रहः॥ तथा वाव हवाग्रस्य परिशिष्टकारिका॥ अर्धावध्ययनस्तस्मिन्मासे तु न स्तवं तिष्ठेत्॥ तदा भाद्रपदे मासि श्रावणेन तदिष्यते॥ गोभिलः॥ प्रौष्ठपदी
हस्तेनोपाकरणं प्रौष्ठपदी प्राप्ते इत्यर्थः॥ शौनकः॥ तद्वार्षिकमित्येतदा च क्षतइति॥ वर्षाकालेसतं वार्षिकं॥ बौधायनः॥ श्रावण्यां पौर्णमास्यां प्रोष्ठपद्यां वोपाकृत्या छंदांस्यधीयीतेति निगमः॥ श्रावण्यां श्रावणीकर्म
यथाविधि समाचरेत्॥ उपाकर्मत्रिकर्तव्यं कर्कटस्थे दिवाकरे॥ हस्तेन शुक्लपंचम्यां श्रावण्यां श्रवणेन वेति॥ अत्र स्वस्वगृह्यानुसारेण व्यवस्थेति साधारण निर्णयः॥ तत्रापि ऋक्शाखिनां श्रवणायुक्तं॥ शाखिनां पौ
र्णमास्यां तु आपितैत्तिरीयाणां मध्यमादयि के पर्वणि इहरेषां तु पूर्वविद्धे पर्वणि॥ सामगानां तु हस्तो॥ अयं च निर्णयः॥ श्रवणादि प्राधान्या निर्देशा उच्यते॥ असति ग्रहसंक्रांत्यादि रूपप्रतिबंधे श्रावणमास्येवात्रा
नु:

॥१२॥

प्रतिबंधे प्रोष्ठपद्यां वा तत्रापि प्रतिबंधसंभवे यदि स्वशाखायां शृंगग्राहिकतया निषेधस्तदा सर्वशाखाधिकरणन्यायेन कर्मण एकत्वात् बौधायनोक्तत्वेन प्राक्कर्म विरोधि यदि इति वचनात् आषाढ्यां
पौर्णमास्यां यजुःशाखिनां भवति बह्वृचानां सामगानां चाषाढस्य श्रवणे हस्ते न तत्र योनित्वं भवति। कस्मिंश्चिदपि कुशाखाविशाखे सामशाखाविशाखे वा आषाढमासे विधिदर्शनात्। शिष्ट
परंपरायाम् अश्रुतत्वाच्च कालदृष्टावप्युपाकर्मादि कर्म भवति। यदाह कात्यायनः। उक्तकर्षः कालदृष्टौ स्यादुपाकर्मादिकर्मणि। अस्तेषे कादिदिवसानां न वा कृर्षेयुगादिषु। यत्तु तत्र स्मृत्यंतरवचनं॥
दशासहस्रांतु नोत्कर्षस्तु वर्षांसि युगादिषु। उपाकर्मणि चोत्सर्गे छंदोगविषयं यतः कालदृष्टोपि यत्र लंघसिंहार्कि एवोपाकर्म तथाच गार्ग्यः। सिंहरवौ प्रथम्ये द्विस्वर्क्षे विचरेद्धरिः। छंदोग
मिलिताः कुर्युरुत्सर्गं स्वगृह्योक्तं दशा। स्वस्वरौ ... हस्तेन उपाकर्मीपराह्णिकमिति सिंहे च वा उपाकर्म पुष्यार्केण तात्त्वुन मिथर्षस्तु च यः। अत्र च कत्र्विद्यानामाह कात्यायनः। उपाकर्मणि
चोत्सर्गे यथाकालं समेत्य च। ऋषीन् दर्भमयान् कृत्वा पूजयेत् तर्पयेत्ततः। बृहस्पतिः। तवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु। ब्राह्मणान् भोजयेत्तत्र पितृनुद्दिश्य देवताः। बौधायनः। गो
तमादीनृषीन् सप्त तथा दर्भमयान् पुनः। पूजयित्वा यथान्यायं पूजयेद्भक्तिपूर्वकं। तमादीनिति स्वस्वशाखोक्त ऋषिप्रदर्शनार्थं पूजयेदिति। तर्पयेदिति स्वं ऋग्वेदं पूजयेत्। तथा चाह
रत्येवेत। एतच्च वेदांतराणामपि प्रदर्शनार्थं। न विप्रो नरउराणो। अप्राप्ते श्रावणस्यातपौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः। ततो देवान् पितृंश्चैव तर्प
येत्परमोत्तमा। उपाकर्मादि विधौ च ऋषीणां च तर्पणं। कुर्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य शक्तितः। अप्राप्ते श्रावणस्यात इति शुक्लप्रतिपदादिमासादिप्रायेण। संप्राप्ते श्रावणस्यांतश्च
विपाकात्तदक्षा प्रतिपदादि मासादिप्रायः। हिनोदय इति दक्षिकाप वसिष्ठायां एतच्चातैत्तिरीयाणामेवात तथा बह्वृचपरिशिष्टकारिका। पर्वण्योदयिक कुर्युः श्रावणीं तैत्तिरीयकाः। बह्वृचाः श्र
वणे कुर्युर्ग्रहसंक्रांतिवर्जिताः। इति तैत्तिरीयव्यतिरिक्तैर्यजुःशाखीयैः पूर्वविद्धैव पौर्णमासी ग्राह्या। श्रावणीदुर्गनवमी ह्यवालिवृक्तशनी। पूर्वविद्धा उ कर्तव्या शिवरात्रिर्बलेर्दिनं इति स्मरणात्।
न चैतदुपपन्नं। तदनुवादे नाहि तैत्तिरीयकाः। कर्तव्या विधीयंता तत्रापि च वाक्यस्य दप्रसंगः। किं च पुंश्चदयिकस्यास्याप्राप्तत्वादनुवादोपि न घटतां नापि तैत्तिरीयकरूपकर्तृविधिः। न हि कर्मणि कर्तृविध
नं व्यपितु कर्ध्वद्वि कर्म विधीयतां। किंच बह्वृच गृह्ये एवोपाकर्मणः। तत्कालस्य पौर्णमास्या स्वविधानात्कारिकायामंगस्य पौर्णमासीकालस्यौदयिकस्य संबंधो विधेयः। तथांगरूपकर्तृणां तैत्तिरीय
काणामपि मोदयिकत्वे नापरः संबंधो विधेयः। संबंधद्वयस्याप्यप्राप्तत्वात्। तथाच वाक्यभेदः परिहारो वाक्यभेदः। प्राप्ते कर्मण्यनेक गुणविधानात् नावारुणी कहात्मीन्यायेन पाक्षिकाः चयः। कर्मणः प्राप्त
त्वाद्द्व्यगुणरूपत्वासावानुतत्र्या नुष्टुप्यंगुणाद्व्यरूपगोभारायोमक्रमाणात्रपसुत्यात। अत्र तु ते तैत्तिरीयकरूपकर्तारं औदयिकं चेत्युभयं परस्परनिरपेक्षांगं। न च निरपेक्षयोर्गुणयोर्मिथः सं
बंधः गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादिति सूत्रकारवचनात्। कर्तृ अंशोपि च मुपदिष्टं गुणादधिकारे हि यजेष्ठ कर्तृः। शाखस्यार्थे च्यत इति। तस्मात् तैत्तिरीयकापदं हि विरुद्धत्वबहूपलक्षणं।
अत एवानुवादः। तथा त्वोदयिकत्वमात्रं विधेयमिति तैत्तिरीयकव्यतिरिक्तानामपि यजुःशाखिनामौदयिक एव पर्वण्युपाकर्म प्राप्तं। श्रावणीदुर्गनवमीत्यस्य उ हिरस्याग्न्यपि विज्ञारोपणविषयः।

पाप

३२॥

या

उपाकर्मणि स्तु तमास्तु उदयिकं श्रावणी कर्मेति । एवं प्राप्ते तिथीयता न तावद्विशिष्टानुवादेनाकाङ्क्षेत् । अदे इष्टविशेषणविवक्षामेवाकाङ्क्षेदेन तत्र विशिष्टे देशे न सह देवो नक्षत्रात् । यदुक्तमौदयिकस्य
स्याप्राप्तत्वात् अनुवादान्न घटत इति तदयुक्तं । वाक्यान्तरेणौदयिकपर्वप्राप्तेः । तथा च स विषयान्तरे संप्राप्ते श्रावणस्यां तपौर्णमास्यां दिनोदय इति वाक्यतो वस्तु पूर्वमेव दर्शितं । तथा कालिकापुराणे ॥
चतुर्दश्यां समुत्पन्ना वसुरोमपुष्करतोविदांश्रीकुर्वंतः पद्मयानं क्रोजहतं । श्रुतीर्हत्वा तावसुरो दैत्यः पातालतलवासिनो । आहृत्य ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयं । स प्राप्तवान् श्रुती ब्रह्माय
र्वस्योदयिके तु नः । अतो नूतयतो तस्मिन्नुपाकरणमिष्यते । अमुख्यवर्जीयकालं विदाह रणशंकयेति । तस्मात् पर्वस्योदयिकत्वात् श्रावणीति निरीयकाः । इत्यत्रेति निरीयकार्कमाक्
यत इति न नाकाङ्क्षेत् । प्राप्ते कर्मणि गुणाय विधिः सावात् । न हि कर्मणि विधानमिति येता न अप्राप्तावाविधिः । अथ च कर्ट विशेषस्याप्राप्तत्वादुपपद्यते अपि च नुवादयपंच कर्मधास्तु चाकर्मवि
धीयते । कर्तुद्विज्ञान विधिपर्यवसानं न कर्ट विशेषणे वो अथ च विशिष्टविधिरेव कारिकायां न गृह्ये उपाकर्मादीनां विहितत्वेन प्राप्तत्वात् कथं विशिष्टविधिः । उच्यते । अथ कर्तृ तदन विशिष्य
विधानं यत्र । न च कामिरिका कारणे पाकर्मादि विहितं । अन्य यासकृन्मुखेदापत्तेः । न च सर्वशाखाधिकरणन्यायेन कर्मणः प्रसन्नस्यैकत्वात् विशिष्टविधेः गौरवप्रसक्त्यभावे निरीयकपदेन
कर्णाध्याय मुचितं । तथा सतिति निरीयकपदस्य विनष्टापत्तेः । तथा हि पर्वस्यौदयिके श्रावणीं कर्मुरित्ये तावता सार्वधर्मप्राप्तत्वात् निरीयकपदं व्यर्थमेव । किं च विशिष्टविधिगौरवस्य याद्दृशाणां
कारे अनवस्थाप्रसज्यते । तदुक्तं नागानामिष्टः संबंध इति तदापन्ने । कर्ट विशेषस्य कालकाद्धामोदयिकस्वरूपकालसंबंधे प्रपत्तेः । न सार्यनियमः । द्रव्यगुणयोरारवसंबंध इति । अद्रव्यगुणयोरपल
चावास्ससंबंधयत्नः । पर्वणि हस्तानां बहवृचपदे पि समानवादपि विवदितमेवा । तस्मात् निरीयकार्द्धउदयिके पर्वणि त्वे निरीयकव्यतिरिक्ते तरयजुःशाखीयानां पूर्वविद्धेव पौर्णमासी । बहवृचानां अ
वर्णणएवेति सिद्धं । तत्र श्रवणनक्षत्रमुत्तराषाढाविद्धं न ग्राह्यं । तथा च वृद्धव्यासः । श्रवणेन तु यत्कर्म उत्तराषाढसंयुतं । संवत्सरकृता धीयानस्तत्क्षणादेमनश्यति । धनिष्ठासंयुतं अध्याय श्रावणकर्मयद्भवेत् । तत्कर्म
सफलं विद्यादुपाकर्मणि संशितमिति । ते निरीयशाखिनां बहवृचानां सामगानां चोदयिक एव हस्ताकालो न वति । तथा च परिशिष्टे । धनिष्ठा प्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितं । श्रावणं कर्म कुर्वीरन् ऋग्यजुः
सामपाठकाः । धनिष्ठायुक्तं श्रवणं श्रवणनक्षत्रं प्रतिपद्युक्तं पर्वविनायुक्तं हस्तनक्षत्रं । वेदत्रय इष्टिकोत्तेय इति स्मरणात् । एतच्चोपाकर्मग्रहणादिरहितकार्यं तथा च स्मृत्यंतरे । उपाकर्म प्रकुर्वंति क्रम
साम ऋग्विदः । ग्रहणसंक्रान्तियुक्ते पूर्वं सस्य श्रावणपर्वस्तु । तथा संक्रान्तो ग्रहणे वैव स्मृतं कृतकेतथा । गणास्नानं न कुर्वीत नारदस्य वचो यथा । अथ वेदोषसंयुक्ते पर्वणि स्यादुपक्रिया । इः स्वशाखामयग्रस्ता
राष्ट्रतस्मिन्द्विजातयः । तथा । यदि स्याच्छ्रावणं पर्व ग्रहसंक्रान्तिदूषितं । स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु । शुक्लपंचमीति वाजसनेय विप्राय । तथा च स्मृतिमहार्णवे । संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां
दा भवेत् । उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति । तथा संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते । तन्मासे हस्तयुक्तायां पंचम्यां वत दिष्यात् । हस्तयुक्तायां अन्यस्यां तिथौ पंचम्यां वति विकल्पः । ननु पर्वणि ॥ ३२ ॥
ग्रहणे च चतुर्दश्यां श्रवणेनोपाकर्म कार्यं विधदोषसंभवात् । तथा च स्मर्यते । त्रयोदश्यादिनो वर्ज्यं दिनानां नवकं ध्रुवं । मांगल्येषु च सर्वेषु ग्रहणं चंद्रसूर्ययोः । तथा । यस्मादश्यां तृतीयां तावेधइ
यदा तु उत्तराषाढयुक्तं श्रवणं परदिने क्षयवशात् क्वचिन्न लभ्येत तदा श्रवणस्य धनिष्ठायोगवतो मुख्यकालत्वेनाम्नातत्वादुत्तराषाढयुक्तेपि तस्मिन्नेव दिने कार्यमिति गदाधर :

×तन्मासेर×

26

ग्रहे स्मृतः।। एकादश्यपादिकाः — रिश्च वर्ज्यतः प्रकीर्तितः।। खंडग्रहतया प्रोक्ता श्रुतं यत्र दिनद्वयमिति। दिनद्वयं इत्येतावत्।। तत्तूरं। निरयनैमित्तिकजपहोमयज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे
र्गीग्रहवेक्षेन विद्यत इति। न दोषः। गुरुशुक्रास्तमयादिष्वपि उपाकर्मादिवचनेभ्य इति। तथा मयमतिप्रायः। विद्यारंभे गुरुशुक्रयोर्मौढ्यादिषु निषिद्धः। उपाकर्म विवदारं तद्रूप
तत संस्थामापाकर्म लिंगुरुशुक्रास्तमयजाग्राडुपाकर्म न कर्तव्यं। अन्यत्र दोष इति।। ।।अथोत्सर्जनं।। ।।तत्र याज्ञवल्क्यः।। ।।पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलांते
छंदसां कुर्यादुत्सर्गं विधिवद्बहिः।। रोहिण्यां शुक्लायामन्यस्यां तिथौ रोहिण्यां शुक्लायामष्टम्यां कायां तस्मा अष्टम्यां वा। बहिः। ग्रामाद्बहिः। जलसंनिधौ। अन्वष्टकादसासु सर्जनं न सवत्तिमना।
अत एवमनुः। अत्रैव। परंतु छंदांसि सिद्धे लोपुप्रयतः पर्वेतु। वेदांगानि रहस्यं च कृष्णपक्षेषु संपावतात्। तथा पुष्ये तु छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः।। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथ
मेहनि। श्रावण्यामुपाकर्म तद्दिने पुष्ये वा सर्जनं। यदा तद्दृष्पदे तदा माघशुक्लप्रतिपदि। हारीतः। अर्धपंचमान्मासानधीत्योत्सृजति पूर्वाह्णेषु चेति। अर्धपंचमान् पंचमासा
न्वेचयर्थः। अयं च पक्षः आषाढपौर्णमास्यामुपाकर्मेति प्रायः। अथ वेदव्रतानि एतान्युदगयन आपूर्यमाणपक्षे प्राजापत्याग्नेयवैश्वदेवसौम्यानि कुर्यात्तु प्राजापत्यादिस्व
सूत्रप्रवचननिमुपलक्षणार्थं। अतः स्वस्वशाखाविहितव्रतानि कर्तव्यानि। अत्र कालविशेषमाह गार्ग्यः। वेदव्रतानामुदगयनादिकाल इति। आदिशब्दादापूर्यमाणपक्षो पुप
यत्र। यदाह। स एव। पर्वसूदगयन आपूर्यमाणपक्षस्य चोदगयन इति। दक्षः। स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च। ब्रह्मचारी न वा वैदर्थं स्नातास्तवे वदतीहि इति। गौतमो
पिगर्भाधानपुंसवनसीमंतोन्नयनजातकर्मणामकरणान्निष्क्रमणान्नप्राशनचूडोपनयनं चत्वारि वेदव्रतानि इति। ब्रह्मचर्यं तत्कालावधिमाह देवलः। अतः परमष्ट
चत्वारिंशद्वार्षिकी तद्व्रतचर्यामिति षट्त्रिंशातिचेत्सद्विंशाद्वार्षिकी वा चतुर्विंशति द्वादश वा प्रतिवदमिति। मनुः। षट्त्रिंशदाब्दिकं चार्यं गुरौ त्रैवेदिकं व्रतं। तदर्धिकं पादिकं वा ग्रह
संधा — चेति। अस्यार्थः। त्रिवेदा एव त्रिविद्यं वेदत्रयविषयं। ब्रह्मचर्यं षट्त्रिंशदाब्दिकं कार्यं प्रतिवेदं द्वादशवर्षाणि ब्रह्मचर्यं चरेदित्यर्थः। अर्धिकं अष्टादश वर्षाणि। पादिके नव नीणि इति
एवमुपनीतं तल्लांडोपनीतं युक्तप्रतिकारणां माणवकं मधमस्पर्ये तु याज्ञवल्क्यः। उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकं। वेदमध्यापयेदेनमिति। तत्र यदा ऋग्वेदमारभेत तदास्व
गृह्योक्तविधिना प्रतिष्ठाप्य पृथिव्यै स्वाहा। अग्नये स्वाहेति आज्याहुतीर्हुत्वा ब्रह्म मतिष्ठं दास्यच्छया द्यानवाहुतीर्हुत्वा ग्रंथं समापयेत्। यदि यजुर्वेदं तदांतरिक्षाय स्वाहा। वायवे
स्वाहा। यदा सामवेदं तदा दिवे स्वाहा सूर्याय स्वाहेति। यदाथर्ववेदं तदा दिग्भ्यः स्वाहा चंद्रमसे स्वाहा इति विशेषः। यद्येकदेव सर्ववेदारंभो तदाज्यभागानंतरं प्रतिवेदं पूर्वोक्तमधा
नाज्यतिद्वयं हुत्वा प्रजापतये स्वाहा। देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये। अनुमतये स्वाहेति सप्ताज्याहुतीर्जुहुयात्। अनंतरं महाव्याहृतिभिः स्विष्टकृद्वाद शाज्याहुत्या
ध्यायं समाप्य यथाविधि वेदमध्यापयेत्। तत्रापि माणवकं कुलपरंपरया प्राप्तं वेदमध्यापयेत्। तस्यैवाध्ययननियमात्। वसिष्ठः। पारंपर्यागतो येषां वेदः सपरिबृंहणः। तच्छाखं कर्म कुर्वी

स्तनपा०

१४८।

ततश्छाखाध्ययनं तथेति। शाखाध्ययनानंतरं शाखांतराध्ययनमपि भवति। तथा च वसिष्ठः। अधीत्य शाखामात्मीयामन्यां शाखां ततः पठेत् इति। आरंभश्चाध्ययनस्य दिनादौ कार्यः। त
था च ज्योतिः। शाखा विद्यारंभः प्रशस्तो भवति मधुरिपौ प्राप्तबोधे सुधांशौ शस्ते तीक्ष्णांशुनोच्चविदशापति गुरौ भुक्ते वा प्रियर्क्षे। अप्राप्ते सिंहराशौ दशवातत्रिरावाचापि दिव्याति
स्वाध्याये सानुस्त्र कविदश गुरुर्दिने लग्नसंस्थे च जीवे। षष्ठीप्रतिपदं चैव वर्जयित्वा तथाष्टमीं। रिक्तां पंचदशीं चैव सौरभौमौ दिनौ तथा। विद्यारंभः सुरगुरुसितशेषसौम्यवा
पीक वर्षास्तु शिरमपि करोत्युत्तमान्मध्यमौ च नोहारौ शौनवृत्तिजडतापं च तासु मिथुने छायासूनावपि वसुनयां कीर्तयेच्चैवमाद्याः। हस्तादि पंच स्वपि सेषु मूल हस्तादिके चाश्वि
तये चित्रासु पूर्वात्रितये च श्रवणे च तद्विद्यासमारंभमुशंति सिद्धौ। अथाध्ययनविधानादयः। याज्ञवल्क्यः। गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः। अध्येष्यमाणस्त्वाचांतो यथा
शास्त्रमुदङ्मुखः। प्रांजलिस्तु ततोऽध्याप्यो लघुवासा जितेंद्रियः। ब्रह्मारंभेऽवसाने च पादौ ग्राह्यौ गुरोः सदा। अनध्यायेन सततं पूर्वं पुरस्ताच्च विशीर्यते। प्रांजलिः पर्युपासीत पवित्रैश्चैव पा
वितः। प्राणायामैस्त्रिभिः पूतः — ओंकारमर्हतीति मनुः। अध्येष्यमाणस्य गुरुर्नित्यकालमतंद्रितः। अधीष्व भोः इति ब्रूयाद्विरामोऽस्त्विति वारमेत्। नादितागुरुणा नित्यमज्ञणो द्विज एव वा।
ऽयदि ध्ययने योगमाचार्यस्य हितं प्रति चरेत्। द्वितीयं तु तथासांगो वेदाभ्यासो विधीयते। वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा। म
नुः। नित्यमुद्धृतपाणिः स्यात् स्वाध्याये चैव संयतः। आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः। हीनान्नवस्त्रवेषः स्यात् सर्वदा गुरुसंनिधौ। उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत्। याज्ञवल्क्यः। शिष्यः। हस्तौ सुसंयतौ धार्यौ जानुभ्यामुपरि स्थितौ। गुरोरनुमतं तिष्ठेद्वर्जयन्नान्यमति सर्वतः। शरीरं चैव वाचं च बुद्धींद्रियमनांसि च। नि
यम्य प्रांजलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखं। पाणिनीयशिक्षायां। हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितं। ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति। पराशरः। ज्ञातव्यः सर्वदेवार्थो विदानां कर्मसिद्धये। पाठमात्रमधीयीत पंके गौरिव सीदति। व्यासः। वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चैव हि।

पा०२५

अजानतोऽर्थं तत्सर्वं तुषाणां कंडनं यथा। मनुः। ब्रह्म तत्त्वाननुज्ञातमधीयानस्तदाप्नुयात्। स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते। गुरोरनुपतिं तस्य वेदाध्ययनमारभेत्। अध्यापयेन्नतं
शिष्यान्न्यायशीलान् गुणान्वितान्। याज्ञवल्क्यः। कृतज्ञोऽद्रोही मेधावी शुचिः कल्यनसूयकः। अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः। एते अध्याप्याः इति ग्रहणात् एतद्व्यतिरिक्तानां निषेधः। म
नुः। धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा। तत्र विद्या न दातव्या शुभं बीजमिवोषरे। विद्ययैव समं कामं कर्तव्यं ब्रह्मवादिना। आपद्यपि हि कष्टायां न त्वेनामिरिणे वपेत्। विद्या ब्रा
ह्मणमित्याह सेवधिस्तेऽस्मि रक्ष मां। असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा। निबंधनीशाविधिरिच्छमरो। असूयकः। गुणानाविष्कारेण दोषाविष्करणशीलः। यमेव तु शुचिं विद्यान्नियतं ब्र॥ १४८।
ह्मचारिणं। तस्य मां ब्रूहि विप्राय निधिपायाप्रमादिने। न निंदाताडने कुर्याच्छिष्यं पुत्रं च ताडयेत्। अधोभागे शरीरस्य नोत्तमांगे न वक्षसि। अतोऽन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषं। न्यायमुक्तोऽद

द्याः ॥ सर्वधर्ममयं ब्रह्मप्रदानेभ्योत्तरायणे ॥ तद्दानात्समवाप्नोति विष्णुलोकमविच्युतं ॥ ॥ अथानध्यायाः ॥ तत्र उशनाः ॥ ॥ ॥ अयने विषुवे चैव शयने बोधने तथा । अनध्यायं प्रकुर्वीत
मन्वादिषु युगादिषु । याज्ञवल्क्यः ॥ त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु । उपाकर्मसु चोत्सर्गे स्वशाखश्रोत्रिये मृते । पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके । ऋतुसंधौ च भुक्त्वा
व श्राद्धिकं प्रतिगृह्य च । संध्यागर्जितनिर्घातभूकंपोल्कानिपातने । समाप्य वेदं द्युनिशामारण्यकमधीत्य च । पशुमंडूकनकुलश्वाहिमार्जारमूषकैः । कृतेंतरे अहोरात्रं शक्रपाते तथोच्छ्र
त्याः ॥ अत्र विरोधस्तु शिष्टाचारादवगंतव्यः ॥ श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिःस्वने ॥ अमेध्यशवशूद्रांत्यश्मशानपतितांतिके । देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे । भुक्त्वा
र्द्रपाणिरंभोंतरर्धरात्रेतिमारुते । पांसुवर्षे दिशां दाहे संध्यानीहारभीतिषु । धावतः पूतिगंधे च शिष्टे च गृहमागते । खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे । अष्टत्रिंशदनध्याया
नेतांस्तात्कालिकान्विदुः ॥ ब्रह्मांडपुराणे । रात्रौ यामद्वयादर्वाक् दिनस्य प्रथमोदये ॥ प्रदोषः स तु विज्ञेयः सर्वाध्यायवर्जितः । षष्ठी च द्वादशी चैव अर्धरात्रादनंतरं नाडिका ॥ प्रदोषेनध्यायी
यीत तृतीयानवनाडिका ॥ अष्टमी हंत्युपाध्यायं शिष्यं हंति चतुर्दशी ॥ अमावास्योभयं हंति प्रतिपद्बुद्धिनाशिनी ॥ अष्टकासु समाख्याता सप्तम्यादि दिनत्रयं । शास्त्रं तत्र तथाधीयीत व्रतबंधं
विवर्जयेत् ॥ मनुः ॥ वेदोपकरणे चैव स्वाध्याये चैव नैत्यके । नानुरोधोस्त्यनध्याये होममंत्रेषु चैव हि ॥ अथ गुरुकुलवासचर्या ॥ ॥ तत्र मनुः ॥ शरीरं चैव वाचं च बुद्धींद्रियमनांसि च । नियम्य प्रां
जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखं । प्रतिश्रवणसंभाषे छयानो न समाचरेत् ॥ नासीनो न च भुंजानो न तिष्ठन्न पराङ्मुखः ॥ कथं कुर्यादित्यत आह । आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः ॥
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः ॥ पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चांतिकं । प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥ अतिगच्छंतमनुगच्छेदित्यर्थः पश्चाज्जमेनोद्र
णमात्रं शयानस्य निदेशे चैव तिष्ठतः । [illegible] दोषः — परे निशायां नवा स्वनिर्यस्या
त्ति संबध्यते । नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसन्निधौ । [illegible] गुरोर्यत्र परीवादो निंदा वापि प्रवर्तते । कर्णौ तत्र
पिधातव्यौ गंतव्यं वा ततोन्यतः । नोदाहरेदस्य नाम परोक्षमपि केवलं । न चैवास्यानुकुर्वीत गतिभाषितचेष्टितं । [illegible] नार्चयेदेनं कु
रुसंनिधौ । गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत् । नोदाहरेदस्य नाम परोक्षमपि केवलं ॥ परिभोक्ता कृमिर्भवति । कीटो भवति मत्सरी ॥ अननुज्ञातगुरुर्नोपसेतास्य परिस्तोता । [illegible] प्रत्यासीत तु खवातः प्रति
परीवादात्खरो भवति श्वा वै भवति निंदकः । प्रतिवाते तु वा सेवेत नासीत गुरुणा सह । असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् ॥ गोश्वोष्ट्रयानप्रासादसंस्तर
झीनातिक्रियाः । यानासनस्थश्चैवैनमवरुह्याभिवादयेत् । प्रतिवाते तु वा सेवेत नासीत गुरुणा सह । तत्रापि नासीत उदीरितशब्दश्रवणात् । असंश्रवे चानुज्ञायां ।
वातः ॥ तत्रासीत तन्मात्रादिति गमनसंगयात् ॥ शिष्यदेशात् गुरुदेशं प्रत्यनुगतो वातः अनुवातः ॥

पा०

१५८

शुकादेश्च ॥ आसीत गुरुणा सार्धं शिलाफलके नौ शय्यायां वा संनिहितगुरुवद्वृत्तिमाचरेत् । न वानिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् । गुरोराचार्यस्य समीपे गुरावुपाध्यायादौ सं-
निहितस्य तिगुरुवत्यां वृत्तिमाचरेत् । गुरुणा आचार्येणानुज्ञातः स्वान्गुरूनुपाध्यायपयन्तु गुरुसुतादौ गुरुवन्मानमर्हतीति । उत्सादनं तु गात्राणां स्नानं नोच्छिष्टभोजनं न कुर्याद्गुरुपुत्रस्य पाद-
योश्चावनेजनं । गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ॥ असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥ अभ्यंजनं स्नापनं च गात्रोत्सादनमेव च । गुरुपत्न्या न कार्याणि केशानां च प्र-
साधनं । गुरुपत्नी तु युवती नाभिवाद्येह पादयोः ॥ नवविंशतिवर्षेण गुणदोषौ विजानता ॥ यथा खनन्खनित्रेण नरो वार्यधिगच्छति । तथा गुरुगतां वि— शुश्रूषुरधिगच्छति ॥ अब्राह्म-
णादध्ययनमापत्काले विधीयते । अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥ ब्रह्मचारी द्विविधः उपकुर्वाणको नैष्ठिकश्चेति तत्राद्यो धर्मः । अथ द्वितीयधर्मः प्रस्तूयते । तत्र याज्ञव-
ल्क्यः ॥ नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसंनिधौ । तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा । उपकुर्वाणकस्तु विधिना आत्मानं निष्प्रमुक्तोऽतिकालं गमयतीति नैष्ठिकत्वात् । स आ-
चार्यसंनिधौ वसेन्न समावर्तयेत् । तदभावे तस्य वंशानुप्रज्यातात ततः सपत्न्यां सा वा गुरुसपिण्डे वसेत् । तदभावे त्वाग्निशुश्रूषा कर्तव्या । तथा च मनुः ॥ आचार्ये तु खलु प्रेते गुरुपु-
त्रे गुणान्विते । गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥ एतेष्वविद्यमानेषु स्थानासनविहारवान् । प्रयुंजानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥ अयं च वास अन्वान ब्राह्मणगुर्वादिष्वप्यदा-
ह मनुः ॥ न ब्राह्मणे गुरौ शिष्यो वासमात्यंतिकं वसेत् । ब्राह्मणे वानयाने का(?)क्ष्यार्थी तिम नु समामिति । अस्य धर्मानाह देवलः ॥ ब्रह्मसूत्राक्षमालादंडकाष्ठकुंडिकमौंजीमेखलाधारणं स्व-
ध्याजनमसकृदवगाहनं । असकृदवगाहनं त्रिषवणस्नानं । उत्सायकालमग्निहोत्रं संध्योपासनम् । श्मश्रुरोमकेशनखवर्जं गंधमाल्यस्नेहांजनाञ्जनवेषालंकारच्छत्रोपानहनलंघन
प्लवनधावनविक्रीडाज्योतिषवशगता वा शु विमंगलपौष्टिकशांतिककर्मगंधर्वसंघसमयबंधनशिलालेखनकारुकर्मीवक्रमदेत्र(?)द्व्यधनधान्यलोभपरिच्छदशास्त्रद्यूतव्यवहार
शताबलीलापरिहासप्रणयकुहकविस्मापनविडंबनविवादोत्क्रोशकपरिदेवनरोदनपादप्रक्षालनवर्जनमिति । अग्निपरिचर्याप्रकारमाह हारीतः ॥ प्राज्ञिया ॥ सविधः आहितः संमार्ज-
नोपलेपनोपसमूहनसमिंधनपर्यग्निकरणपरिक्रमोपस्थानहोमस्तोत्रनमस्कारादिभिरग्निं परिचरेदिति । एवं कुर्वतः फलमाह याज्ञवल्क्यः ॥ अनेन विधिना देहं साधयन्विजितेंद्रियः ॥
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥ तत्रेदं विवेक्तव्यं किमिदं नैष्ठिकब्रह्मचर्यं कुष्ठादिपुरुषविशेषाधिकारकं उत्तोपनियमात् अधिकारमिति । कुष्ठादिविषयतामिति । तावदुक्तः । विष्णुवेनि ॥१५॥
यतानिधनात्तु तथा हि । कुष्ठवामनजात्यंधक्लीबपंगुश्चाग्निताहितानां व्रतचर्यात्तिविशेषो यावज्जीवमनंसीत इति । अनंतरातः श्चातावानुद्यथा(?) विंवोपनीतमात्रविषयस्तेया वज्जीवमग्निहो-

तं डक्रयादिति। गृहस्थधर्मप्रतिपादिवाजासुतौ संकोचश्चापद्येता। एवं च प्रविधीयते। उपनीतमात्रविषयमेतत्। अन्यथा मनुवचनविरोधात्। तथाहि। यदि त्वात्यंतिको वासो रोचयेता

विगुरोः कुले युक्तः परिचरेदेनमाशरीरविमोक्षणादिति। अत्र यदाच्यनेन पाक्षिकत्वं द्योत्यते। विष्णुवचने यावज्जीवमित्यनेन पंचवादीनां नियमेन द्विगुवगम्यते। एवं च पंचवादिवि

षये मनुविष्णुवचनयोर्विरोधः। तत्परिहारायमनुवचनं पंचवादिव्यतिरिक्तविषयं। ततश्च पंचवादिव्यतिरिक्तोपनीतमात्रो मापाक्षिकमिति। पक्षे नैष्ठिकं च पाक्षिकत्वेनेत्ययमर्थ

सिद्धौ। एवं च केवलकृष्णादिविषयत्वविरोधे कः परिहारः स्यात्। यच्चोक्तं श्रुतिसंकोच इति तत्तु श्रुत्यंतरविरोधपरिहारार्थमिष्यामहे। मिच्छेत्तमावसेत् यदहरेव विरजेत्तदहरेव प्र

व्रजेदित्याद्यास्सलिकल्पप्रतिपादकवाक्याविरोधाय यावज्जीवमग्निहोत्रं जुहुयात् इत्यनेनाप्रियरागवशात्। ताताप यमात्मेषामे वरणानिवृत्तौ यावज्जीवगार्हस्थ्यं तिष्ठेन्ना

ग्निहोत्रकर्तव्यताप्रतिपाद्यते। ननु सर्वेषां अतो योरागातावेनति - तं ब्रह्मचर्यं कामयते तस्याग्निहोत्राधिकाराभावादेव न तद्विरोधः। यावज्जीवश्रुतिः प्रवृत्तेति। तथा च जाबालश्रु

तिः। यदि वेतरथा ब्रह्मचर्यं कामयेत तदा यावज्जीवमिति। केवलमेवं मन्येत नैष्ठिकचरस्मा [illegible] ब्धेन श्रौतानाग्निहोत्रादिना बाध इति। ननु स्वाध्यायाविच्छेदे न ध्रुवं निबंधने त्युपेक्षणीयं तस्मा

त्श्रुतिमूलत्वात् ब्रह्मचर्यस्तिष्ठेत्कुलवासी द्वितीयोत्यन्तमात्मानं मा चार्यकुले इवासादयन्निति हि श्रुतिः। ननु ब्रह्मवादिविधयत्वात् [illegible] आश्रमेष्वापस्तंबवचनविरोधः स्यादिति चेत्

मैवं। संकल्पितमात्रेण नित्यकाम्यादर्शपूर्णमासादिवद्दत्तदोषपत्तेः। तथा च दक्षः। द्वितीयात्तेष्ठिकस्य वृतस्मिन्नेवाश्रमे स्थित इति। अथ समावर्तनं। तत्र याज्ञवल्क्यः। गुरवे

तु वरं दत्वा स्नायीत तदनुज्ञया। वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा। ध्रियत इति वरः। तरणानंतरतात्पर्थः। वेदशब्दो वेदाध्ययनं न दर्शनजिज्ञासादीनामप्युपलक्षणार्थः। तथा

च स्मर्यते वेदस्वीकरणं पूर्वं विचाराध्ययनं [illegible] तद्दानं ते व विषयेभ्यो वेदाभ्यासो हि पंचधा। वेदस्याध्ययनं सर्वधर्मशास्त्रस्य वापि यत्। अजानतोर्थतः सर्वं डुष्प्राणांकंडनं यथा।

अधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत्। स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते। अधीत्य यत्किंचिदपि वेदार्थाधिगमे रतः। स्वर्गलोकमवाप्नोति धर्मानुष्ठानवान् द्विजः। सकृपाद

मप्यधीत्याताल्यायतस्तदर्थवित्। समस्त्व्रतानि संसेव्य समावर्तनमर्हति॥ ॥त्रिविधो हि स्नातकः॥ ॥तथा च हारीतः। त्रयः स्नातका भवंति विद्यास्नातको व्रतस्नातको विद्याव्रत

स्नातक इति। यो वेदमेव समाप्य समावर्तते स विद्यास्नातकः। यस्तु व्रतान्येव समाप्यासमाप्य स व्रतस्नातकः। यस्तूभयं स विद्याव्रतस्नातकः। एवं च व्रतस्नातकस्य विवाहानंतरकालमध्य

यनमसामर्ग्य वेदार्थज्ञानं चेति मंतव्यं। अस्मिन्पक्षे वेदाध्ययनसमाप्तावेव गुरवे दक्षिणां दद्यात्। तथा च गौतमः। विद्यांते गुरुरर्थेन निमंत्र्य इति। अर्थेनेति हेतुना निमंत्र्य प्रष्टव्यः।

31

स्नपा०

१६

यनुमनुज्ञातः स्नायादिति गुरुणाज्ञप्तः ब्राह्मणः पूर्वमर्थमाहरेदिति तच्च तस्मात्केन्तर विषयं गुरवे वरं दत्वा स्नायादित्युक्तं । निश्चित स्नानकर्मनियतं विरक्तस्य विवाहरागाभावात् ।
तथा च स्मृतिसिद्धपुराणे । गुरवे दक्षिणां दत्वा स्नायमिच्छेन्नमालिनेतु विरक्तः प्रव्रजेद्धि दासरागस्तु गृहे वसेदिति । एतच्च समावर्त्तनमुक्तदिनकार्यं तथा च सुदर्शनः । सोमसाउदे
त्यार्वतराग्रस्त्रे उजातादिने तारा वेड विशुद्धौ स्यात्समावर्त्तनक्रिया । अथ स्नातकव्रतानि तत्र पाराशरः । स्नातस्य यमान्वक्ष्यामः कामादितरान्नृत्तगीतवादित्राणि न कुर्यान्न ग
च्छेत् । कामं गीतं गायतीत्येवं गीतरमन्त इत्यरा । ह्नेमे न कुत्रामान्तरं न गच्छेन्न धावेदिति । ब्रह्मचर्यसमाप्तं तस्य यमान्वक्ष्यामः । कामात् इच्छानृत्यगीतवादित्राणि न कुर्यात्
न गच्छेद्द्रष्टुमिति निषेधः । इत तो ब्रह्मचारी । तान्यपि न कुर्यान्न गच्छेदित्येव इच्छया गायेत् शृणुयात् तु । यथा अश्वमेधे दिवा कर्णो गायेदिति यजमानं आवयतीत्यादि गाने श्रवणे वाधि
कारः । एवमन्यत्रापि यत्र विशेष विधिरस्ति तत्र वाधिकारो नान्यत्रेत्यर्थः । ह्नामसलिलं कुत्रामान्तरं गच्छेत् । ह्नेमे आपदस्तावसति । न च धावेत् । ह्नेमे सतीत्यनुपन्यता तथा । उद
पानावेक्षणात् क्षीरोद्दणायफलचयन संधि सर्पण विवृत स्नान विषयलंघन शुल्क वदन संध्यादित्यावेक्षणमात्मनी सेणं कुर्यात् । उदपानं कूपादि । वृक्षारोहणमुपरिगमनेन फलप्रच
यनं फलग्रहणं । संधिसर्पणं संधिं न मिगमनं । कर उत्करं । अमंगलसूचकं अश्लीलं वारं वारं । आदित्यं अमंडपेदित्यर्थः । तथा । न हविस्नात्वात्सिद्धेत्तु वर्षत्यप्रावृतो येन गच्छेत् । अयं
मेव ज्ञ इत्यनेन मंत्रेण गच्छेत् । छत्री मा ऊरि पाणिस्तु रात्रौ वेदन्त्रो तथा दिवा छायाराष्ट्रविन्न स्नातः प्रवाम्यतीति दिप्तनगाः । अप्रसु स्वं न माय चेगो गर्भिणी विजन्येति ब्रूयात् । सकु
लमिति न कुलं न गायमिति कपालं इन्द्रधनुर्मणिधनुरिति ब्रूयात् । परस्य गतां संवाप्यपायेयं तीन विक्षीन खानि तत्र गुणाह्न नेतूमौ सस्य वत्सं वा उक्ष सर्पं प्रलिच्छन्नं मूत्रपुरीषे कुर्यात्
स्वयं जीर्णं न काष्ठेन लोष्ठेन न प्रयुञ्जीत न गुञ्जां विहतां वासेनोच्छादयीत । तामं जिष्टादि रक्तं नील्यादि रक्तं वा हव्यं तो वधत्रः । स्यात् सर्वेषामिति । मित्रमिव वक्षस्तु न्यायत इति वधत्रे
इत्यादि वृत्तेन लोपः । एकरात्रं तिस्रो रात्रीर्विवक्षितं वरेतु । संवर्त्तः । कुर्यात् गृह्याणि कर्माणि स्नातायापाषणं परं । सत्तु कालातिगामी यास्यात् त्माक्षिप्रमंगतिं । त्रिषानमृत गामि चेतुपूर्वय
ज्ञाः स्वकर्मणि । उत्लोषु सह संबंधे गृहस्थस्य विधीयते । गृहस्थस्यापि स्नातकस्य च मत्तेति स्नातकस्य गृहस्थस्य साधारणधर्मकथनमविरुद्धं । हारीतः । सर्वासमृधि के कुर्यादुपेय
दाम्बरं सदा विरं निर्हेतुका वादं न कुर्यात् किन विस्तदः । वसिष्ठः । आहार निर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्याः । वाग्बुद्धिकार्याणि तपस्तथा वधनायुषी गुप्त तमे तु कार्यौ । निहारः
मूत्रपुरीषोत्सर्गः । विहारः स्त्रीसेवा । योगः समाधिः । वाग्गुप्तिः आलापादिपरिवर्जनेन । बुद्धिगुप्तिः रशुत संकल्पादि परिवर्जनेन । मनुः । नष्टं नष्ट मिति ब्रूयात् इष्टमित्येव वा वदेत् । शुष्कं वैरं

गु

१६

विवादं च न कुर्याद्धि केनचित्। विष्णुपुराणे। विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः। विवाहश्च विवादश्च तुल्यरूपैः प्रशस्यते। नारभेत कलिं प्राज्ञः शुष्कवैरं विवर्जयेत्। अल्पाहा
निस्सोढव्या वैरेणार्थागमं त्यजेत्। जीवेति क्षुते ततो ब्रूयाज्जीवेत्तु कासहेति च। पैठीनसिः। मत्तप्रमत्तोन्मत्तैः सह सार्धं न कुर्वीत न परस्त्रियं रहसि संलापयेत्। न स्नायान्न गृहे सूतिकादर्श
स्यां न संवदेत्। गौतमः। न म्लेच्छाशुच्यधार्मिकैः सह संलापेत संलाप्य — — सतां मनसा ध्यायेत्। ब्राह्मणेन सह संलापेत। यमः। तिथिं पक्षस्य ब्रूयान्न नक्षत्राणि निर्दिशेत्तु। गौतमः।
शंखलिखितौ। न परक्षेत्रे चरंतीं गां पाययंतीं वान्यस्मै कथयेत्। महाभारते। संपन्नं भोजने ब्रूयात् पानीये तर्पणं तथा। सुशृतं पायसे ब्रूयाद्यवागूं कृशरे तथा। महात्मनां च श्रेष्ठानि
न वक्तव्यानि कर्हिचित्। चकारं नामधेयं च ज्येष्ठानां परिवर्जयेत्। अवराणां समानानां उत्तरेषां न दुष्यति। तथा च नारदः। गुरोर्ज्येष्ठस्य कलत्रस्य स्वधर्मज्येष्ठस्य चात्मनः। आयुष्कामानय
कलीयान्नामानि क्षपणस्य च। पैठीनसिः। अग्निश्च ब्राह्मणा गावो वेदः काञ्चनं सलिलं स्त्रियः पृथिवी च षडेतानि यो निंदति स निंदकः। मार्कण्डेयपुराणे। वेद एव द्विजातीनां साधु तस्य तप
स्विनां। गुरोः पतिव्रतायाश्च तथा यज्ञशास्त्रतपस्विनां। परिवादं न परिहासेऽपि च त्वकाम कुर्वतामनितानां श्रोतव्यं न कथंचन। हारीतः। विवादं वर्जयेद्विप्रः सर्वेषां स्वेव सूक्तानां परिभोगयथानि
मसंयुक्तशिष्याप्यः। तथा। तस्मान्नैव परिवादश्चायं न वा गुरुमीश्वरं। आदरेषु च तं तथा ये विपरिवदंति तं। मनुः। ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः। बालवृद्धातुरैर्वैद्यैर्ज्ञातिसं
बंधिबांधवैः। मातापितृभ्यां जामिभिर्भ्रात्रा पुत्रेण भार्यया। दुहित्रा दासवर्गेण विवादं न समाचरेत्। न च वादं वदेद्दुष्टं नदीनां न च कर्कशां। अथ नाक्रमणीयान्यधिष्ठेयानि। तत्र मनुः। देवतानां
गुरोराज्ञः स्नातकाचार्ययोस्तथा। नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च। बभ्रुः कपिलः। येन स्पृष्टो न नाक्रामयेच्छायां क्लीबेन पतितेन च। चांडालेन द्विषद्वेश्यश्वनिर्यरोगान्वितेन वा। या
ज्ञवल्क्यः। देवर्त्विक्स्नातकाचार्यराजच्छायां परस्त्रियः। नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च। मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषं। संध्ययोरुभयोश्चैव न सेवेत चतुष्पथं। उद्वर्तनम
पस्नानं विण्मूत्रे रक्तमेव च। श्लेष्मनिष्ठ्यूतवांतानि नाधितिष्ठेत कामतः। वैरिणं नोपसेवेत साहाय्यं नैव वैरिणः। अधार्मिकं तस्करं च परस्यैव च योषितं। उद्वर्तनं कृतमलापकर्षणं कुंकु
मादि। अपस्नानेयता — — निष्ठ्यूतं गंडूषीर्णतांबूलादिशं खलिखिते। नोद्धतं कुहकैः सहैकत्र तिष्ठेत्। उद्धतः अविनीतः कुहकः वशीकरणादिनिष्ठः। विष्णुः। न चतुष्पथमतितिष्ठेत् न रात्रौ
वृक्षमूलं शून्यालयं। न रणे न बंधनागारं। हारीतः। आपवनायमार्जनापस्नानं उपसमाहृतकपालसंचयं नाधितिष्ठेत्। आवपनं गोप्यादिसांडं। अपमार्जनं मार्जनापयुक्तकुंकुमादि। क
पालः खर्परः। विष्णुपुराणे। नृपदेवद्विजज्योतिश्छायां नातिक्रमेद्बुधः। देवीपुराणे। न विवृगोऽप्रसूतायां विश्वसस्त्रीजनस्य च। न मुखेन धमेदग्निं न खड्गं लंघयेत्तथा। अथ नावलोकनीयानि।

दत्तपा० तत्र विष्णुः ॥ नाद्यात मासं न मिदियमिन्दुतानाय्यसंयां तं तापरकेन न वाससा तिरोहितं ॥ न वा दर्भजलाद्युपगतं न मध्ये क्रियात् याज्ञवल्क्यः ॥ न देतार्केन नग्नां स्त्रीं न च संसक्तमिथुनां न च मूत्रं पुरीषं वा
नाशु विरुद्धतारकाः ॥ मार्कंडेयपुराणे ॥ देवतापितृसच्छास्त्रयज्ञसत्यादिनिंदकैः ॥ कृत्वा स्पर्शनमालापं शुद्ध्यतेर्कविलोकनात् ॥ अवलोक्य तथोदक्यां नान्त्यां पतितं शवं ॥ विधर्मसूतिकाषंढवि
वस्त्रान्त्यवशायिनः ॥ मृतनिर्यातकांश्चैव परदाररतांस्तथा ॥ एतदेव हि कर्तव्यं प्राज्ञैः शोधनमात्मनः ॥ स्वं दोषमतमानवं दृष्ट्वा नरकेष्वपि ऊसितं ॥ शुद्ध्यर्थी दविजः स्वं ... ॥ सोमानुलदिवाक
१५ राः ॥ सोमादीनां यथासंस्तवाविकल्पः ॥ विष्णुः ॥ नक्षत्रस्य पुरोमुखं न तैलोदकयोः ॥ स्वां छायामनवद्यां दर्शनपत्नीसाजनसमये न स्त्रियं न ग्नां न किंचन ग्रहमाना न वालांतं प्रष्टं ऊजरं न च विषम स्त्रोत्रूषा
द्विमुखं नामत्तं नमत्तां मत्तः ॥ नाश्नीयाज्ञार्यया सार्धं निनामीहेतवाश्नतीं ॥ कुर्वतीं जृंभमाणां च नवासीनां यथासुखं ॥ नांजयंतीं स्वकेनेत्रे न चाभ्यक्तां मनावृतां ॥ न पश्येत्प्रसुवंतीं च तेजस्कामो द्विजोत्तमः ॥
अथाकुलकरणानि ॥ तत्र यमः ॥ शातातपव्यासाः ॥ देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च ॥ कुलान्यकुलतां यांति ब्राह्मणातिक्रमेण च ॥ यमः ॥ गोतिरश्चैश्वयानैश्च कृष्या राजोपसेवया ॥ अयाज्य
याजनैश्चैव नास्तिकेन च कर्मणा ॥ कुलान्यकुलतां यांति यानि हीनानि मंत्रतः ॥ मंत्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ॥ कुलसंख्यां च गच्छंति कर्षंति च महद्यशः ॥ अनृतं पारदार्यं च तथा
भक्ष्यस्य भक्षणं ॥ अगम्यागमनं चैव हिंसास्तेयं तथैव च ॥ अश्रौतकर्माचरणं मित्रेष्वधर्मबहिःकृतं ॥ एतानि षट् कर्माणि वर्जयेन्मानवः सदा ॥ अथानिवासाः ॥ तत्र बृहस्पतिः ॥ तत्र मार्कंडेये
धर्मेतिशिष्यात् द्विजनिगमानिःकंटकाश्रमिकस्य वसेस्थाने निरामये ॥ निगमो वाणिजकः ॥ एकश्लोके केग्रामे ब्राह्मणो वृषलीपतिः ॥ वर्षेणास्त्रज्ञोस्ववति राज्ञ वर्षमुपाश्रिताः ॥ व्यासः
धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः ॥ पंच यत्र न विद्यंते न तत्र दिवसं वसेत् ॥ मार्कंडेयपुराणे ॥ जितामित्रो नृपो यत्र बलवान्धर्मतत्परः ॥ तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतौ सुखं ॥
यस्मिन्रक्षा पिंगला राष्ट्रप्रायाश्चानाहिताग्निनः ॥ यत्रौषधान्यशेषाणि वसेत्तत्र विचक्षणः ॥ प्रीयमाननराय त्रयत्रये युरयाचितं ॥ स्वस्थचित्तो वसेत्तत्र तत्तत्र यद्वात्मवान् ॥ दंडो यत्र
विनीतेषु सत्कारश्चविनीतात्मसु ॥ चरेत्तत्र वसेद्यत्र धर्मशीलेषु साधुषु ॥ देवलः ॥ आरण्यं देवताच्छानं तीर्थान्यायतनानि च ॥ तस्मात्तेषु वसेद्विप्रो कान्यानिनाकदिवोकसा ॥ आरण्यं नैमिषादि
तीर्थं गंगादि ॥ आयतनं अविमुक्तादि ॥ गमने वज्यादीनि ॥ तत्र मनुः ॥ नाविनीतैर्भजेद्धुर्यैर्न च क्षुध्याधिपीडितैः ॥ न भिन्नश्रृंगाक्षिखुरैर्न बालधिविरूपितैः ॥ विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षण
न्वितैः ॥ वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशं ॥ नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते ॥ नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ॥ तथा गवां वजानं च पृष्ठेन सर्वथैव विगर्हितां ॥ १८
विष्णुः ॥ नेवाधूर्नं प्रपद्येत नाधार्मिकजनैः सह ॥ विष्णुपुराणे ॥ वर्षातिपादिकं छत्री दंडी रात्र्यनटवीषु च ॥ शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥ तिर्यगूर्ध्वं वाति ह्रन्नपर्यटन्बुधः ॥

युगमात्रं महापङ्कं न रोगच्छेद्विलोकयन्॥ नष्टानदुष्टं यानमारोहेत् कूलच्छायां न संश्रयेत्॥ निकषोत्पादं दवीं गच्छेन्नतु श्त्र्यगृहे वसेत्॥ तथा न — नासहायो व्रजेज्ज्ञातो नापथे न व्रजेत्पथे व
सिद्ध॥ नाब्राह्मणां तर व्यापयात्॥ नाश्मोर्नब्राह्मणायान्गुरु शिष्ययोः॥ अनुर्तया वाच्य पोपाव्रतेन बाहुभ्यां नदीतीरं तु॥ नानावं गाङ्गालिकीं न रोहेत्॥ अपस्कंदा॥ प्रतिमुखं मन्त्रिमाक्षि
प्रमाणप्रतिष्ठितं सूर्यं प्रदक्षिणीकृत्य॥ स्पृशेत्॥ ब्रह्मचारिप्रकरणे स्नातकप्रकरणे नव्वये साधारणधर्माः अतिहितास्ते अनिषिद्धा गृहस्थादीनामपि सर्वे ध्येयाः॥ उक्तं वस्त्रमा
णाश्रमापयोगित्वात्॥ ब्रह्मचर्यस्वरूपं तन्नह्निदक्षप्रदर्शितं॥ तत्र हारीतः॥ ब्रह्मचर्यं नाम प्रार्थनमस्मरणमसंकल्पनं एवं करिष्यामीत्यभिधानानावा॥ तच्च ब्रह्मचर्यं चतुर्थं न
स्वति॥ स्वर्णकलुषं विमलमिति॥ तत्र परदारवर्जनं नियमस्वदाराभिगमनं तम्॥ पर्ववर्जनं तदेव रक्षत्रृतुकालाभिगमनं श्रुतं॥ ऊर्ध्वरेतस्त्वं विमलं॥ कलेन मानयेल्लोकान्
धर्मं तरकाञ्जापत्॥ शुक्ले न तु जपेत् स्वर्गं विमलान्मोक्षमाप्नुयात्॥ इति॥ इह मदनपारिजाते मदनक्षितिपालदानजलरूढे॥ स्तबके यदाद्यमासीदामोदः॥ सम्यपंडितत्व
मराशमतिर्यथां शास्त्रप्रतिरमणीयायवति॥ परायणीलं श्लाघ्यं जगति स जवलोकतिपाय्या॥ विरंचिस्तेषां मुकुरतलसूते स्थितिमियादियं व्यासारस्य प्रवरमुनि शिष्य
स्य तनोति॥ ॥छ॥ ॥ इति पंडितपारिजातकपूरमल्लेय्यादिविश्वरंदराजीविराजमानस्य श्रीमदनपालस्य निबंधे मदनपारिजाताभिधेये प्रथमस्तबकः॥१॥ ॥ श्रीः ॥ ॥
अथ ब्रह्मचारिस्तबकानंतरं क्रमप्राप्तो गृहस्थस्तबक आरभ्यते॥ तत्रोपयुक्ता सपिंडमीमांसा प्रथमं प्रक्रम्यते॥ तत्र सापिंड्यं केचिदेवं प्रयंति॥ एकस्यां पिंडदानक्रियायां
दातृत्वेन यजमानस्य देवतात्वेन पितृपितामहप्रपितामहानां लेपभागित्वेन पितामहस्य पितृपितामहस्य च प्रपितामहानां यजमानादिसप्तानां पञ्चानां सह कर्तृत्वेनैक
शरीरारंभकत्वेन च॥ सप्तानां परस्परमेकशरीरारंभः॥ सहैकशरीरारंभकत्वेन च॥ यजमानप्रभृति पितृपरंपरायां सप्तमपुरुषावधिकसंततिजातानां मध्ये
केषांचित् पिंडदेवतात्वेनोद्दिश्यमानत्वेन केषांचित्लेपभाक्त्वेनोद्दिश्यमानत्वेन चोत्ते दातृत्वादिषु वा सापिंड्यविषये मस्य पुराणमप्युदाहरंति॥ लेपभाजश्चतुर्था
द्याः पित्राद्याः पिंडभागिनः॥ पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषम्॥ इति॥ पार्श्वद्वयोरपि मस्य परिष्कृतं॥ अनादाकृतायां मृतुतंतं पिंडं यदि गृह्णाति तदा अस्याः प्रजा अंतर्वत्नीत्वं विष्यतीति विद्यात्॥ एवंगो
ष्ठ्यादित्येवमादि वदिपुरीषं वदिम्लानिका॥ देवनं प्रतस्थानं विप्रवाजिनि विविधं प्रव्रजनेशीलस्वैरिणीतियावत्॥ इरिणिमूरखरं॥ अथ न्याधनरहितेत्यर्थः॥ अनन्यपूर्वि
कादानेनापत्नीगेन वा पुरुषांतरेण परिगृहीता असपिंडा समानः एकः पिंडः शरीरं यस्याः सा सपिंडा न सपिंडा असपिंडा॥ तां सपिंडत्वं चैकशरीरावयवानुयेनेति निरूपितं

च

दनपा०

८

माकुलमनुरपि असपिंडा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने। अस्यार्थः। या मातुरसपिंडा चकारादसगोत्रा च या
च पितुरसगोत्रा चकारादसपिंडा च सा दारकर्मणि मैथुने च प्रशस्ता। प्रशस्ता नाम न्याय्या हितैषिणी। एतदुक्तं भवति। अनुलोमक्रमेण द्विजातीनां सवर्णापाणिग्रहणसमनंतरमेवे
यादिकन्यकापरिणयो विहितः। तत्र सवर्णाविवाहं मुख्यादितरस्तु न कल्पः। सदारस्य विहितं कर्म द्विविधं पकंयज्ञादिकं। अपरं तु निधुवनं यज्ञादिकं तु सर्वं सदारैः सहितस्यैवाधिका
ः सवर्णायास्तु वयसः सा वर्णन्या ज्येष्ठेन धातव्या। सवर्णामन्यस्या अनधिकारात्। असवर्णा ज्येष्ठा यानि च यज्ञादिके विवासवर्णासहितस्य गौणाधिकारो न काम्येषु। तथा ज्येष्ठाप
रियागेनान्यग्रहणनिषेधश्च श्रुते न विवाहितस्य नियमः। एवं स्थित दारकर्मणि मैथुनश्च न गोब्लीवर्दन्यायेन दारकर्मशब्दो मैथुनव्यतिरिक्तयज्ञादिवर्त्तते। तथा च द
रकर्म प्रशस्तेति यज्ञादिकर्मणि सवर्णाया एव हि अधिकारात्। तद्विना हस्व असपिंडाय ब्रूमातुरित्यादिश्लोकस्यार्थः। तत्र सवर्णविवाहितं तन्निवृत्त्यर्थं मैथुनपदग्रहणं। एवं वा सवर्णा
परिणयेरि पूर्वो [illegible] क्रमनुपपज्यात। यदि मैथुनप्रशस्ता स्यात् तदा तस्मिन् कर्मणि पूर्वांकोआग्रहा नान्यत्रैव वर्ततिस्या [illegible] तत श्रुत श्रमीन तिष्ठे तन्नाम क्रमपि द्विज इति तत्समा
वर्त्तनस्य पंचमहायज्ञनित्योपासनादि दारकर्मणि। अयमर्थः पूर्वेणोक्तगारहितापि परिणयास्या नूतनमात्र इति दारकर्मग्रहणं। ननु च एक एव सगोत्रत्वं तस्तु पिंड गोत्रे च समूलक इति
मातुर्गोत्रे मातरास्तावाद सपिंडायामातुरित्येवं सोतो लोवालमिति चकारान्मातुरसगोत्राग्रहणं स्वतं मनुनाप्युक्तं। सच्यमेवं तथापि दत्तत्रिप्रतिष्ठ [illegible] इति सपिंडा असपिंडा सवेदी
तौ तत्रापरिणयत्मा मां प्रसाद्य इति चकारोऽम मात्रे सगोत्रपरिणयेऽप्युच्यते। उक्तं च बुदत्तमानां जनकगोत्राहितिहत्या अन्यगोत्रादिप्राप्निमनुना। गोत्ररिक्थे जनयितुर्न भजेद्दत्रिम
सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा इति। एवं तर्हि असपिंडाया मा [illegible] रिति न वक्तव्यं चकारेत्स्यासगोत्राग्रहणेनैवासपिंडाया अपि प्राप्तत्वात्। बाढं सापत्नमातृपितृ
कुलजा सपिंडमात्र सगोत्रापि सवति मात्र सपिंडा च रंतत्र विवाहप्राप्ताविदमुच्यात मातुरसपिंडेति तथा सापत्न्यामातुः सपिंडे च पि मातुर्ग्राहि व्यवहारं दर्शयितिसुमंतुः पितृप
त्न्याः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा संकरिकाः स्युरिति। असगोत्रा च या पितुरिति अत्र च कारण पितुरसपिंडाग्रहणं न कर्त्त
व्यं। असगोत्रापदेन व लब्धत्वात्। यस्य पितादत्रिमपुत्रस्तस्य दत्रिमस्य यज्ञानककुले तत्र जातापरिनेतृपितुरसगोत्रा दानेन जनकगोत्रं निवृत्तेरुक्तत्वात्। एवं विज्ञायापि
उरसगोत्राया विवाहप्रसक्तौ कारणे दसुच्यते। पितुरसपिंडाग्राह्येति। यद्विना सविष्यत इति असगोत्रा वयात्मक इति एवं स्वतंतस्मान्मातुरसपिंडा असगोत्रा पितुरसपिंडा असगोत्रा

२६

चपरिणोयात सिद्धां यवीयसीं वयसा प्रमाणेन वा अरोगिणी अविकित्सि आयाया व्याधिरहिता भ्रात्रमती पुत्रीकाकरणशंकानिवृत्तये अत्र मनुः। यस्यास्तु न भवेद्भ्राता
न विज्ञेयानां वा पिता। नोपयच्छेत तःप्राज्ञः पुत्रिकाधर्मशंकितो। नोपयच्छेदित्यर्थः। एवं च यत्र शंका नास्ति तामुपयच्छेतेत्यर्थ उक्तं भवति। असमानार्षगोत्रजां सवे
रिदमार्षं प्रवरमित्यर्थः। गोत्रं वंशपरंपराप्रसिद्धं आर्षं च गोत्रं च आर्षगोत्रे समाने आर्षगोत्रे यस्य स तादृशः तस्मादुत्पन्ना समानार्षगोत्रजा अनेवंविधा। असमानार्षगोत्र
जा। गोत्रं प्रवरस्य पृथक् २ पर्युदासनिमित्तं। परिणीय सगोत्रां तु समानप्रवरां तथा। त्यागं कृत्वा द्विजस्तस्यास्ततश्चान्द्रायणं चरेदिति। पार्थक्येनापि गणना तु। त्यागश्चोपभोग
स्यव न तु तस्याः। समानप्रवरां कन्यामेकगोत्रामथापि वा। विवाहयति यो मूढस्तस्यां यावत्त्यामि निष्कृतिं। उत्सृज्य तां ततो नार्यां मातृवत्परिपालयेदिति। शातातपस्मरणा
नु। आपस्तंबस्मरणाच्च समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च। तस्यामुत्पाद्य चांडालं ब्राह्मण्यादेव हीयते इति। ॥ समानप्रवरस्वरूपं च बौधायन आह। एक
एव ऋषिर्यावत्प्रवरेष्वनुवर्तते। तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरोगणात्। समानगोत्रत्वं समानप्रवरत्वमित्यर्थः। भृग्वंगिरोगणेषु विशेषमाह संग्रहकारः
पंचानां त्रिषु समानेषु स्यादविवाहस्त्रिषु द्वयोः। भृग्वंगिरोगणेष्वेवं शेषेष्वेकोऽपि धारयेदिति। पंचर्षीणामृषित्रयानुवृत्तौ न मिथो विवाहः आर्षेयाणामृषिद्वयानुवृत्तौ
न शेषेष्वेकानुवृत्तावपि न विवाह इत्यर्थः। बौधायनोऽपि। आर्षेयसंनिपाते विवाहस्त्वार्षेयाहनं आह संनिपतेर इति माधवः। डिंशंडवैगवादीनां गोत्राणामां
गिरसगोरिविनतां त्र्यर्षेतिप्रवरैक्यात् तथा यास्कवाधूलमौनमाकानां गोत्रभेदेपि। प्रवरैक्यमस्ति तद्यथा संकृतलमौनमाकानां गोत्रभेदेपि सार्गवीतहव्यसावे
दसेतिप्रवरैक्यात् तेषां मिथो विवाहो मनूक्तिदि समानार्षग्रहणं। यत्र तु प्रवरविकल्पः। यथा। आंगिरसांबरीषयौवनाश्वेति मांधात्रौ वरीषयौवनाश्वेति। तत्रास्ति प्रवरभे
दः। न च गोत्रभेदः। तन्निरासार्थं समानगोत्रग्रहणं। एवं प्रवरगोत्रयोः पृथक् २ पर्युदासनिमित्तं च विज्ञेयं। एवं साक्षात्परंपरया वा अन्वानुवृत्तेर्निर्मर्यादत्वात्सर्वत्र निषेधप्रा
प्तावधिमाह याज्ञवल्क्यः। पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा। मातृतः पितृकुले पंचमादूर्ध्वं पितृतः पितृकुले सप्तमादूर्ध्वं सापिंड्यं निवर्तत इत्यर्थः। पित्रादयः षट् सपि
डाः। तस्यैव पुत्रादयश्च षट्। आत्मा च सप्तमः। अथ मातृकुले पुरुषादयः षष्ठमः। तथा मात्रादयश्चत्वारः पुत्रादयश्चत्वारः। आत्मा च पंचमः। संतानभेदेपि यतः संतानभेदे
त्समादाय गणायत्रयावत्सप्तमो भवति पित्रादिर्वा विजातादीनां यागादिना याकुलांतरे जाता तत्रापि कर्मसप्तमाज्ञातायां विवाहः। पितृबंधुत्वात् पंचमातु द्वितीयपुत्र आह वसिष्ठः।

वप ४

37

मदनपा०
पित्रन २
१८

श्री २

असमानार्षेयमास्पृष्टमैथुनामवरवयसं सदृशीं नग्नां निंदितपंचमीं मातृबंधुभ्यः सप्तमीं पितृबंधुभ्य इति । बंधुशब्दोपादानादयमर्थो गम्यते । अन्यथा कुलादित्येव ब्रू-
यात् । यच्चावसिष्ठेनोक्तं । पंचमीं सप्तमीं चैव मातृतः पितृतस्तथेति । तत्सवर्णासापत्नमातामहकुलविषयं ब्राह्मणादीनां क्षत्रियादिदारसमुत्पन्नपितृकुलविषयं वा । एकत्रावयवानु-
वृत्तेरसावादन्यत्र सावर्ण्ये तावाद्या । यत्तु पैठीनसिराह । पंचमातृतः सप्त पितृतः ... तृतीयमातृतः पंच वा यावत् पितृत इति । अनन्तरीनतोद्यो याद्दिं क्वास्यायं विषयः । यस्य मा-
तापुत्री दत्तपुत्री तां यद्यतिरहितां पुत्रत्वेन स्वीकरोति तत्कुलं । यस्य दत्तपुत्रः पिता तस्य दत्रिमस्य जनककुले चाएकत्रावयवानुवृत्तेरसावादन्यत्र गोत्रानुवृत्तेरसावाच्च ।
यत्तु नारदवचनं । यत्यैकयातावहवः पृथक्क्षेत्राः पृथग्जनाः । तिन्नजातीयाः । ते एकपिंडाः सपिंडाः पृथक् सोदपिंडास्त्रिधावर्त्तेत त्रिपुरुषमेव सापिंड्यमिति । एतद्भिन्नजाती-
यमिति सापत्नफले मातृकुलविषयं । तत्रापकृष्टजातीयानां मूलसजातीयविवाहप्राप्तिरेव नास्ति । अनुलोमतः प्राप्तिरस्ति तत्र त्रिपुरुषामवसां पिंड्यं । युक्तं चैतत् उत्कृष्ट-
जातीयावयवसंयोगेनेतरजातीयावयवविपरिणामतए वंशश्रवैक्रगुणविशिष्टपरिणामे युक्तो । तत्रयेषु विधिनिषेधेषु दृष्टगुणदोषानस्ते केवलं शास्त्रैकसमाधिग-
म्यास्तो यथा । असपिंडा च या मातुरित्यत्र शास्त्रसमधिगम्यो गुणः । तदतिक्रमे वा दायश्चित्तं च दानासावान्नूतथा । गोत्रमपि न निर्वर्त्तते । एवमादिषु श्राद्धविवादेष्वपि
गोत्रमपि न निवर्त्तते । एवमादिसुराद्धिविवादेष्वपि गुणो गोत्रान्निवृत्तिः । अप्रातवपुंसए तिप्रतीचीति मंत्रलिंगाच्च न परिहृत्य पुत्रिकायात्रायत्रिं व्याख्यातं । च निरुक्तका ।
अभ्रातृकपुंसः पितृनेत्यति मुखीसंतानकर्मणि पिंडदानार्थं वृत्तिर्वसिष्ठः । अभ्रातृकां पुंसः पितृणांस्येति प्रतीचीनं गच्छति पुत्रत्वमिति । यत्र पुनर्दृष्टगुणदोषदर्शि-
नेन विधिनिषेधमसिद्धेनं । यथा हीति कृयामित्यादिना । न तदतिक्रमे नायश्चित्तावः । किंतु नियमातिक्रमात्प्रायश्चित्तमात्रं भवति । तथा प्रसिद्धश्रोत्रियकुलजापरिणेया ।
तथा च याज्ञवल्क्यः । दशपुरुषविख्यातात् श्रोत्रियाणां महाकुलादिति । मातृतः पंच पितृतः पंचेति दशा एवं सर्वत्र प्राप्तवयवादमाह । स एवास्याता दपि न संचारिरोगा-
दोषसमन्वितात् । संचारिणो रोगाः कुष्ठापस्मारादयः । मातृसापिंड्याभावे पि मातृसगोत्राया अपि पाणिक्रिया निषेधं व्यासेन दर्शितः । सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्म-
णि । जन्मनाम्नोरविज्ञानादुद्वहेदविशंकितः । अत्र देशाचारव्यवस्था विज्ञायते ॥ ॥ अथ वरलक्षणं ॥ तत्र याज्ञवल्क्यः । एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः । य-
त्नात्परीक्षित ‒ ‒ युवा धीमान् जनप्रियः । एतैः कन्यागुणैः । अनन्यपूर्वकन्यय यवीयसी ‒ मातृमतव्यतिरिक्तैर्युक्तः । सवर्णस्तु उत्कृष्टवर्णो वा न हीनवर्णः । श्रोत्रियः श्रुताध्यय-

१९

38

नसंपन्नः। कात्यायनः। उन्मत्तः पतितः कुष्ठी षंढश्च स्वगोत्रजः। चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषितः। वरदोषाः स्मृता ह्येते कन्यादोषाः प्रकीर्त्तिताः। नारदः। परीक्ष्य
पुरुषं पुंस्त्वे निजैरेवांगलक्षणैः। पुमांश्चेदविकल्पेन स कन्यां लब्धुमर्हति। सुबद्धजत्रुजान्वस्थिसुबद्धांसशिरोधरः। यस्य तुल्यावतरतो दिमूत्रं च फेनिलं। पुरीषं चाप्सु मज्जे
त्तारेति विपरीतस्तु षंढकः। अथ दारानुकल्पः। तत्र मनुः। सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः। अवराजघन्याः शूद्रैव भार्या
शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः। अत्र शूद्रविषयपक्षो नराः निसप—हा शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च। शौनकस्य सुतोत्प
त्त्या तदपत—यास्तगोः। शूद्राया वोढा पतति अत्रिउतथ्यतनयस्य गौतमस्य च मते। अत एतयोर्मते शूद्राविवाह एव नास्ति। शौनकमते तु शूद्राविवाहान्न पातित्यं किंतु
अस्तुता नास्त्या। अतः शूद्रामृतुकाले नोपगच्छेदिति तन्मतं। एवं चर्तुकाले गमनप्रापकानि अगमने दोषप्रापकानि वचनानि एतद्व्यतिरिक्तविषयाणि। तत्सुमन्तुना तत्र
तान्यत्रापि पानीयदे। अपि च ब्राह्मण्यादिनार्यस्तु उत्तरहिता तस्मात् केवलशूद्रापत्यपातित्यहेतुः। ततश्च ब्राह्मण्यादिषु प्रसूतासु शूद्रामृतौ नोपगच्छेत्। तदपत्यत
येति तान्येव शूद्रायामुत्पन्नान्येवापत्यानि स्युः। तदपत्यं तस्य तावत्पत्यता। एष एवार्थो विवर्णी नारेः स्पष्टीकृतः। शिष्टत्वेन व्यवहारेण शूद्रापत्यैश्च केवलमिति। अ
त्रवाकारोपः। कुलान्यकुलतां यान्तीति तु मनुर्वाक्यं। न ब्राह्मणक्षत्रिययोरापद्यपि च तिष्ठतोः। कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते इति। तन्मतमेव शूद्रापरि
णयनविषये। आपद्यपीति तिष्ठतोः सवर्णामलभमानयोरित्यर्थः। एतद्धि वैरूपस्यापि नियतमायतः। स एवाह। हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः। कुला
न्येव नयन्त्याशु ससंतानानि शूद्रतामिति। हीनजातिं शूद्रां। सवर्णालिखितौ क्षत्रियादिविवाहमाह पैठीनसिः। अतः कन्यायाः स्नातकव्रतं चरतु। अपि वा क्षत्रियायां पु
त्रानुत्पादयीत वैश्यायां वा शूद्रायां वोच्यत इति। सर्वात्मना शूद्रापरिणयनिषेधमाह याज्ञवल्क्यः। यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः। नैतन्मम मतं यस्मात्तत्रात्मा जा
यते स्वयं। एषु पदेषु यच्छास्त्रीयस्मात्तायः सपदः आदत्त जच्छ्रीयस्यापि स एव पदूच्येव बृद्धवसिष्ठौ ना विकल्पः॥ ॥ अथ दातृनिरूपणं॥ तत्र याज्ञवल्क्यः। पिता पितामहो
भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। सकुल्यो दायादीदायादश्च पिसन्निहिता यथाशास्त्रं। परः परः। अप्रकृतिस्थितः। अप्रकृतिस्थेन पित्रा
दिना कृतमप्यकृतमेव। यथाह नारदः। स्वतंत्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः। तदप्यकृतमेवास्मादस्वातंत्र्यस्य हेतुतः। पित्रादिना स्वतंत्रोऽपि सन् अप्रकृतिस्थत्वेन हेतुनाप

स्तनपा०

२०

रतंत्रा भवति। तदा न स्नातत्वादनादिकं कार्यमत्र तामवेवेदितव्यं। यदि तस्मिन् वरपतनीयदोषाः अचिकित्स्यरोगा वा स्युः अन्यो वा तथैवापरिणयकर्म प्रवर्ततिष्ठो
दृष्टादृष्टदोषा सा वा तु। यद्यप्यप्रवर्तितिष्ठदत्ताया विवाहसंस्काराणि वृद्धस्तदा प्रधानं कर्मणि निष्पन्ने तेनाधिकारिमात्रविकल्पा तत्रापि न सर्वात्मना प्रवर्तनीया कन्या। ए
वं तर्हि अनधिकारिणा दत्तायामवश्यं तद्विरुध्यतेति चेत् सत्यं तद्दिताधर्मपरिहाराय परिवित्तविवाहइव तां प्रत्याज्य स एव पुनस्तस्मा एवाधिकारी दद्यात् तत्र पुनर्विवाह
विपरीत्वैः विवाहवदेव विज्ञेयः। तथा नारदोपि दातृक्रममाह। पिता दद्यात्स्वयं कन्यां भ्राता वानुमतः पितुः। मातामहो मातुलश्च सकुल्यो बांधवास्तथा। माता त्वभावे सर्वेषां
प्रकृतौ यदि वर्तते। तस्यामप्रकृतिस्थायां दद्युः कन्यां स्वजातयः इति। सकुल्याः पितृपक्षीयाः। बांधवा मातृपक्षीयाः। स्वजातयः ब्राह्मणादयः। एष च व्यवस्थया कन्या तज्जातीयाय देय
याः। एवं अस्मिन्वचने भ्रात्रनंतरं मातामहमातुलयोः क्रमेणाधिकारं प्रतिपाद्य तदनंतरं पितृबंधूनामधिकारः प्रदर्शितः। अयं च क्रमः औरसकन्यकाविषयः। पुत्रिकादिविषये च
वेदितव्यः। पुत्रिका — रसमेव औरसा धर्मपत्नीजस्तत्समः पुत्रिकासुतः इति याज्ञवल्क्यस्मरणात् द्विजजायां उक्तं मातरमाह कात्यायनः। स्वयमेवौरसां दद्यात् पितृभ्रात्रभावे स्वबांधवाः मा
तामहस्तथा तेषामभावे बांधवा धर्मजा सुता। अस्यार्थः। औरसी पिता स्वयमेव दद्यात् पितुरभावे स्वबांधवाः। पितृवंशे वधू दद्युः। ततोन्यां औरसीं व्यतिरिक्तां धर्मजां नियोगेन जातां क्षेत्र
जां पितृसाध्वमातामातामहो दद्यात्। मातामहग्रहणं मातुलस्याप्युपलक्षणं। अत एव दत्ताभावे मातुलस्तदभावे मातेति क्रमः। युक्तं चैतत् द्विजजायां मातामहस्य यवप्राधान्यात्। ए
वं च मातामहादीनामौरसीपुत्रीदाने पितृबंधुषु विद्यमानेष्वधिकारो नास्तीत्युक्तं तत्र च विषयविशेषे अपवादः श्रूयते दीर्घप्रवासयुक्तेषु योगंडेषु च बंधुषु। माता तु समये दद्यादौ
रसीमपि कन्यकां। योगंडो व्यवहाराद्यसमर्थः। समयो रजोदर्शनावधिः समया स्यात् पूर्वकाले। पूर्वोक्तसकलाधिकार्यभावे मनुः। यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत्। अनुज्ञातस्य वरं
स्ववर्णं वरयेत्स्वयं। वरयेदित्यनुवृत्तौ नारदः। सवर्णमनुरूपं च कुलरूपवयःश्रुतैः। सहधर्मं चरेत्तेन पुत्रांश्चोत्पादयेत्ततः। पित्रादिषु सत्स्वपि कालविलम्बेऽपि विद्यत एवं स्वयंवरः। यदाह बौधाय
नः। त्रीणि वर्षाण्यृतुमतीं काङ्क्षेत पितृशासनं। ततश्चतुर्थे वर्षे तु विंदेत सदृशं पतिं। अविद्यमाने सदृशे गुणहीनमपि श्रयेत्। तथा च विष्णुना। ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरमिति। तद्

२०

णावरोधे लोत्प्रेदितव्यं। अत्र विशेषांतरमाह मनुः। अलंकारं नाददीत पितृदत्तं स्वयंवरा। मातृदत्तं भ्रातृदत्तं स्तेया स्यात् यदि तं हरेत्। वरस्त्वापि स एवाह पित्रे तथा — — — शुल्कं यामृतुमतीं हरेत्
स हि स्वाम्यादतिक्रामेद् ऋतूनां प्रतिरोधनात्। यमः। कन्या द्वादशवर्षाणि याप्रदत्ता गृहे वसेत्। भ्रूणहत्या पितुस्तस्य सा कन्या वरयेत्स्वयं। एवं चायमप्रतीपत्नीनावमन्या कदाचन। न उत्तां बंधकौ विद्यान् मनुः

स्वयं तु साब्रवीत्। एवं निश्चयावकाशाभावाद्दशकालादि प्रतिबाधतावसति। अन्यथा कालातिक्रमादोषश्रवणात्। तथा च बौधायनः। दद्याद्गुणवते कन्यां नग्निकां ब्रह्म-
चारिणे। अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलां। ऊनतीनाय रूपादिगुणरहिताय। नग्निका वदद्दर्शिता पुराणे। यावन्न लज्जयांगानि कन्या पुरुषसंनिधौ। योन्या-
दीन्नावगूहति तावद्भवति नग्निकेति। अमरसिंहस्तु यथाप्राह। नग्निकानागतार्तवेति। अग्निकश्यपौ। पितुर्गेहे तु या कन्या रजः पश्येदसंस्कृता। भ्रूणहत्या पितुस्त-
स्याः सा कन्या वृषली स्मृता। यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः। अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिं। संवर्तः। रामकाले तु संप्राप्ते सामातुं जीतकन्यकारजः।
काले तु गंधर्वविज्ञिस्तु ऊर्ध्वदर्शनात्। तस्मादुद्वहेत्कन्यां यावन्नार्तुमती भवेत्। विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः। कश्यपः। अष्टवर्षा भवेद्गौरी नववर्षा
तु रोहिणी। दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला। एवं कन्यादानअधिकारिणो निरूपिताः। सांप्रतं दत्ताया अपि कन्यायाः क्वचित्स्वाहरणं निरूप्यते। तत्र या-
ज्ञवल्क्यः। दत्तामपि हरेद्दाद्धि पूर्वस्याप्पातकादिदा। पापमृष्टश्चमितरस्यगुणद्गु के चेत्स्यात्। एतच्च सप्तमपदीप्राग्दृष्टव्यं। यथाह नारदः। स्त्रीपुंसयोस्तु संब-
न्धाद्वरणं प्राग्विधीयते। वरणाद्ग्रहणं पाणेः संबंधोयं द्विलक्षणः। तयोरनिय तं प्रोक्तं वरणाद्दोषदर्शनात्। पाणिग्रहणिका मंत्रा नियतं दारलक्षणं। तेषां
निष्ठा च विज्ञेया विद्वद्भिः सप्तमे पदे इति। अस्यार्थः। स्त्रीपुंसयोः संलागस्वाकृ वरणं तव तिवरणेप्पाणिग्रहणं एवं संबंधस्त्रिलक्षणः। वरणं पाणिग्रहणं
सुपत्नागश्चेति त्रिविधः। गांधर्वादिषु नायं क्रमः। तयोः कन्यावरयोरनियतमनिय मः। हि तो पि न परिणीयते। वाग्दत्तापि न दीयत इत्येवं रूपः। तत्राद्यः। वरणाद्दोष-
दर्शनादिति। वरणादूर्ध्वं कन्यावरयोरन्योन्यं दोषदर्शनात्। अनेन विवाहादूर्ध्वं नानियमइत्युक्तं भवति। तत्र नियमे द्वितीयमाह। पाणिग्रहणमंत्रोत्पाद्यसंस्कारावधिमाद।
तेषामिति। कव-- स्मिश्चवचनेपागंतरं व्याख्यांतरं च कुर्वति। तद्यथा। वरणाद्ग्रहणं पाणेः ससंस्कारात्त्रिलक्षणः। तयोरनियतं प्रोक्तं वरणाद्दोषदर्शनादिति। पाणिग्रहणं य-
स्मिन् लक्षणः। संस्कार अग्निविज्ञितादोमादि नि-- द्यः संस्कारः। तयोश्च वरणपाणिग्रहणयोर्मध्ये वरण एव दोषदर्शनादनियतं न पाणिग्रहणं। तस्माद्वक्कृपति नानुवर्तते रि-
तियामपि। पाणिग्रहणसंस्कारात्पतित्वं सप्तमपदे। एवं च सप्तपदादर्वाक् परिणेतुर्मरणेपि न विधवात्वमिति गम्यते। ग्रंथे च वसिष्ठेन। अ-- द्भिर्वाचि दत्तायां म्रियेतादौ व-
रो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा। सा पितुरेव न प्रतिग्रहीतुरित्यर्थः। सा च तदहं वरायं देया। तद्दत्ता वै तज्जो नाया। तद्दत्ता वत्र्यस्मे लोकविद्विष्टत्वाद्देश्या

वारानुसारेण भवति। बलादपहृतायां तु विशेषमाह वसिष्ठः। बलादपहृता कन्या मंत्रैर्यदि न संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥ ॥ बहुभ्यो वाग्दाने कात्या
यनोक्तो विशेषो द्रष्टव्यः॥ अनेकेभ्योपि दत्तायामनूढायां तु यद्यदि वै। वरागमश्च सर्वेषां लभते पूर्ववरस्तु तां। सर्वेषां वराणामागमे सतीत्यर्थः। स च पूर्ववरो प्रदिष्टदोषरहितो गुणवां
श्च भवति। वरयित्वा देशांतरगमने नारदः। प्रतिगृह्य तु यः कन्यां वरो देशांतरं गतः। त्रीनृतून् समतिक्रम्य सा कन्यान्यं वरयेद्वरं। प्रतिगृह्य वरयित्वा। प्रदाय शुल्कं गच्छेद्यः कन्याया
स्त्रीधनं तथा। धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः। अत्र विशेषमाह मनुः। कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः। देवराय प्रदातव्या यदि कन्यानुमन्यते। कुलादि
रहितस्यापि कन्याप्रत्याहरणमित्याह वसिष्ठः। कुलशीलविहीनस्य षंढादिपतितस्य च। अपस्मारिविधर्मस्य रोगिणां वेषधारिणां। दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव चा
न्नपुनर्विवाहादिविशेषस्तु पूर्वमेव निरूपितः॥ अदुष्टकन्यापरित्यागे विशेषमाह नारदः। प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेद्वरः। विनेयः सोथ दंडेन कन्यां तामेव चोद्वहेत्।
कात्यायनः॥ वरदोषमनाख्याय — — रक्षाति यो नरः। यावत्तं च यत्कवीत तद्दत्तं नागुं यानुमः। कन्यादोषोप्येवमेव दातादंड्यो वरस्तथा। नारदः। नादुष्टां दूषयेत्कन्यां
नादुष्टं दूषयेद्वरं। दोषे सति न दोषः स्यादन्योन्यं त्यजतस्तयोः। मनुः। विधिवत्प्रति गृह्यापि त्यजेत्कन्यां विगर्हितां। व्याधितां विप्रदुष्टां वा छद्मना चोपपादितां॥ विप्र
दुष्टां। अन्यगतभावां छद्मना। अन्यकन्योपदर्शनेन। एवमुक्तलक्षणाय वरायोक्तल क्षणा कन्या देया। अधिकारिणो युक्तो विवाहः। प्रपंचः सोपि न्याय्यक्रमेण तिशास्त्रनि
यमः। तत्र क्वचिदपवादमाह मनुः। षंढांधबधिरादीनां विवाहोस्ति यथोदितं। विवाहसंत वा तेषां कनिष्ठो विवहेत्तदा। पितृव्यपुत्रे सापत्न्यो परदारसुतादिषु। विवाहधानय
ज्ञादौ परिवेदो न दूषणं। ज्ञानातपोपि। नाग्नयः परिविंदंति न वादानं तपांसि च। न च श्राद्धं निविष्टस्य या च कन्या विदूषिका। अन्येपि विशेषाः आवसथ्याधानप्रकरणे वक्ष्यंते। अथ
विवाहभेदाः। तत्र मनुः। योयस्य धर्म्यो वर्णस्य गुणदोषौ तु यस्य यौ। तच्च सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान्। ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः। गांधर्वो राक्षसश्चैव पैशाचश्चा
ष्टमोधमः। ब्राह्मविवाहलक्षणं तत्संततिफलं चाह याज्ञवल्क्यः। ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। तज्जः पुनात्युभयतः पुरुषानेकविंशतिं। तथा। उभयतः पित्रादीन्द
श पुत्रादीन्दश आत्मानं चैकविंशकं। दशैव मित्येकविंशतिं पुनाति। यद्वा उभयतः। मातृतो दश। पितृतो दश। आत्मा चेत्येकविंशतिः। तथा। यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु
गोद्वयं। यज्ञे प्रारब्धे कन्यामलंकृत्य यत्र ऋत्विजे दीयते स दैवः। वराद्गोमिथुनं वृषभं गां च गृहीत्वा यथाशक्त्यलंकृता यत्र तस्मै दीयते स आर्षः। गोद्वयग्रहणं प्रदर्शनार्थं परावेमनुः

आर्षो गोमिथुनं शुल्कं कश्चिदाहुर्मृषैव तत् । अल्पोपि वा महान्वापि विक्रयस्तावदेव सः इति । कन्यार्थे यद्दि गृह्णाति तद्दानं दामस्याद्धौ स एवायासामाददातु शुल्कं ज्ञातया न स वि
क्रयः । अर्हणं तत्कुमारीणां मानृशंस्यं हि केवलं । यच्छुल्कं कन्या तत्कुमारीणामर्हणं पूजनं आनृशंस्यं मयापिष्टं तच्छुल्कं कन्यायै दद्यादित्यर्थः । दिवार्षयोः फलमाह याज्ञवल्क्यः । चतुर्दशाद्य
थमजः सुतः । पुनात्युत्तरजश्च षट् । प्रथमजादैव विवाहजः । उत्तरजश्चार्षविवाहजः । सप्त पूर्वान्सप्तावरान् इति चतुर्दश चात्र पूर्वान्त्रीन्परानिति षट् पुनातीति उत्तयत्र स्वस्य म
ध्यस्थितत्वादेव पवित्रता । तथा । इत्युक्त्वा चरतां धर्मं सह यादीयते र्थिना । सकायः पावाय — षट् वंश्यान्महात्मना । सह धर्मं चरतामिति परिभाषणपूर्वकमलंकृता कन्या यत्र
सदीयते स कायः । प्राजापत्यः । तस्यां जातः षट् पूर्वान् षट् परान् आत्मानं च तित्रयोदश पावयेत् । अथवान्योर्थः । राक्षसो युद्धहरणात्पैशाचः कन्यकाच्छलात् । आत्मार्थं द्रविण
मादाय कन्यार्पणमासुरः । अस्य मानुषस्यापि संज्ञः । तथा च हारीतः । शौल्केन मानुष । इति कन्यावरयोरन्योन्यानुरागेण यः समयः त्वं मे भार्याहं तव पतिरिति स गांधर्वः । स
मयपूर्वकमुपयोगेपि गांधर्व एव युद्धहरणाद्राक्षसः । ह्रात्मरस्यापातिधीयताय । व्याह हारीतः । अलंकृतामतिजयकात्र इति । कन्यकाच्छलात् छलं छद्मः कापट्येन
स्वापाद्यवस्थासु कन्यकाछलाद्धरणं पैशाचाविवाहः । कन्यकाछलादित्यपि पा ठः । न चासुराविवाहेषु सप्तपदातिक्रमणाभावात्पतित्वभार्यात्वयोरनुत्पत्ति
रित्याशंकनीयं । तत्रापि पैशाचस्वीकारानंतरमेव संस्कारविधानात् । तथा च वद वल्लः । गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः । कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्नि
साक्षिकः । इहापरिशिष्टेपि । गांधर्वासुरपैशाचाविवाहाराक्षसश्च यः । पूर्वं परिणयस्त स्यां ततो होमाद्भिधीयतां परिणयः स्वीकारादि । । एवं स्थितवर्णव्यवस्थायां विहितकर्तव्य
व्यवस्थितविवाहनियममाह मनुः । षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरो वरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यान्नराक्षसान् । अस्यार्थः । ब्राह्मादीन् षडानुपूर्व्या क्रमेण ब्राह्मणस्य
धर्म्यान्धर्मादनपेतान् । विद्यात् । तत्र षट् । ब्राह्मो दैव आर्षः प्राजापत्य आसुरो गांधर्वश्चेति । यत्तु कश्यपेनोक्तं । क्रीता द्रव्येण या नारी न सा पत्नी विधीयते । न सा दैवे न सा पित्र्ये दासीं तां क
श्यपोऽब्रवीत् । यद्यप्यमाणत्वात्तद्विवाहसंवेसति पूर्वाद्धत्रमाय अवरान्पश्चाद्धकान् आसुरगांधर्वराक्षसपैशाचानूतान्धर्म्यान्विद्यात् । केचनेव्याचक्षते । षट् ब्राह्मादिगांध
र्वांतान्विप्रस्य क्षत्रस्य प्राजापत्यादिराक्षसांतान् चतुरः । विट्शूद्रयोस्तु अराक्षसान् प्राजापत्यादीन्तानेव धर्म्यान्विद्यात् । पैशाचपरित्यागेनाहत्त्वमपुपदिशंति । हत्र अन्नारदमनु
वचनो । चत्वारो ब्राह्मणस्याद्याः प्रशस्ताः गांधर्वराक्षसौ । राजन्यस्यासुरो वैश्ये शूद्रे चांत्यस्तु गर्हितः । सर्वापिष्ठा विवाहानां पैशाचः कथितोष्टम इति । एषामष्टप्रशस्तानाहमनुः । चत्वारो

×पिम१

उ१

43

ब्राह्मणस्याद्या श्चत्वारोऽनुक्रमयोविदुः। राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः॥ अयमर्थः। ब्राह्मोदैव आर्षः प्राजापत्यश्चेति चत्वारो ब्राह्मणस्य प्रशस्ता न्याय्याः। क्ष-
त्रियस्यैकः राक्षसमेव प्रशस्तं। वैश्यशूद्रयोरासुरमेव। ब्राह्मणस्य ब्राह्मादि प्राजापत्यांतो मुख्यकल्पः। राक्षसो कल्प अनंतरं क्षत्रधर्मत्वात्। क्षत्रस्य राक्षसो
मुख्यः। क्षत्रस्य वैश्यशूद्रयोरवमनि च त्रयेषां मते आसुरगांधर्वराक्षसपैशाचा इति चत्वारः तन्मते आसुरगांधर्वपैशाचाश्चानुकल्पः। यन्मते प्राजापत्यादयश्चत्वारः प्रा-
जापत्यासुरगांधर्वराक्षसा इति मते तु प्राजापत्यादयस्त्रय अनुकल्पाः। तथा वैश्यशूद्रयोरासुरो मुख्यः कल्पः। गांधर्वपैशाचावनुकल्पौ। प्राजापत्यगांधर्वौ विवाहे वर्ष्ठि-
त ब्राह्मणस्यापि कल्पमाह मनुरेव। पंचानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह। पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन। पंचानां प्राजापत्यासुरगांधर्वराक्षसपैशाचानां
मध्ये त्रयः प्राजापत्यगांधर्वराक्षसा धर्म्याः द्वावधर्म्यौ तौ वदन्नयति। पैशाचश्चा तिमुख्यकल्पमध्यपरिगणितस्यापि प्राजापत्यस्य कल्पमध्यपरिगणनमार्षा-
पत्त्या प्राजापत्यस्यापकृष्टत्वद्योतनार्थं पुमान्पुत्रं जनयेत् षड्यार्षविवाह जो पत्त्यासकायपाचये न कांषट्‌षट्‌ वंश्यान्महात्मनेति प्राजापत्यविवाह
स्याधिकफश्रवणात्प्राजापत्यस्याधिक्यं द्योत्यते तन्नामूद इति क्षत्रियस्य पकल्पमाह। पृथक्पृथग्वामिश्रौ वा विवाहौ पूर्वचोदितौ। गांधर्वराक्ष
सश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ। पृथक्मुख्यो नुकल्पश्चेति व्यवस्थितविक ल्पेनोक्तौ हि तौ। तत्र पूर्वोक्तौ विवाहौ यदि मिश्रितौ सवतः समिश्रौ तव
तः। समिश्रो विवाह उच्यते। मिश्रविवाहमेवोदाहरणं दर्शयति। गांधर्वराक्ष सइति। यथा। प्रथमं गांधर्वेण परिगृह्य तद्बंधुभिर्विरुद्धे युद्धे न हरणं एतच्च
दर्शनार्थं। अत अनेनैव न्यायेन न वर्णांतरगमनमपूहनीयं। विप्रस्य शूद्रायां राप्यापकल्पेषु अति निंदितापि पैशाचो ग्राह्यः। तथा विप्रशूद्रहन्नेरपि विप्राद्यैः। त
थाच वसिष्ठः। सर्वेः पापैरसाध्यास्यात्तु कन्या पुरुषस्य वै। बलार्येणापि विवाहेन सा विवाह्या यारक्षः स्थितैति। चौर्येणापि पैशाचेन सकल विवाहापयोगा विशेषो यज्ञपार्श्वेनोक्तः।
विवाहेवितातं तत्रेदामकाल उपस्थितं कन्यायामनुरागके कथं कर्तव्यताज्ञिकाः। स्नापयित्वा तां कन्यां अर्चयित्वा यथाविधि। कुंजानामाकृतिं दद्याच्चावनस्पत्यं प्रवर्तये
दितियाज्ञवल्क्येनाप्युक्तो विशेषो दर्शितः। पाणिर्ग्राह्यः सवर्णास्तु गृह्णीयात्क्षत्रियाशरं। वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः। क्षीरारादिकं गृह्णातिति तत्पाणिस्थितेव
वेरगृह्णीयादित्यर्थः। अग्रजन्मन इत्युक्त्योपलक्षणं। तथाचमनुः। वसनस्य दशायाह्या शूद्रोत्कृष्टवेदने इति। विधवानियोगे भावविचारसरिणिमारोपितः। युगांतर

विषयचात् । विवाहे वर्षमासादिशुद्धिर्ज्योतिःशास्त्रे निहिता ।। सिंहस्थे मकरस्थे च गुरौ यत्नेन वर्जयेत् । सिंहस्थे तु मघासंस्थे गुरौ यत्नेन वर्जयेत् । अन्यत्र सिंहभागे तु विवाह
दि विधीयते । लल्लः । नर्मदापूर्वभागे तु गंगाया उत्तरदक्षिणे । गंडक्याः पश्चिमे पारे मकरस्थे न दोषता । ज्योतिःसारसंग्रहे । अतिचारं गतो जीवस्तां राशिं नैति चेत्पुनः । लु
प्तसंवत्सरो ज्ञेयः सर्वकर्मबहिष्कृतः । माघफाल्गुनवैशाखज्येष्ठाषाढमृगाः क्रमात् ।। षडेते तु जिता मासाः श्रेष्ठवर्णस्य निश्चयात् ।। मार्गमासि तथा ज्येष्ठे दोषं परिहरे[illegible] । ज्ये
ष्ठपुत्रदुहितुः । नास्तु यत्नेन परिवर्जयेत् । श्रेष्ठं पक्षमुशंति शुक्लमसितस्याद्यत्रिभागं तथा रिक्तां नो हा तिथिं तथर्वयनं त्याः संबंधिनेष्टाः ता ।। अमायां चैव न कुर्यात्करा
विष्टिसंज्ञितायां करोति विवाहं स शीघ्रं याति यमालयं । प्रतिपद्दुःखजननी द्वितीया प्रीतिवर्धिनी ।। सौभाग्यदा तृतीया स्याच्चतुर्थी चार्थनाशिनी । पंचम्यां शुभविता नि षष्ठी वि
घ्नप्रदा मता ।। विद्याशीलसुखावाप्तिः स्यात्सप्तम्यां सफलाष्टमी । नवमी शोकसंयदा त्रानं दादशमीदिने । सुखदैकादशी ज्ञेया सफला द्वादशी स्मृता । मानदा त्रयोदश्यां
धुर्दशी शोभादायदे । फलं बहुविधं नित्यं पंचदश्यां विशेषतः । न चेद शुक्लपातिप दुर्दयंती निषिध्यते । अत्रापि नाम्ना पक्षस्य दशमी द्वाविवाहिका । गुरुशुक्रे उच्च
त्राणां दिनेषु परिणीयते । या कन्या सा तव नित्यं संदिग्धा तु वर्तिनी ।। अर्कार्कि सोमवाराणां दिने शुक्ले कलहप्रिया । सापत्न्यं समवाप्नोति कुजारकरवासरे । अ
त्रदिने स्त्रियां वै तिथिनां कन्या तु श्रेष्ठगम्या तु । तथा च स्मरंति न वारादोषाः प्रसव तिरात्रो शति । यावज्जीवं कन्या सहेतेनेनि नियुज्यते । ऊं स्वपक्षात् आमयता गोरवि
ण्यां याति पंचत्वं या प्येष्ठे द्विमासिर्वैधव्यं याति निर्धनं चैव बाधनं कण्ठककष्टयुतापाणिग्रहणे कुलति काम्यां वाग्नपहुज्यात् । पश्चात्षष्ठे ह्याति पंचत्वं । प्राजापत्ये ~~[illegible]~~ नी
सुभगा पतिव्रता मानिनी प्रिया तर्दशु विरकुलानर्द प्रियंवदा । सामदैवतकन्या आर्षपाणिग्रहणे वर्षेणैकेन याति पंचत्वं ।। नितिरश्चेरादित्ये कन्या समुपैति पतिं मन्यं । अष्टवर्ष[illegible]
कन्याकुलविद्विषिणी सवतिदुःखा । अश्लेषास्वपि कन्यापाणिग्रहणे समेत्य तत्र तरिं सप्ततिरश्चे दन्यादष्ट कृतपापं समाप्नोति सर्वे तिन्निवर्गस्त्रिका पित्र्यपाणिग्रहणे संप्राप्नता यसुतासारा
ग्यदा सिचं नित्यं या कन्या । अष्टे कृत्तिकाति पतिमरणं प्राप्नुयाद्ध्रुवं वा व्यपगतशोकाकुसमृ सोगवती सुपुत्रजा प्रिया सत्वक । आर्यमारा शिशुके कन्या वर्धयतीति हस्तपाणिग्रहणे समेव
न्यापतिजनानित्यं । आत्मप्राणवियोगमवाप्नुयात्कन्या कायाष्टात्तु । अथवा शीलसंपन्ना बाष्ट्रप्राप्नोति बांधवकुलात्तु स्यात् धर्मसमेता पतिदयिता वंशवर्धना साध्वी । ऐंद्राख्येक
न्यांन्याबुद्धिस्त्वष्टान्याति पतिमन्यां । अष्टमव ज्येष्ठे नीतमैत्रे कन्याप्नुयाद्धनं सौख्यां तर्ईरवशांचाद्याऽरवान्यत्तु स्वयशःकृतसकन्या । अष्टमेष्ट वैधव्यं प्राप्नोति यद्यष्टमे न मृता । मूलेसधनसा

ज्ञावश्यकतु हो ।

का

मदनपा०

ध्वी पत्युरतिप्रियतमा प्रनष्टा च। अश्रुविरनावारीदासरता पश्यामतिरनारीं। अद्वयेन कन्याज्ञेया सा स्वविवाहासु। विदधातिविश्वेदेवस्तर्विन्नं बयुरुजनातिरता। पाणिग्रह

मुपयाति श्रवणेनेकत्रसारमतेः। विप्र प्रस्मृतिशोवासु — सुरवं याति वसुदेवाः ईच्यारोगेणाहतायमसदनं याति वारुणे पश्चात्तु। आजेकपदे कन्याः शीलादुत्तगादरिजा चात्र

दिर्बुध्न्ये कन्यामणिकन्यानकेषु तमाप्नोति। प्राप्नोति शीलं रोचव पौष्णे शय्यासंतापकरणानि। विश्वति कपरिणीतकन्या विकलेन्द्रियाश्विनीपाते। विष्टामरणं निश्चं सुतगाषड्वापिवर

शुक्रारस्तु क्रावकरणौ शकुनादौ पाणिग्रहणं क्वचं मृत्युः। दुष्टस्यपूर्वमयदाय दिनार्द्धत्यागं। विष्टि प्रदुष्टमपिनष्टविधुंतिथिं च। शाषा शुंसानिगदिता। अस्तु ताश्चयान्यपूर्वाह्निकमत्र

सकलं हि विचिंतनीयं। शनैश्चर दिनप्राप्तेय द्विरिक्तातिथिस्तवितूतस्मिन्विवाहिता कन्यापतिसंततिवर्द्धनी। माषकुमारयत्नुरत्न विना विहीनविनागविगात्रताच। अन्यान

दकरी तृतीय कुलीरलग्ने कुलटानृशंसा। हतोप्रसूतासनताश्रिता तैपि तु पतिप्रिया। । वधसुरस्यषष्ठे सूपातिमानार्थवती कुलाधरेतत्याल्लि निकंदति नित्यमस्थिरा क्षतु

विकुलटा तत्सुर्वा सनि व्यपरेजगुः। मृगरूप घटे कन्यासक्ता जरामुपगच्छति। प वा पाणिग्रहे दोषावर्जनीया। प्रयत्नतः। दारिद्र्यं मरणं व्याधिः पुंश्चल्यमनपत्यतेति।

तथा। गुरुरस्तु का स्तादि दिवपि विवाहादिनिषेधे ज्याति:शास्त्रे संग्रहः। बालेऽसौ केतुरेश्रुतजीवनष्टे जीवबालेजीवजीव सिंहसिंहादिगुरुजीवादित्ये। तथाम

लिम्लुचे मासि सुरावार्यति चारगे। वापीकूपविवाहादि क्रियाप्रागुदिता त्यजेत्। अस्ता दिलग्नं वक्रल्लासि प्रांतारविनीरंविरत्येषां ग्रहाणामस्तत्वच्यते। आवाधुर्वमवळ

स्यान्मौढ्याद्यार्धकरिशवइति। बाल्यत्वं वृद्धत्वं यारवधिरं संदामोदरीयात्राबालादिव। सत्रयंदशादिनं पश्चात्सितावद्धतं पंञ्चवासरपंचाकवललतेपन्हेगुरुः सर्वतः। तत्पश्चाक्

रुध्यकयोर्विमलाया जयादि विवाहं सितचिह्नवासरपंचाक बालं वदेत्स्याद्वयाहत्पराइति। बार्हस्पत्ये तु। प्राक्पश्चाद्ददितः शुक्रः पंचसप्तदिनं शिशुः। विपरीतं तु वृद्धत्वेन दर्द्धे वगुरुप्पी

ति। अत्र दे शते दिनआपदादव्यवस्था प्राहगार्ग्यः। प्राक्गुरुः प्राकपराइवबालाविंध्योदरावंतिषुसप्तरात्रं। वंगेषु हूणेषु च षड्वपंच शेषदेशेविदिनं वदंतीति। अस्मिंश्च वचने यन्ना धि

कका लास्तद्दशे देनयावस्थिताइति न विरोधः। मिहिरपि। बहावादशिताः कालायेबाल्येवार्द्धक्यापि वाप्याद्याः स्तत्राधिकाद्दैश्या सदाऽज्ञाता दपेति॥ ॥इति विवाहविधिः॥ ॥छ॥ ॥—

अथावसथ्याधानं॥ आवसथ्यास्यगृह्यस्य अग्नेराधानमावसथ्याधानं। तद्विवाहकालेवश्यं कर्मनिरं कुर्यात्तु प्रायागमध्येप्रयोगांतरकरणाधिकारासावात्तु दायाद्यकाले आवसथ्या

धानमित्येके प्रामतं। दायाद्यकालोनामभ्रातॄणांपित्र्यधनविभागकालः। अविभक्तपित्र्यधने सर्वेषां भ्रातॄणां स्वस्वस्यसाधारणत्वेन विनियोगानर्हत्वेन वातु धनविनियोगसाध्यं हि आव

46

सभ्यादिकर्मानुष्ठानं॥ अतोऽन्यस्मिन्मते विवाहकस्यैवाधानेऽधिकार इति॥ तेषामभिप्रायः॥ अन्येषां च मते समुदितधने सत्यपि समस्तीति तदनुज्ञया विवाहकालेऽपि पत्नीवतीयमभिप्रायः॥
तथा च पारास्करः॥ आवसथ्याधानं दारकाले दायादकाल एकेषामिति॥ व्यासोऽपि॥ अग्निर्वैवाहिकोऽध्ययनं न गृहीतं प्रमादिना॥ पितर्युपरते नैव गृहीतव्यः प्रयत्नतः॥ अयं हि वाऽविवाहः
अग्निं गृह्य स्थप्रतिमः स्यात्॥ अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः॥ एतच्च ज्येष्ठस्याधिकारित्वेऽदृष्टं॥ कनीयांसु ज्येष्ठेन ताग्निपरिग्रहे विद्यमाने स्वयमध्ययनादिनिष्ठो ऽग्निपरिग्रहम
कुर्वन्नपि प्रत्यवैति॥ तथा च गर्गः॥ पितृपाकोपजीवी वा भ्रातृपाकोपजीवकः॥ ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना॥ अध्ययननिविष्ट इति प्रथमाध्ययनपरः॥ अत्र च ज्येष्ठे विद्यमाने कनी
यसामनधिकारः॥ तथा च मनुशातातपौ॥ दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः॥ अग्रजः सोदर एव न त्वन्यमातृजान॥ आह वसिष्ठः॥ पितृव्यपुत्रा
सापत्न्यान्परनारीसुतास्तथा॥ दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥ परनारीसुता दं तकोदयः॥ अन्यमपि विशेषं छंदोगपरिशिष्टे कात्यायन आह॥ देशांतरस्थक्लीबैकवृषणा
असहोदरान्॥ वेश्यातिसक्तपतितान्शूद्रतुल्यातिरोगिणः॥ जडमूकांधबधिरकु ब्जवामनकंटकान्॥ अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च॥ धनवृद्धिप्रसक्तांश्च कामत
कारिणस्तथा॥ कुहकोन्मत्तचोरांश्च परिविंदन्न दुष्यति॥ एतेषामाधानाद्यधि कारात्तावादेव न दोष इति॥ देशांतरस्थितं तु सोदरेण विशिष्टेन विराधः कथि
तः॥ अष्टौ दश द्वादश वर्षाणि किं विकृष्यमाणेन नातिदूरदेशस्थितं दिवानदीपर्वत विरोधव्यवहूल दूरतरदेशस्थित अप्रेक्ष्यमाणो वा शैवमाणि इति॥ यत्र ज्येष्ठोऽधिका
र्यपि आधानं करोति तत्र तदनुज्ञया कनीयसा कर्तव्यं यथाह सुमंतुः॥ ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत्॥ अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा॥ वृद्धवसिष्ठोऽपि॥ अग्र
जस्तु यदा नाग्नीनादध्यादनुजः कथं॥ अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि॥ हारीतोऽपि॥ अधिकारिणा तु ज्ञापूर्वकमाधानमनुजानीत न तु विवाहं॥ सोदराणां तु सर्वेषां परिवेत्ता क
थं भवेत्॥ दारैस्तु परिविद्यंते नाग्निहोत्रेण न ज्यया॥ पितृत्वविषयेऽपि सुमंतुः॥ पिता यस्य तु नाधीतं कथं पुत्रस्तु कारयेत्॥ अग्निरुन्नेऽधिकारोऽस्तु शंखस्य वचनं यथा॥ नाधीतं अग्निरहितस्य यथा॥
अत्राप्यनुज्ञापूर्वकमित्यवगंतव्यं॥ समानन्यायत्वात्॥ आधानार्थमन्वज्ञाताग्राह्य इत्याकांक्षायां स्मृत्यंतरे दर्शितं॥ आधानं विधिवद्वैश्यकुलात् ग्राह्यो यथापि वा॥ महानसाद्वरण्यो वृदा
रदायादकालयोः॥ वैश्यस्य पक्वसमृद्धस्य कुलात् गृहात्॥ महानसात् बहुपाकवतो ब्राह्मणस्य महानसात्॥ नयावकाध्यायनः॥ वैश्यस्य बहुपशोरं कुर्याद्वा यजिनो ब्राह्मणस्ये
ति॥ अरणिजं हृणांव समृत्यंतरे तिहितं अश्वत्थो या शमीगर्भः प्रशस्तोर्वीसमुद्भवः॥ तस्य या प्राङ्मुखी शाखा वोर्ध्वा वेदैव वा धर्मा अपि॥ अरणिस्तन्मयी ज्ञेयात न्मध्ये वोत्तरारणिः॥ सारवदा

एवंचात्रसौवितीवप्रशस्यात।सारवद्दलवत्तुखदिरादिदृढकाष्ठनिर्मितमित्यर्थः।।चात्रं।यस्मिन्काष्ठे रज्जुं वेष्टयित्वात्रमथ्यते तत्।।अविली।चात्रस्योपरि बिलयुक्तं तन्नियमनार्थं यद्दीयते
तत्संसक्तं मूर्धा।शम्याः।शमीगर्भ उच्यते।अश्वत्थस्य शमीगर्भत्वं दूरे द्वे वा विलंबितं।चतुर्विंशत्यंगुलादीर्घा विस्तरेण षडंगुला।चतुरंगुलमुत्सेधा अरणिर्या शिखा स्मृता।मूलादष्टांगुले चात्र
अग्राद्द्वादशांगुले।अंतरं देवयोनिः स्यात्तत्र मंथो हुताशनः।अष्टांगुलः प्रमंथः स्याद्द्वारं स्याद्द्वादशांगुलं।ओविली षोडशीवस्यादेतन्मंथनयंत्रकं।प्रमंथश्चात्रस्याक्षे नागे अरणिकाष्ठे।
लिखयमिति।निप्रमथनार्थं यद्दीयते स उच्यते।अक्षे नागे प्रमंथकाष्ठं संबद्ध्वा चात्रस्योपरि अविली विधाय वंत्रणेनाणावेष्टयित्वा प्रमथनं कुर्यात्।गोबालैःशालसिक्तत्रिवृत्कृतमंत्रवृ
व्यामप्रमाणं नेत्रं स्यात्तेन मंथो हुताशनः।चात्रबुध्ने प्रमंथाग्रं गाढं रक्षाविचक्षणः।इति।अत्र नक्षत्रनियमस्तु ज्योतिःशास्त्रे।उत्तरात्रितयपौष्णरोहिणीपौरहूततबऊलाद्विदैवते।।पुष्यसौम्यसदि
तिद्विजन्मनः स्याद्धुताशनपरिग्रहो हितः।। ।।इत्यावसथ्याधानं।। ।।ॐ।। ।।अथोपासनावसथ्यस्याचोपासनं कृतम् आरभ्येत्याकांक्षायामाह।।पारस्करः।।उपयमप्रभृतीनि अत्र सए व
कालनियममाह।अस्तमितानुदितयोरिति।अस्तमितं च उदितं च अस्तमितानुदिते।तायाः।अस्तमितलक्षणं संदोगपरिशिष्टे।यावत्सम्यङ् न भासंते नभस्यृक्षाणि सवितः।
न च लोहितमापैति तावत्सायं तु भूयते।अनुदितस्याग्निर्विधौ अनुदितः समाध्युषित श्चात्याच्छमनुः।उदितानुदिते चैव समयाध्युषिते तथा।सर्वथा वर्तते यज्ञ इतीयं वै
दिकी श्रुतिरिति।अनुदितसमयाध्युषितलक्षणमाह।कात्यायनः।रात्रेः षोडशमे भागे ग्रहनक्षत्रभूषिते।कालं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः।तथा प्रभातसमये नष्टे
नक्षत्रमंडले।रविर्यावन्न दृश्येत समयाध्युषितं च यत्।रेखामात्रं तु दृश्येत रश्मिभिश्च समन्वितः।उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत्।तत्र वाजसनेयिनां नियमेनानुदितहोमः।
सूर्ये हि वा अग्निहोत्रमित्यारभ्य तस्मादुदितहोमिनां।विच्छिन्नमपिहोत्रं मन्यामह इति उदितहोमा लिंदापूर्वकमनुदितहोमसमर्थनात्।तथा तस्मान्तं त्राणां छंदोगादीनामपि।आश्वल
दीनां तूदितहोमः।तथा चैतरेयकब्राह्मणे अनुदितहोमनिंदा श्रूयते।प्रातःप्रातरनृतं ते वदंति पुरोदयं जुह्वति येऽग्निहोत्रं।दिवाकीर्त्यमदिवाकीर्तयंतः सूर्यो ज्योतिर्न तदा ज्योतिरेषामिति
।। ।।होमद्रव्याणि च स्मृत्यंतरे प्रदर्शितानि।दध्ना तंडुलैरक्तैर्वा नदन्नावश्यामाकनीवारवेणुयवकंदमूलफलादीनीति।तंडुलग्रहणं व्रीहियवोपलक्षणार्थः।अत एव श्रुतौ।व्रीहिभि
र्यजेत यवैर्वा यजेतेति।वेणुयवा वेणुबीजानि।आकृतिपरिमाणं च स्मृत्यर्थसारे।व्रीहीणां च यवानां च सतमाकृतिरिष्यते।व्रीहिवद्देवतं तंडुला अपि यवाः धान्यं [illegible] राकृतापः
रिकीर्तितं।तिलानां तदर्धं स्यात्तदर्धं स्याद्घृतस्य तु।यावति प्रदेशे गव्यसंख्याकास्तिला तिष्ठंति तदर्धदेशव्यापि घृतमाकृतिर्नवनीतस्यार्थः।एवं सायंप्रातर्नियतहोमो निर्वर्तनीयः।होमक

धार्युः स्म४ ध४

ल्पीसादर्शिता॥ स्मृत्यर्थसारे॥ यजमानः प्रधानं स्यात्पत्नीपुत्रश्च कन्यका। ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु। पत्नी कन्या च जुहुयात्
पितापर्युक्षणक्रिया। आसमन्तादुदंपयोः हातव्यं नर्चगादिना। द्वयोरप्यसमक्षं चेत्स्वेहुतमनर्थकं। संनिधेयजमानं स्यादुद्देशत्यागकारकः। असंनिधौ तु पत्नी स्यादुद्दे
शत्यागकारिका। असंनिधौ तु पत्न्यास्याद [illegible] त्वदनुज्ञया। तस्मादप्रसवे चैवं कुर्वीतानुज्ञया विना। नानुपवासी प्रवासस्थात्पत्नी धारयते व्रतं सर्वदा यजमानो वा यजेन्नहि
स्वश्रुतिः। अग्नि [illegible] मन्त्रविराधादर्शितिः। कात्यायनेन तु रूपं स्पष्टातावेव पाणिसूर्या [illegible] दारुतिः। अयदि तु निर्म [illegible] नंतं कुर्याद्घृतादिना। मुखेनेव धमेदग्निं मुखादेनो [illegible] न
जायते। तथा। नाग्निं धमेन्मुखेनेति वाक्या लौकिके योजयंतित दिति। यदि मुखेन धमनं तदानं लिकादिव्यवधानेन साक्षादिति ज्ञेयं। बोधायनः। आसायं कर्मणः प्रातराप्रातः सायक
र्मणः। आजुहोति नित्यं ह्येतत्पार्वणं पार्वणं तरात्। मित्रायणीयपरिशिष्टे। सायं प्रातर्होमस्य पायायजकायास्त्वाग्निहोत्रेणातव्यं समस्तहोमानपथ्यस्तथादिरात्रयायाबद्धा
त्रार्द्धमासायाः मासायाग्निहोत्रं मजुहुतः तस्माद्ययात्वरः आमयावापत्नी वर्षमा सायाग्निहोत्रं जुहुयात्पक्षादौ त्वार्वणोतयासंचप्रातरत्तत्वचतुर्दशीचतु
र्गृहीतानि समस्य नयनमेकाः समस्तस्थोमः समस्त्यानमार्जनमिति पक्षादौ यजनीयमिति प्रतिपदि पर्वणांतपर्वांते अमावास्याद्यायोपस्त्वेयं अन्वा
धानादिने अत्र पर्वांते सायंकाले चतुर्दश पंचदश वा आगामीदिनपरिगण नेनस्वशाखोक्तप्रकारेण वर्तव्यं दीनिरुक्तौ युपादाय समस्तं समार्जना
दिकं विधायसमस्तहोमः कर्तव्यः। देशकालकर्तृद्रव्यनाशविषमे कलावते। एवंपश्चादौ यजनीयमित्यग्निप्रातः। एतद्योगेण कालात्ययेण पक्षहोमश्रद्धेवाक्
मैया उक्तं च प्रवासादिनिमित्ते च वेदितव्यानसर्वदा। एवं हि द्विरादिदिनार्थानि मित्तसद्भावे तन्त्रेण होमो तत्वनिपक्षहोमविशेषमाह। मरीचिः। पक्षहोमानयोदत्वाग
वाकस्मान्निवर्तितः। होमद्वयं प्रकुर्वीत तस्ये ब्रमसा होमनाकूा। पक्षहोमानि च्युपलक्षणं। अतान्यत्रापि प्रवासवा अत्र च सायं होम [illegible] द्वयं स्वीकृत्य तां हविषेव नत देवप्र
तर्होमिमपिनान्यतुयतः सायमुपक्रमः। प्रातरपवा गायिमेक एव प्रयोगः। एकस्मिंश्च प्रयोगे प्रक्रांते द्रव्यपरित्यागेन द्रव्यांतरस्वीकरणं न युज्यत इति बोध्यं। एवं वा कयमी
मांसायाममीमांसिमीमांसाकेः। अथादेवासायंहोमं प्रगृहीतद्रव्यं प्रातर्होमिनप्राप्त्यात्। तदा द्रव्यप्रतिनिधित्वं तद्द्रव्यांतरं गृह्णीयात्। तत्रैवाबीद्यादिमध्ये अतंतमंत्रार्थंप्रतिनि
धिद्रव्यांतरे प्रकृतिद्रव्यावयववात्तावातुप्रतिनिधेः प्रकृतिद्रव्यावयवसंभवात्। एतदपि प्रतिनिधिर्प [illegible] निर्णीतां स्मृत्यर्थसारे। हव्यार्थं गोघृतं त्याह्यं तदलाभे तु माहिषं। आजं वा तदला

ये ८

मदनपाप

~य २

२५

त्रिवर्सक्तां तैलं गृह्णीयते । तिलास्तावेशहीतवं तैलं । तिलसंभवं तदलातेन सीस्नेहः कौसुंभः सर्षपाद्भवः । वृक्षस्नेहाद्यलाद्याद्यः [illegible] वर्जितेपरः परः । तदलात्तेयवब्रीति

समाचरेत राड्वं । पिष्टमालोड्यायलेन घृतार्थीयाजे सुधीः ॥ इत्यातैलेषु पुन्नागनिबिरांडाद्भवं चूजनु । यूषांकषांचिदिन्द्रियेषांद विशामप्यसंतवे । सर्वथाज्यमुपादयेन्नर

कजायमुतेनर्मता तु । अथ प्रसंगात्सर्वतैलनित्यनैमित्तिककाम्यप्रियोगितया मुख्यकालातिक्रमे गौणकालो निरूप्यते । निष्ठाको मुख्यः । का वा गुणः । उच्यते । यथा विहितः

समुख्यः । यथाहुः द्विश्राद्धादौ ज्ञातरादिः । यश्च विहितस्तस्मीपवर्ती उपरितनास्त्व [illegible] वकर्मस्थं गच्छं नीयमानः सगवादिकालः सगौणः । तदाजस्थिकांडमंडनमिश्राः । स्व

कालाउत्तरागौणः । कालः पूर्वस्य कर्मणः । यत्रागामिक्रियायामुख्यः कालस्याप्यंतरालवत्तु गौणकालं च मि [illegible] छंति केचित्प्राचनकर्मणीति । अस्यायमर्थः । पूर्वोत्तरयोः

कर्मणोर्मध्ये पूर्वस्य कर्मणः स्वकालाउत्तरस्योत्तरायः कालः उत्तरकर्मकालावधिकां स पूर्वकर्मणो गौणः कालः । अथवा आगामिक्रियायां उत्तरक्रियायां यामुख्यः का

लक्षस्यापि प्राक्तनकर्मणो गौणावउत्तरकर्ममुख्यकालोपि पूर्वकर्मणो गौण इत्यर्थः । नत्तरकर्ममुख्यकालः पूर्वकर्मानुष्ठानेन हि न स्वीकर्तुमुचितः । तथाहि ।

पूर्वकर्मतावत्स्वकालात्प्रच्युतं विनष्टप्रायं तत् उत्तरकर्मकाले क्रियमाणेन तस्मा उत्तरकर्मापसारयुतिनतः स्वकालच्युतं तदपि नष्टरूपं भवति । उत्तरक

र्मकाले यदि क्रियते । न हि विनष्टसमारोधमस्तं प्रसज्यते । सत्यं बाढमेवं । उत्तर कर्मकाले पूर्वनिरयोः कर्मणोरवकाशो सति इदमुच्यते । नत्वनरसती निरोध

: । एवं स्थिते विचार्यते । किमयं गौणकालः सर्वेषां नित्यनैमित्तिककाम्यकर्मणां मुख्य कालासंतवे अंगं नतलनति । तत्र ब्रूमः । काम्यवर्जं नित्यनैमित्तिकानि सर्वाण्यपि

मुख्यकालातिक्रमे गौणकाले कर्तव्यानीति । आवश्यके षु नित्यनैमित्तिकेषु यथाशक्ति कुर्यात्तथा कुर्यात् । इत्यभिधानात् विहितांगमावेनत सहद्यादतिनिषिग्रहणस्यायमायात्

मुख्यकालातिक्रमे गौणकाले [illegible] ग्राह्यः । तथा च मंडनमिश्राः । मुख्यकालेयदावश्यं कर्म कर्तुं न शक्यते । गौणकालेपि कर्तव्यं गौणोप्यत्रेदृशो भवेत् इति । इदं च मुख्यकालः सद्य

: । अत्रापि विशेषमाह निवोकाः । गौणेष्वतक्रकालेषु धर्मवादितमाचरेन्नु । प्रायश्चित्तं प्रकरणप्रोक्तं निष्कृतिमाचरेत्तु । निष्कृतिं प्रायश्चित्तं । तथा प्रायश्चित्तमप्यत्र चाव गौणकाले स

मावरेत् । आदिशकालत्रा [illegible] प्रायश्चित्तकारणमकरणं चेति व्यवस्था । तथा च स्मृत्यंतरमपि । यथाकथं चिद्विवर्तं च विध्यकर्म विजानता । न प्राप्तस्य विलोपो स्ति गौण कस्य वि

ख्यापनं इति । तथा दिवादितानि कर्माणि प्रमादादकृतानि वै । यामिन्याः प्रहरं यावत्तावत्सर्वाणि कारयेदिति । आह्नविनाशः । संध्यमराचे [illegible] कर्तव्यं [illegible] नतु विच गौणेरिति । सं

कार्द

कार्य २ ५८

२५

पुत ५ काम्येषु स्मेव २ नि

धर्म्यां रात्रौ च श्राद्धं न कर्तव्यं इत्यर्थः। एतदुक्तं भवति। यथा शास्त्रानुयायित्वाद्दा कार्यात् हि शुक्लचक्रवाकैर्न गौणस्वीकारः। नित्यनैमित्तिकेषु यथा राहुग्रस्ते [illegible] सूक्ष्मगौणपरिग्रह इति
तथा चापेतन सिं। प्र [illegible] नस त्रिंशमंगानि [illegible] भवति न भवंति चेत् तिकाम्येषु प्रश्नेन संविवत्वमितरत्रासंविवत्वं [illegible] सदृशं। अभ्यनमिवांगा अपि मुख्यानां गौण [illegible] चर्यः। यद्यपि
तर्हि दर्शपौर्णमासपार्वणश्राद्धादीनाममावास्यादिविहितकालातिक्रमे तदनंतरं गौणकालकर्तव्यता प्रसज्येतेति चेत्। अस्तु नाम का नो हानिः। गौणकालस्वीकारवादिनां। एवं प्रा
प्तसिद्धांतात्तिथ्यनाकाले दिक्कर्म विधीयते न कर्मणि कालः। यस्येच्छा विनियोगार्हत्वं तदुपादेयं। अनुपादेयं तद्विधेयं। कालश्च स्वेच्छाकर्तुं न शक्यः। अत एवानुपादेयपंचकमध्ये मी
मांसकैः कालः परिगणितः। अतः कालोद्देशेनात्र कर्म विधातव्यं। तथा च कालो निमित्तं निमित्ते कालो सावधिकारस्तावत्कालांतरे त्वतमकृत मे भवति गौणकालग्रहणं नोचितं तावदिति [illegible] काल
सावेवाधिकारस्तावत्। संतपनाधिकरणे प्रापणाच्च निमित्तस्य यस्मिन्सूत्रे प्रतिपादितं लोगाक्षि शिरपि गौणस्यापरिग्राह्यत्वमाह। गणितामायातकालः। कालेतिष्ठति तावता [illegible] र्चैका
कृतिः कालेनाकालेल द्वाकाटयाः। यत्तु मंडनमिश्रैरभिहितं गौणकालेपि कर्तव्यो गौ णोप्येवेहशास्त्रे वेदितो तत्कृदिवादितानि कर्माणि इत्यादिना यत्र [illegible] गौणकालास्यानु
ष्ठानं वाचनिकं तद्विषयं। अतः मंडनमिश्राः। मुख्यकाले हि मुख्ये वे साधनं तत्र बलत्त्व तोत कालद्वययोः कस्य मुख्यत्वं गौणनापि वा मुख्यकालमुपाश्रित्य गौणे [illegible]
त्सु साधनं नं न मुख्यद्रव्यलोतेन गौणकालप्रतीक्षणं इति। यत्तु यथा कथंचित् कर्तव्यं नित्य कर्म विजानतेति तस्यायमभिप्रायः। स्वकालप्राप्तस्य कर्मणो मुख्यद्रव्याभावेन विलं
बेन कर्तव्यः अपि तु मुख्यकाल एव मुख्यद्रव्याभावेपि प्रतिनिधिद्रव्येण कर्म निर्वर्तनीयमिति अतो वचनमंतरेण संवत्सरर्तुमासतिथ्यादिकालविहितानि कर्माणि स्वकालातिक्रमः
कालांतरे कर्तुं न युज्यते। अपि तु तदतिक्रमप्रायश्चित्तमेव कुर्यात्। यत्र गौणकालानुष्ठानं दृश्यते तच्छिष्टपरिहाराय स्वमनःपरितोषाय चेति सर्वमनवद्यं। इति मुख्यगौणकालनिर्णयः॥॥
॥छ॥ ॥ अथ समावर्तनप्राशिरागमनेषु शुक्रकालादि तन्निर्णेष्वेरः। विशाखे सु सगाप्रसूतक्षत्रिनी मार्गे विष्णुन्नान्विता फाल्गुने प्रियवल्लभ प्रियतमा नित्यप्रिया उत्तरेणी। वंध्या निर्धना दुर्भगा
विरहिणी सोद्विग्ना नियता नूनं दवसमाप्तिः खमंडलं लेते न मासगता। मार्गफाल्गुनवैशाखेषु शुक्लपक्षे शुभे दिने। पूर्वादि च विशुद्धो स्या नित्यं पत्नी द्विरागमः। बादरायणः। नीहाराश्रु धने
नराद्विति गुरुस्ते [illegible] पानुराधा अश्विनी। राको भास्कर विष्णु वायु वरुण वाष्ट्र प्रशस्ततिथौ। कुंभाजालिगतो वौ शुक्रके प्राक्प्रोदये तारा विजीवास्तु [illegible] नां दिने नववधूसप्रवेश आ [illegible] कुर्यात्
शीतगो वरहिमकरेणाःसंगतत्तारा वा स्यैकोल्वदा गजेश्चतदिने मध्ये [illegible] ततेरहिबांदिकपति शीतगु गुरु बुध सितो [illegible] दिदिक्पालाः वाणी नाख्येण शालिनी नववधू नत्योस

द्वि

था

पु

मप

5।

मदनपा० २६ द्वि

विंदेदिति ॥ सर्वेनास्त्युदितश्लोके प्रपायादक्षिणापरा पश्चाद्स्मृतितस्वैव यायात्स्वावनितारदिनो ॥ स्वसवनपुनः प्रवेशोदि[illegible]नो विज्ञेवेतयोर्द्वाहे ॥ नववध्वागृहगमने प्रतिशुक्रविचारणा
नास्ति ॥ इति द्विरागमनं ॥ अथाधिवेदनं ॥ ॥ तत्र मनुः ॥ मद्यपासत्यवृत्ता च प्रतिकूला च या भवेत् । व्याधिता वाधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदा ॥ मद्यपेति य[illegible]नीयायन्निषिद्धं मद्य
तत्पानकर्त्री तिधीयते । असत्यवृत्ता असाध्वाचारा प्रतिकूला भर्तुरनिष्टकारिणी । हिंस्रा पुत्रदास्यादिताडनशीला । अर्थघ्नी अपेक्षादिना अर्थविनाशकारिणी । अधिवेदनं पत्युर
न्यविवाहः ॥ याज्ञवल्क्यः ॥ सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा । स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ धूर्ता वंचनप्रधाना । स्त्रीप्रसूः स्त्रीमात्रजननी । अधिवेदनप्रतीक्षणका
लमनुनोक्तः । वंध्याष्टमेधिवेद्याब्दे दशमे तु मृतप्रजा । एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥ अधिवेत्तव्येति विशेषः । देवलः । आर्त्तां देताष्टवर्षाणि तानि प्रसवां स्त्रियं दश
वंध्यां वतिद्वांस द्वादश स्त्रीप्रसविनी ॥ ततो विंदेत विधिना पुत्रार्थी धर्ममस्त्रियं । उक्तला नात्परं लोके नास्ति हि प्रसवादिने । अतिप्रसवाप्रसवं तु धर्मस्तु तद्योग्यं कालमतिक्रा
ता निंद्यास्त्रिया दियुक्ता । प्रसवाः फलानि तत्पुत्रा एका[illegible]तिकामाधर्ममियां तद्धु यद्गच्छति समर्थश्चे पुत्रेच्छार्थी पूर्वोढामपरोवहेत् । अष्टादशकालप्रतीक्षाविकल्पो
वयः शक्त्यपेक्षया व्यवस्थितो बाध्यवः । समर्थश्चेन्नमपि[?]थेरियत्रार्थेरिस्युप लक्षणां अतत्रपर्यानरेणापि सा परितोषणीया । यथाह अधिवेदननिमित्तेषु न
कालविशेषः श्रूयते । तदा यावता कालेन न दोषनिश्चयो भवति तावत्कालं प्रतीक्ष्य त । याज्ञवल्क्यः । अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं । न दत्तं स्त्रीधनं यस्यै द
त्तेऽर्धं प्रकीर्तितं । आधिवेदनिकं अधिवेदनप्रयोजनमलंकरणादि यस्यै पूर्वविवाहे स्व मपि स्त्रीधनमलंकारादि न दत्तं तस्यै समं दातव्यं पश्चादूह्यमानायै यावद्दीयते तावदि
त्यर्थः । दत्ते तु स्वर्णमेवालंकारादिके अंतेत्वर्धं अत्रार्धशब्दो शमात्रपरो न तु समांशपरः । पूर्वस्यै दत्तमलंकारादिकं नवोढालंकारान्यूनं वेद्या च तावन्मात्रं भवति तावद्दातव्यमित्यर्थः । म
नुः । अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् । सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ । याज्ञवल्क्यः । अधिविन्ना तु भर्तव्या महदेनोन्यथा भवेत् । यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते
मनुः । वतस्तु परित्याज्याः शिष्टागुरुगा च या । पतिघ्नी च विशेषेण जुंगितोपगता च या । जुंगितः प्रतिलोमजः । स्वल्पविशेषमाह याज्ञवल्क्यः । [illegible]नाधिकारा भत्तिः नापिंडीमात्रोपजीविनी
परिस्त्ताम अधःशय्यां वासयेद्व्यभिचारिणीं ॥ इत्यधिवेदनं ॥ ॥ अथ स्त्रीधर्माः ॥ ॥ तत्रादौ तासामवश्यरक्षणीयत्वं प्रदर्शयति । तत्र मनुः । प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः । स्त्रियः
स्त्रियश्च गेहेषु न विशेषोस्ति कश्चन ॥ उत्पादनमपत्यस्य जातस्य परिपालनं । प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबंधनं ॥ अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा । दाराधीनस्तथा स्वर्गः पि

श्च न

२६

हृणामात्मनः स्थिरहा। तस्माद्यत्नेन राज्ञ[illegible]ग्यामनुरब्रवीत्। आरक्षन्त्राः स्त्रियः कार्याः सुरूपेश्च दिवानिशं। विषये षुत्र सज्जंत्यः संस्थाप्या आत्मनो वशे। पिता रक्षति कौमारे भर्ता रक्षति यौवने। पुत्रो रक्षति
वार्द्धिके न स्वातंत्र्यं क्वचित् स्त्रियः। नारं ताः पानं दुर्जनसंसर्गः पत्या च विरहोटनं। स्वप्नो न्यगेहे वासश्च नारीणां दूषणानि षट्। नैता रूपं परीक्षंते नासां वयसि संस्थितिः। सुरूपं वा कुरूपं वा पुमानित्येव भुं-
जते। एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजं। परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति। शय्यासनमलंकारं कामं क्रोधमनार्जवं। द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत्। यादृग्गुणेन भर्त्रा स्त्री संयुज्-
येत यथाविधि। तादृग्गुणा सा भवति समुद्रेणेव निम्नगा। अथ रक्षोपायः। न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुं। एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुं। अर्थस्य संग्रहे चैनां व्यये चैव
नियोजयेत्। शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे। ॥ अथ स्त्रीकर्तव्यधर्माः॥ तत्र मनुः। बालया वा युवत्या वा वृद्धया वापि योषिता। न स्वातंत्र्येण कर्तव्यं किंचित्कार्यं गृहेष्वपि। पित्रा भर्त्रा सुते-
नापि नेच्छेद्विरहमात्मनः। एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले। सदा प्रहृष्टया भाव्यं गृह- कार्येषु दक्षया। सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया। याज्ञवल्क्यः। संयतोपस्करा दक्षा
हृष्टा व्ययपराङ्मुखी। कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा। स्त्रीभिर्भर्तृवचः कार्यं एष धर्मः परः स्त्रियाः। आ शुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः। मनुः। विशीलः काम-
वृत्तो वा गुणैर्वा परिवर्जितः। उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः। नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं। पतिं शुश्रूषते येन तेन स्वर्गे महीयते। पत्यौ जीवति या स्त्री
उपोष्य व्रतचारिणी। आयुष्यं हरते भर्तुर्नरकं चाधिगच्छति। पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा। पतिलोकमभीप्सन्ती नाचरेत् किंचिदप्रियं। मृते जीवति वा पत्यौ
या नान्यमुपगच्छति। सेह कीर्तिमवाप्नोति मोदते चोमया सह। व्यासः। प्रसुप्तं सुखमासीनं रममाणं यदृच्छया। आंतरेष्वपि कार्येषु पतिं नोत्थापयेत् क्वचित्। स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शये-
त्। स्ववाक्यं श्रावयेन्नापि यावत्स्नाता न शुद्ध्यति। सुस्नाता भर्तृवदनं वीक्षेन्नान्यस्य कस्यचित्। अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत्। हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा। कूर्पासकं
च तांबूलं मांगल्याभरणं शुभं। केशसंस्कारकबरीकरकर्णविभूषणं। भर्तुरायुष्यमिच्छंती दूषयेन्न पतिव्रता। न रजक्या न कारुक्या तथा श्रवणया पि वा न च दुर्भगया क्वापि सखित्वं कार-
येत्। भर्तृविद्वेषिणीं नारीं न संभाषेत कर्हिचित्। नैकाकिनी क्वचिद्भूयान्न नग्ना स्नाति वै क्वचित्। नोलूखले न मुसले न वर्धन्यां दृषद्यपि। न यंत्रके न देहल्यां न स्त्री चोपविशेत्क्वचित्।
उक्ता प्रत्युत्तरं दद्यान्नारी क्रोधतत्परा। सा शुनी जायते ग्रामे सृगाली निर्जने वने। अत्यवादं न वक्तव्या कलहं दूरतस्त्यजेत्। गुरूणां संनिधौ क्वापि नोच्चैर्ब्रूयान्न च वादयेत्। ताडिता ता-
डयेच्चेन्न व्याघ्री ह्येषा दर्शिका। कटाक्षैर्वीक्षते याऽन्यं भर्तारं कुपितादिवा। केकराक्षी भवेत्सा तु नूनं तत्रैव नात्र संशयः। भर्तारं या समुत्सृज्य मिष्टमश्नाति केवलं। ग्रामे सा सूकरी वा स्यादुद्दीवा

स्वविष्टक्तुकुर्यात् ॥ याज्ञवल्क्यः ॥ पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिं ॥ शंखः ॥ न हस्ताद् गृहान्निर्गच्छेत् ॥ नानुत्तरीया न त्वरितं व्रजेत् ॥ न परपुरुषं य
संभाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यः ॥ न नाभिं दर्शयेत् ॥ आगुल्फाद्वासः परिदध्यात् ॥ न स्तनौ विवृतौ कुर्यात् ॥ नाहसेदपावृता ॥ न भर्तारं तद्बन्धून्वा द्विष्यात् ॥ न गणिकाधूर्ताभिसारिणी
प्रव्रजितप्रेक्षणिकामायामूलकुहककारुकाकुशीलादिभिः सहैकत्र तिष्ठेत् ॥ संसर्गेण हि चारित्रं दुष्यतीति ॥ अयं च सकलस्त्रीधर्मो विवाहादूर्ध्वं वेदितव्यः ॥ अथ पतिव्रताविशेषधर्माः ॥
तत्र मनुः ॥ कन्यां विवाहसमये वाचयेदिति द्विजाः ॥ सहधर्मचरी त्वं मे जीवतो जीवतापि वा ॥ तत्र दैवगुरुत्वं धर्मतीर्थव्रतानि च ॥ तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत् ॥ तुं क्रोशपातोयाकुह्यासी
नाथापि वासिते विनिर्जिते विनिद्राति प्रथमे परिबुध्यते ॥ अनलंकृतमात्मानं पत्युर्न दर्शयेत् ॥ विना कार्याण्यभिलषिते पथ्यो सर्वमंडनवर्जिता ॥ न च तं नाम गृह्णीयात् स्यायुष्यवृद्धये पुरुषा
तरनामानि न गृह्णाति कदाचन ॥ अकृष्टापि न चाक्रोशेत्ताडितापि प्रसीदति ॥ इदं कुरुष्वेति । स्वामिन्सम्पन्नतामिति न कथयेत् ॥ आहूता गृहकार्याणि त्यक्त्वा गच्छति तत्परा ॥ पूजोपकरणं सर्वं स्व
ऊक्ता शोषयेत्स्वयं नियमोदकबर्हिष्यपुष्पाक्षतादिकं ॥ सेवते भर्तुरुच्छिष्टं मृष्टमन्नफलादिकं ॥ महाप्रसाद इत्युक्त्वा पतिदत्तं प्रयच्छति ॥ द्वारात ॥ मार्जयेत्कंचैव यत्रैवै
वश्रदीयते ॥ कुलत्रयं पुनात्यत्र सर्वनारीयानुगच्छति ॥ अयं च सर्वोऽस्त्रीणां पतिव्रतानां मगर्त्तिणीनामबालापत्यानां साचंडालसाधारणो धर्मः ॥ अपतिव्रतादीनामनधिका
रात् ॥ ननु च अपतिव्रतादीनामप्यधिकारोऽनुगमे श्रूयते ॥ तथा च मदनसारे ॥ व्यवमि । च व स्य । पूर्वं पतिं द्विष्टेन चेतसा ॥ वर्तन्ते याश्च सततं भर्तॄणां प्रतिकूलतः ॥ भर्तृमरणे
कालेया कुर्वन्ति तथा विधे ॥ काम क्रोधभयान्मोहात्सर्वाः पूता भवन्ति ताः ॥ आदिपुराणे ॥ व्यापत्सु प्रियपरायणा ॥ ऊर्ध्वं गच्छति सा तत्र सह तेन मरणं गतेति ॥ नितस्मारं उ नत्राद्दअव
णात् ॥ सर्वाः पूता भवन्त्विति ॥ पद्यवमानकर्त्रादीनामपि पापक्षयोक्तिः किंमुतादिप्रस्तुति कुसाध्वीनस्याः पापक्षयः परलोकाद्धितन्शतिसाधनम् अन्नमलोकप्राप्तिविधायकवाक्यशेषत्वे
नापि वेरितार्थत्वात् ॥ साधारणधर्मत्वं च सर्वनारीयानुगच्छतीत्यविशेषापादानात् ॥ भवत्यते यानि च ब्राह्मण्यनुगमननिषेधपराणि पैठीनसांगिरःप्रस्तृतीनां वाक्यानि मृतानुगमनं नास्ति
ब्राह्मण्या ब्राह्मशासनात् ॥ जातिब्राह्मणजातीया मृतं पतिमनुव्रजेत् ॥ सा स्वर्गमात्मघातेन पतिं न नयेदित्येवमादीनि ॥ तानि पृथक्चितिविषयाणि ॥ पृथक्चितिं समारुह्य न विप्रा गंतुमर्हति ॥
अन्यासां चैव नारीणां स्त्रीधर्मोयं परः स्मृतः इत्युशनसा विशेषस्मरणात् ॥ इदं चान्वारोहणमनित्यं ॥ अन्वारोहणस्य स्वर्गादिफलयुक्तत्वेन काम्यत्वात् ॥ अत एव विकल्पमाह विष्णुः ॥ मृते भर्तरि ब्र
ह्मचर्यं तदन्वारोहणं वेति ॥ अन्वारोहणस्य स्वर्गादिफलयुक्तत्वेन काम्यत्वात् वेति दिशांतरमृतपत्यो ब्राह्मण्याः स्यादस्त्येति ॥ सहानुगमनं सर्वत्र चान्यासां तु अस्थानि बिभ्यति सा प

पा स्त्रि ३

पु०५०८

कादिकं वा किमपि गृहीत्वा विज्ञानावेपि लवति। यद्यकृत्यविषयकज्ञानानुमेतत्तु पतिव्रताया इयमनुगमनं नित्यमेवात्तथाहारीतः। आर्तातीर्थसु दिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत
या पत्यौ सा स्त्री ज्ञेया पतिव्रता। अत्र मृते या म्रियेत सा पतिव्रतेत्यनेन न नित्यत्वं बोध्यते। अत एव नित्यत्व व्यवस्थितमनुक्तमिति वत्। मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्छत्य
पुत्रापि यथा ते ब्रह्मचारिणः इति मनुना पतिव्रताया अनुगमनस्याप्यनित्यत्वात्। अत्र साध्वी चेन न पतिव्रताया निषिध्यते अन्यथा ब्रह्मचर्ये व्यवस्थितेत्यनेन पौनरुक्त्यप्रसङ्गः। तथा
च महाभारते सगुवाच्यासः। पतिव्रतायाः सत्याः अग्निप्रवेशं दर्शयति। नत्वग्निप्रवेशेन पतिव्रतात्वं। पतिव्रता संप्रदीप्तं प्रविवेश हुताशनं। तत्र चित्राङ्गदधरं भर्तारं सा च पश्यतेति। न च न
स्मादु हन्तुरायुषः स्वः कामप्रियादिति श्रुतिविरोधः। विषयभेदात्। श्रुतिर्हि सामान्येन शास्त्रविहितस्वेच्छामरणं निषेधति। स्मृतिस्तु सति मृते भर्तरि न प्रवरा विशेषणा मविशेषनिषेधे
तावि[ष]यपर्यवसानादविरोधः। यथा न हिंस्यात् सर्वा भूतानि इति सामान्यशास्त्रमग्नीषोमीयं पशुमालभेतेति विशेषणशास्त्रविषयमुत्सृज्य प्रवर्तते तद्वदत्रापीति न कश्चिद्विरोधः। न च
ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः। पुनात्यविधवा नारी तमादाय म्रियेत या। इत्येवमादिहारीतादिवाक्यानि ब्रह्महत्यादिदोषनिवृत्तिमनुगमने नाभिदधति। एतदनु
पपन्नं। शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादिति न्यायेन पूर्वफलयोः कर्तृसमवेतत्वात्। पतिगतदुरितक्षयस्य पत्नीगतानुगमनेनानुपपत्तेः। निवृत्त्यस्य प्रमाणमेव कार्यका
रणयोः सामानाधिकरण्यं शास्त्रसिद्धं बाध्यत इति चेन्न वा। ब्रह्मघ्नो वेत्यादीनि वाक्यान्यनुगमनविधिशेषत्वेनार्थवादत्वादनुगमनेस्य प्राशस्त्यं बोधयन्तीति। अतो न स्वा
र्थे प्रमाणानि। युक्तमेवार्थवादत्वं ब्रह्महननादिदोषदुष्टस्य पतित्वेनास्य संस्कारमेव तावन्न जहातीति दूरेऽनुगमनं। अतस्तत्पापस्य परणीति न काचिदनुपपत्तिः। एवं वा द्विविधं क
र्म प्रारब्धमप्रारब्धं चेति। तत्र प्रारब्धकर्मणां भोगादेव क्षयो नु प्रारब्धमपि अनुगमनरूपप्रतिबन्धकेन प्रतिबद्धं विद्यमानमप्यविद्यमानमिव सदुदास्ते। तथा चानुगमनफलस्वर्गादि
कमनुभूय पश्चात् प्रारब्धशेषमुपभुङ्क्ते। अप्रारब्धमपि कर्म द्विविधं फलदानोन्मुखमनुन्मुखं च। यदुन्मुखमप्रारब्धं कर्म तदनुगमनेनापनोद्यमेव प्रायश्चित्तेनेव। अपरथा पतिप
त्न्योः स्वर्गसाधनत्वेनोपादिश्यमानानुगमनेन साध्यस्वर्गानुपपत्तेः। पुनात्यविधवा नारी तमादाय म्रियेत यत्र वपुनातीत्येव दण्डुपदेशात् यत्फलदानायोन्मुखमप्रारब्धं कर्म तस्य
निवृत्तिरनुगमनेन नत्वन्तीयेन दवमनसि कृत्वा व्यासापाद्याद्यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः। सम्प्राप्तो यातनास्थानं गृहीतो यमकिङ्करैः। तिष्ठते विवशो दीनो वध्यमानोऽहि
तो कर्मभिः तत्रापि भर्तव्यो गन्तव्या तातान्यतः। परिवादात् खरो भवति श्वा भवति निन्दकः। परिनिन्दकः कृमिर्भवति कीटो भवति मत्सरी। अनवद्यातगुरुधनापसोक्ता परिसोका इ र

सौ. २

55

ब्रह्मचारी समादाय दिवं याति य सा व्रतादिति ५

मदनपा० २८

स्थानार्थं यत्नं न कुर्वीत नातिक्लिष्ट्या । सानारोनस्त्रैवैन मवरुह्यातिवादयत् । प्रतिवातेनुवातेव नासीत गुरुणा सह । असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् । शिष्यदेशाद्गुरुदेशं प्रत्यनुग

तावा अनुवातः । तत्रापि नासीत यदीरितं शब्दश्रवणात् । असंश्रवे अननुज्ञायां गौरवरोष्ठजात प्रसाद संस्करेष्ठ कटेष्ठ वा । आसीत गुरुणा सार्धं शिलाफलकनौष्ठु वा । गुरोर्गुरौ सन्निहिते गुरुवद्वृ

त्तिमाचरेत् । न वानुसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् । गुरोरा चार्यस्य समीपेषु स्वगुपाया दोसंनिहिते सति गुरुस्तुल्यां वृत्तिमाचरेत् । गुरुणा आचार्येणानुज्ञातः स्वान् गुरूनुपाध्यायादीनभि

वादयेत् । अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति । उत्सादनं तु गात्राणां स्नापनोच्छिष्टभोजने न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनं । गुरुवत्प्रतिपूज्यास्तु सवर्णा गुरुयोषितः । असवर्णास्तु

संप्रत्युत्थानाभिवादनैः । अभ्यंजनं स्नापनं च गात्रोत्सादनमेव च । गुरुपत्न्या न कार्याणि केशानां च प्रसाधनं । ५१ स्वकर्मसिः । यालस्यादीय थाव्यालं बलात् दूरते बिलात् । तद्धतूफलदा

नाननुत्तमुरर्वावे आरब्धकर्मणो गमनसाध्यस्वर्गप्राप्तेगानंतरमुपभुज्यत इति न विरोधः । न ॥ तु फलदानोन्मुखमप्रारब्धकर्मप्रायश्चित्तस्थानीयेनानुगमनेन यथा विनश्यतीति तथा फलदा

नोन्मुखमपि तेनैवापगच्छतु विशेषाभावादिति चेत् । न पुनातीत्युक्तपापनिवृत्तिः कल्प्यते । न्यायाच्चानुपपत्तिवशात् । सा चानुपपत्तिर्यावति कल्प्यते तत्र शाम्यति तावत् कल्पनीयं तथा च फलो

न्मुखप्रारब्धकर्मणोऽपि पुनातीत्यस्य चरितार्थत्वात् सकलपापनिवृत्तिः परिकल्प्य । नीया । यत्तु ऋतमेव तिष्ठेनानुगमनेनाल्पगतदुरितनिवृत्तिरयुक्तेति । तदपेशलं । पतिपत्न्योः

सहकर्तृत्वेनाग्निहोत्रादिसाध्यस्वर्गादिवदुपपत्तेः । इदं तु दुरितं जन्मांतरकृतमेव न निवर्त्येत । मन्यत्तदुरितयुक्तस्यापत्नीत्वेन तेन सहानुगमनानधिकारात् । विधवापालनं न पिस्वर्गा

दिफलविशेषः स्मृत्यंतरे स्मर्यते । पत्यौ मृते पि या योषिद्वैधव्यं पालयेत्क्वचित् । सा पुनः प्राप्य भर्तारं स्वर्गलोका समश्नुते । विधवाकबरीबंधो भर्तृबंधाय जायते । शिरसो वपनं तस्मात्कार्यं विधवया

सदा । एकाहारः सदा कार्यो न द्वितीयः कदाचन । त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा । मासोपवासं वा कुर्याच्चांद्रायणमथापि वा । कृच्छ्रं पराकं कुर्यात्तप्तकृच्छ्रमथापि वा । यावज्जीवनफलाहारैः शाकाहारैः पयो

व्रतैः । प्राणयात्रां प्रकुर्वीत यावत्प्राणाः स्वयं व्रजेत् । पर्यंकशायिनी नारी विधवा पातयेत्पतिं । तस्माद्भूशयनं कार्यं सुखं तिलोदकैः । तर्पणं कुर्यात्पैतृं सा व विषयं । विष्णोश्च पूजनं कार्यं पतिबुद्ध्या न वान्यथा ।

पतिमेव सदा ध्यायेद्विष्णुरूपधरं परं । यद्यदिष्टतमं लोके यद्यत्पत्युः समीहितं । तत्तद्गुणवते देयं पतिप्रीणनकाम्यया । वैशाखे कार्तिके माघे विशेषनियमं चरेत् । स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहु

: । एवं विधिश्च विधवा विधिरेष नियमव्रतैः । वैशाखे कार्तिके माघे नवमे वनि वाहयेत् । नाविरोहेदनड्वाहं प्राणैः कंठगतैरपि । कंचुकं न परीदध्याद्वासो न विकृतं वसेत् । अपृष्ट्वा च सुतान्नूनं किंचिन्न ५६

र्यजिति तत्परा । एवं धर्मसमायुक्ता विधवापि पतिव्रता । पतिलोकमवाप्नोति न स वेको पिदुःखिता ॥ ॥छ॥ ॥ ॥इति मदनपारिजाते मदनक्षितिपालदानजलकृष्टौ स्तबको द्वितीयश्चासीद्वसौ ।

सर्दु: स्त्रो रुप्यसमिद्धर्या नैवांगो इति न कार्यं स्त्रिया विधवया क्वचित् । गंधद्रव्यस्य संभोगो नैव कार्यः तया पुनः

तर्पणं प्रत्यहं कार्यं ॥१४

दरहास्यमंडितत्वमः॥ ॥ ॐ ॥—॥ मतिर्येषां शास्त्रे प्रसृतिरमणीयाप्यवहृतिः परा श्रीस्तेष्वाद्यं जगति निजवस्ते कतिपये। चिरं चित्तं तेषां मुकुरतलसत्ते स्थितिमियादियं व्यासारण्यप्रवरमुनि

शिष्यस्य सततिः॥ ॥ इति पंडितश्रीपारिजातकहारमल्लेत्यादिविरुदराजीविराजमानस्य श्रीमदनपालस्य निबद्धे मदनपारिजाताभिधे द्वितीयस्तबकः॥२॥ ॥ ॐ ॥—॥—॥ ॥

अथ गृहस्थस्तबकानंतरं गृहस्थोपयोगिचादाह्निकमारभ्यते। तत्र विष्णुः। गृहमेधिनियतो नः स्वर्गसाधनमुत्तमं। ब्राह्ममुहूर्ते चोत्थाय तत्सर्वं सम्यगाचरेत्। मनुरपि। ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चा

नुचिंतयेत्। कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च। विष्णुपुराणे॥ मित्रं प्रसाधनं स्नानं दंतधावनमंजनं। पूर्वाह्ण एव कुर्वीत देवतानां च पूजनं। मैत्रं मित्रदेवत्यं मूत्रपुरीषोत्सर्गः। प्रसाधनं केशानां

अंजनं सौवीराद्यंजनं। ब्राह्ममुहूर्तलक्षणं ब्रह्मचार्याचारप्रकरणे लिखितं। विष्णुः। उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं। मरणव्याधिशोकानां किमद्य निपतिष्यति। इति संचिंत्य देवानां स्मरेत्। काय

माउच्छिलायसु कीर्तितव्यो मधुसूदनः। कीर्तनं तस्य पापानि नाशमायांत्यशेषतः। स्कंदपुराणे। ऊर्ध्वं मुखचरणयुगलं दक्षिणमूर्तेश्च कुरुटस्वकर्षं। स्मरणमपि वाराणस्या निहंति दुःस्वप्नमपशकुनं

रेकात्यायनः। रोचनं चंदनं गंधं मृदं गां दर्पणं मणिं। गुरुमग्निं रविं पश्येत्प्रातरुत्थाय वहिः श्रीवि यंमुखरागं मन्निगां च पंचधा भिक्षिनंदीं। प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते। मूत्रपुरीषोत्सर्गं

दिविधिषु ब्रह्मचारिप्रकरणे लिखितं। अथ दंतधावनं। तत्र यमः। सुखपर्युषितनिर्यस्स दप्रयातानंतरं। तदर्हं काष्ठं शृंगं वा भक्षयेद्दंतधावनं। विष्णुः। कंटकी क्षीरवृक्षोत्थं द्वादशांगुल

मव्रणं। कनिष्ठिकाग्रवत्स्थूलं वा अथ वा सत्वक्पर्वकं। दंतकाष्ठस्याग्रं संचयित्वा प्रशिथिलावयवं कर्त्तव्यमित्यर्थः। इदं वा इति तत्कूर्चकमित्यपि पाठः। यदिदं तकाष्ठं पर्वयुक्तं भवति तदा पर्वद्वयम

धस्तागच्छिद्यात्तत्सपर्वकं। प्रशिथिलावयवं कर्तव्यमिति तात्पर्यं। दंतधावनं तयाग्रेण कर्तव्यं। तया चक्रमपुराणे। मध्यमांगुलसमस्थौल्यं द्वादशांगुलसंमितं। सत्वचं दंतकाष्ठं स्यात्तदग्रेण तु धावयेत्।

मनुः। तिक्तं कटु कषायं वा सुगंधि कंटकान्वितं। क्षीरवृक्षलतागुल्माद्भक्षयेद्दंतधावनं। कात्यायनः। उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः। परिजप्य च मंत्रेण भक्षयेद्दंतधावनं। मनुमाह विष्णुः। अ

युर्बलं यशो वर्चः प्रजापशुवसूनि च। ब्रह्मप्रज्ञां च मेधां च त्वं नो धेहि वनस्पते। इति गर्गः। दशांगुलं तु विप्राणां क्षत्रियाणां नवांगुलं। अष्टांगुलं तु विश्यानां इतरेषां षडंगुलं। चतुरंगुलमानं तु नारीणां

नात्र संशयः। विष्णुः। द्वादशांगुलकं विप्रे प्रथमाजन्मनि पार्थिवः। स्मृतविट्शूद्रजातीनां नवषट्चतुरंगुलं। एवं विकल्पः। परिमाणे तथान्येपि विविधं दंतधावनं। विशेषस्तेनेति वोक्तः। कनिष्ठिकाद्यतः स्मृतं प

वर्धितं तरुर्यकं दंतधावनमुद्दिष्टमित्यतः। सुसूक्ष्मं हीनदंतस्य समदंतस्य मध्यमं। स्थूलं विषमदंतस्य त्रिविधं दंतधावनं। गर्गः। प्राङ्मुखस्य धृतिः सौख्यं शारीरारोग्य एव च। दक्षिणेन तथा कां

पश्चिमेन पराजयः। उत्तरेण मदा नाशः स्त्रीणां परिजनस्य च। मार्कंडेयः। उदङ्मुखः प्राङ्मुखो वा कषायं कटु इति तिक्तकमिति। उदङ्मुखः प्राङ्मुखस्य इत्यर्थः। अन्यथा गर्गवचनविरोधात्। अनेनैवाभिप्रायेणा

मदनपा० २७

काद्यायनः॥ सर्वाण्येव दिग्योगे सर्वकामानवाप्नुयादिति॥ महाभारते दंतधावनप्रकरणे॥ प्रक्षाल्य हस्तौ पादौ वा सुसमाहितः॥ दक्षिणं बाहुमुद्धृत्य कृत्वा जानूंतरा ततः॥ मनुः॥ प्रक्षाल्येदं शुचौ देशे दंत
धावनमुत्सृजेत्॥ पतितं निर्मुखे समयत्नमाप्येयसंज्ञायं॥ यमः॥ आत्मनो लाभविप्राणाम् अपामार्गशिरीषयोः॥ तत्र येन्मातरुद्धायकथ्यात दंतधावने॥ पीलाशः॥ आम्रातकः॥ मार्कंडेयेपि॥ प्रातर्भुक्त्वा
यतवाक्कृत्वा येद्दंतधावनं॥ प्रक्षाल्य तत्त्यजेत्सर्वं प्रक्षाल्यैव विसर्जयेत्॥ नारदः॥ खदिरश्च करंजश्च करवीरकदंबयोः॥ सर्वकंटकिनः पुण्याः क्षीरिणश्च यशस्विनः॥ जंबूतिंदुकसूत्राश्वकदंबेलोध्रवं
पकाः॥ बदरीतिंदुकाश्चैव प्रशस्ता दंतधावने॥ कोविदारः करंजश्च कृतः लक्ष्म मालती॥ शालिकश्च प्रियंगुश्च तमालः॥ शाक एव वा शाकः शाकवृक्षः॥ शाकवन इति लोके प्रसिद्धः॥ आम्रातकोऽरिम
दश्च प्रशस्ताऽन्येऽपि वृक्षाः॥ वर्ज्यानि श्लेष्मलीपीलू लक्ष्यकिंशुकतिंदुकाः॥ अरिष्टाः पारसजीगुग्गुलुः शिंतिडीतथा॥ आसने शयने यानजानुकं दंतधावने॥ पातालाश्च बिल्वकोविदारौ सर्वकमसुकसि
त्तौ॥ अस्ताविदं तकाष्ठानां निषिद्धायां तिथौ तथा॥ अपां द्वादश गंडूषैः पवित्रं दंतधावनं॥ व्रतदर्श ॥प्रपष्ठमी दर्शपौर्णिमासंक्रमेषु वा नंदासु नवम्यां च दंतकाष्ठं विवर्जयेत्॥ श्राद्धे यज्ञे च नियमे
तथा प्रोषितभर्तृका॥ विष्णुः॥ प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च॥ नवम्यां भानुवारे च दंत काष्ठं विवर्जयेत्॥ मरीचिः॥ नाद्यादजीर्णवमथुश्वासकासज्वरार्दितः॥ तृष्णास्यपाकहृन्नेत्रशिरः
कर्णामयी तथा॥ वृद्धयाज्ञवल्क्यः॥ इष्टिकालोष्टपाषाणैर्न विरंगुलिभिस्तथा॥ मुक्त्वा चानामि कांगुष्ठौ वर्जयेद्दंतधावनं॥ वाराहपुराणे॥ अज्ञात्वा पूर्वं तत्रादंगकाष्ठान्याद्यानि यंत्रैश्च समन्वि
तानि॥ नद्युग्मवक्षानि न पाटितानि न चोर्ध्वशुष्काणि विना त्वचा वा॥ व्यासः॥ योमोहात्स्नानवेलायां तत्त्यजेद्दंतधावनं॥ निराशास्तस्य गच्छंति देवताः पितृभिः सह ते॥ अथ केशप्रसाधनादि मंगल्या वि
धिः॥ तत्र विष्णुपुराणे॥ स्नातकश्च ततः कुर्यात्सुमान्केशप्रसाधनं॥ आदर्शांजनमांगल्यदूर्वाद्यालं घनानि वा॥ ब्रह्मपुराणे॥ स्वमात्मानं घृते दृष्ट्वा यो ददाति द्विजे चिरजीविनां॥ तस्मान्नं ततः ललासं द्विपेन यथा
दितं॥ संधौ वापि यथा कुर्यादिति॥ प्रातः संध्यासमनंतरं॥ याज्ञवल्क्यः॥ अग्निः सूर्यदैवत्यं मंत्रोपमंत्रान्समाहितः॥ वेदार्थमधिगच्छेच्च शास्त्राणि विविधानि च॥ प्रातः संध्यावंदनानंतरं॥ अश्मीनापवनी
पदीवो वोपमनाग्निं वा विधिवज्जुहुयात्सूर्य तत्र उदुत्यं जातवेदसमित्यादिकां चयेत्॥ प्रातः संध्यासदिके ब्रह्मचारिस्त्वबके अपंचितां॥ हानविधिस्तु गृहस्थस्त्वनके अपंचितः॥ नरसिंहपुराणे॥ दिवसस्याष्टमे भागे
सर्वमेतत्समाचरेत्॥ दिवसस्याद्यभागे पूर्वाह्णिकस्याद्यभागे॥ दक्षः॥ द्वितीये च तथा भागे वेदाभ्यासो विधीयते॥ वेदस्वीकरणं पूर्वं विचारोध्ययनं जपः॥ तद्दानं च शिष्येभ्यो वेदाभ्यासो हि पंचधा॥ समित्पुष्प
कुशादीनां स कालः समुदाहृतः॥ उपादानस्येति शेषः॥ द्वितीयभागे पूर्वाह्णिकस्य द्वितीयभागे॥ ॥अथ पोष्यवर्गार्थचिंतादि॥ तत्र दक्षः॥ तृतीये च तथा भागे पोष्यवर्गस्य पोषणं॥ तृतीयभागे पूर्वाह्णिकस्ये
वापोष्यवर्ग्यः॥ माता गुरुः पिता भार्या प्रजा दीनाः समाश्रिताः॥ अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः॥ याज्ञवल्क्यः॥ उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये॥ ईश्वरमत्तिषेकाष्ठंदिगुणयुक्तं अन्यं वाश्री

२९

मंतं मकृसितं। अलब्धस्य प्रापणं योगः। लब्धस्य रक्षणं क्षेमः। अर्थागमः दत्तं तद्राजकुले द्रष्टव्यो राजपूजितो लोके। यद्यपि न सर्वं यथार्थस्तथाप्यनर्थो विलीयते। विष्णुपुराणे। नतः सुवर्णस्य धर्मेण तत्र
र्थं च धनार्जनं। कुर्वीत श्राद्धकर्माणि यजेत पृथिवीपते। ताम संस्था हविःसंस्था पाकसंस्था संहिता। धनाय तन्मनुष्याणां यतेत तद्धनार्जने। नारदः। धनमूलाः क्रियाः सर्वा यत्नस्तस्यार्जने मतः। रक्ष
णं वर्द्धनं भोग इति तत्र विधिः क्रमात्। महाभारते। धर्मेणार्थः समाहार्यो धर्मलब्धं त्रिधा धनं। कर्तव्यं धर्मपरमं मानवेन प्रयत्नतः। एकेनांशेन धर्मः स्यात् कर्तव्यो भूतिमिच्छता। एकेनांशेन कामः स्यादेकमंशं वि
वर्धयेत्। मार्कण्डेयः। पादेन तस्य पारत्र्यं कुर्यात्संचयमात्मवान्। अर्धेन चात्मभरणं नित्यनैमित्तिकान्वितं। पादं चाप्यर्थमर्थस्य मूलभूतं विवर्धयेत्। नारदः। तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च
कृष्णं तस्यापि विज्ञेयो विभागः सप्तधा पुनः। श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतं। धनं सप्तविधं शुक्लं ... पास्य तद्विधः। कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः। कृतोपकारादाप्तं च शबलं
समुदाहृतं। पार्श्विकं चैव चौर्यार्तिप्रतिरूपकसाहसैः। व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतं। तथा विधेन द्रव्येण यत्किंचित्कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च। श्रुतेन अध्ययनेन। यो
...जयादिना। तपसा जपहोमदेवतार्चनादिना। कन्यागतं कन्यया सहागतं श्वशुरादर्बलं। ज... शिष्यागतं गुरुदक्षिणादि। याज्यागतं आर्त्विज्यलब्धं। अन्वयागतं दायाद्यलब्धं। उदयं
... अनुवृत्तिः सेवना। पार्श्विकं द्यूतको वादिलब्धं। आर्तिः पीडया प्रतिरूपकं कृत्रिमस्वर्णरत्नादि। साहसं पोतनिर्याहणादि। व्याजेन छलव्याजेन तुलादिकृ
फलं। तद्विक्षिता हृता। ग्रहहरणार्थः। अनुवृत्तिः सेवना। ... त्रिविधं विज्ञेय क्रमागतं प्रतिदानं तथैवात्र प्राप्तं सह भार्यया। अविशेषेण वर्णानां सर्वेषां त्रिविधं धनं। वि
व्यायदुपार्जितं। सारधाजः। तत्पुनर्द्वादशविधं प्रतिवर्णाश्रयात्स्मृतं। साधारणं स्यात्त्रिविधं विशेषं नवविधं विधं स्मृतं। कुसीदं कृषिवाणिज्यं कारुशिल्पप्रयोगतः। व्यवहारतः कारकरः। विशेषिकं धनं ज्ञेयं वैश्यस्यापि
मिश्रं धनं विद्या ब्राह्मणस्य त्रिलक्षणं। प्रतिग्रहेणायलब्धं याज्यतः शिष्यतस्तथा। त्रिविधं क्षत्रियस्यापि ... विशेषिकं धनं तद्वती यथा। सार्वत्रामेव वर्णानामेष धर्मो धनागमः। विपर्ययादधर्मः स्यान्नदेव
शिल्पस्याः। तदिगौरचवाणिज्यैः शुद्रस्यापि चानुग्रहात्। इतरवर्णानुज्ञया शूद्रस्यापि विगौरचवाणिज्यैः ... त्रिलक्षणं। ... यावृत्तिस्तां समाच्छाय विप्रो जीवेदनापदि। याज्ञवल्क्यः। इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य वा
... प्रतिग्रहः। तत्र मनुः। अष्टैर्न वस्त्वानां मत्यहेणवावुनः। यावृत्तिस्तां समाच्छाय ...
ग्रजीयसी॥ ॥अथ प्रसंगादुक्तवृत्तिनीरतिधीयते। तत्र मनुः। अध्यापनं याजनं च प्रतिग्रहश्च याजनाध्यापनानि सर्वं तिनान्यस्य। अत एव विप्रस्तिविषयसप्तमी। अनन्यत्रताव विषया ब्राह्मणस्यैव प्रतिग्रहो
त्यग्रहो धिको विप्रयाजनाध्यापने तथा। अत्र चकारात्क्षिप्तोग्रहते। ब्राह्मणस्यैव प्रतिग्रहयाजनाध्यापनानि... शुश्रूषावसमाधेः। समासेन ब्राह्मणोऽनुवृत्तिरिति। तत्तु क्षत्रियवैश्ययोर्ब्राह्मणाशरीरयोरध्यापनमात्रं कर्तव्य
र्थं प्रवृत्तिरित्यर्थः। यस्तु गौतमेनोक्तं आपत्काले ब्राह्मणस्याब्राह्मणाद्विद्योपयोगेऽनुगमनं शुश्रूषा चेति। मनुः। ... कर्माणि यस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः। देवलः। त्रिविधो गृहस्थोऽ
स्यनुज्ञातं। नवत्तिर्येनास्ति धनं। अनुगमनं शुश्रूषा अनुगमनमेव शुश्रूषेत्यर्थः। मनुः। ... षट्कर्मा यस्य त्रीणि कर्माणि जीविका। ... धनधान्ययुक्तो शालायां लोकानुवर्ती स वै विधः। यथाह मनुः। कुशूलधान्यको वा स्यात्कुंभीधान्यक
यावरा। शालीनस्थ नतत्ताया वरो याजनाध्यापनप्रतिग्रहरहितैः वयवर्जनात्। शालीनस्तु ...

एवञ्च यदि हि कोपि चास्ति वेदस्य तानिक एव वा स्वस्तु ग्रामि मपि चितेतपं स द्विजानां गृहमेधिनां ॥ आयायान्यरः प्रयोगायं धर्म्मात्तलोकजितमः ॥ सद्धर्मैः कालवेतेषां वित्तिरन्यः प्रवर्त्तता ॥ द्वात्यामेकस्य उथ
ब्रह्मसत्त्रेण जीवति । एकः कुशूलधान्यः षट्कर्मा ॥ उञ्छशिलायाच्छिलितायावितत्रपि वाणिज्येः ॥ अन्यः कुंसीधान्यो वृत्तिरुञ्छशिलायावृत्तिः ॥ अपरस्त्वैहिकोवास्यामुञ्छशिलात्यांवञ्चयुक्तस्वस्त न
कोब्राह्मणः सत्रेण जीवति । एकः कुशूलधान्यः षट्कर्मा ॥ तेञ्छशिलायावितायावित स्वबिवाणिज्यं ॥ अन्यः कुंसीयान्यः वृत्तिरुञ्छशिलायावृत्तिः ॥ अपरस्त्वैहिको द्यस्त्यांतेञ्छशिलात्यावञ्च
र्यस्तु स्वस्तिको ब्राह्मणः सत्रेण ब्रह्मलोकावाप्तिहेतुत्वेन सन्नयागलब्धफलेनोञ्छनजीवति । मनुः ॥ ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा सत्यानृताभ्यां जीवेत न श्ववृत्त्या कदाचन ॥ ऋतमुञ्छशिलं
ज्ञेयं अमृतं स्यादयाचितं ॥ मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतं ॥ सत्यानृतं तु वाणिज्यं तेन चैवोपजीव्यते ॥ सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥ अथापदि प्रतिग्रहवृत्तिः ॥ तत्र याज्ञवल्क्यः ॥ राज
तवान्मियाजेस्यासीदंति छेदनं तस्याः क्षुधा दंतिहितु कपाषंडिवकव्रतीश्ववर्जयेत् ॥ राजान्यायपरः ॥ निषोपयथोक्तलक्षणः ॥ याज्यं ॥ याजनार्हः ॥ षिवर्मिकः ॥ शंखः ॥ एतेरवयोपयुक्तं धर्मार्जितधनं त
या ॥ याजयेत सदा विप्रो ग्राह्यस्तस्मात्प्रतिग्रहः ॥ एते रितिजन्मकर्मादिभिः शुद्धः ॥ मनुः ॥ राजतो धनमः ॥ वृत्तिर्क्षसीदन्नातकं तु क्षुधा आज्यां तं वासिनो वा पिनत्तन्यत इति स्थितिः ॥ नत्वन्यत इति ॥ एषां सज्ज
वि ॥ व्यासः ॥ द्विजातिस्योधनं लिप्सेच्छस्तेस्यो द्विजसत्तमः ॥ अपि वा द्विजमात्रेस्यो न शूद्रात्तु कथंचन । द्विजातिमात्रेस्य इति गुणधर्मरहितत्योपि ॥ नारदः ॥ ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ ॥
नितयोरंतरं किंचित्प्रजाधर्माभिरक्षणात् ॥ धर्मज्ञस्य नृतज्ञस्य रक्षार्थं ताततासात्र श्वैनाश्च वीनस्ततापराधेन राज्ञामध्यमे वधनं ब्राह्मणस्यापि महीपतेः ॥ श्ववीनामशुवीनां च संनि
तायथोसतः ॥ समुद्रे समतां याति न दृष्ट्वाऽसौ धनागमः ॥ यथाग्नौ संस्थितं दीप्तं शुद्धिमायाति कांचनं ॥ एवं धनागमाः सर्वे शुद्धिमायांति राजनि ॥ अप्रविवेचनाद्यस्तु स्वत्र विस्तविति पूरुषः ॥ अचि
वाश्चर्दिः सदः कथं राजा नं देवतं ॥ विदुर्यएवं देवत्वं राज्ञो ह्यमिततेजसः ॥ तस्मात्प्रतिग्रहस्तेन न लिप्यंतकथंचन ॥ देवत्वं अष्टलोकपालरूपेण ॥ मनुः ॥ नराज्ञः प्रतिगृह्णीत अराजन्यप्रसूतितः ॥ सूना
किद्ध्वजवतां विषेणैव स जीवनात् ॥ नराज्ञः इति लोत्ततत्परजनापीडकस्य ॥ अराजन्यप्रसूतिनः इति हीनजातिं सूतस्यापि राज्ञः प्रतिगृह्णाति लुब्धस्याच्छास्त्रवर्जिनः ॥ सपर्यायं जानीयान्नरकानेकविंशति
यमस्य ॥ अराजन्यप्रसूतस्यैश्वराजः स्वच्छंदवर्तिनः ॥ घोरः प्रतिग्रहस्तस्य मध्वास्वादो विषोपमः ॥ तथैव राजमहिषी राजामात्यपुरोहिताः ॥ पापेनार्थं निसंयुक्ताः सर्वे ते राजधर्मिणः ॥ याज्ञवल्क्यः ॥ प्रतिग्राहीलु
नीचक्रध्वजाविज्ञ्यापनराधिपाद्दृष्टाः दशगुणं पूर्वं पूर्वादितवधो नरं हारीतः ॥ दशसूनासहस्राणि अक्रो राजा करोति सः ॥ तान्येवकुरुते राज्ञो घोरस्तस्य परिग्रहः ॥ अथ येनतु तत्तामात्याः सेनानीदंडनायकः
ततोऽर्धं तदर्धं आश्रितेनाश्रि तत्तुत्तः ॥ यदि यदा कथंचिद्देतस्यो गृह्णीति ॥ तत्र बृहस्पतिः ॥ असतापि समादाय साधुभ्यः संप्रयच्छति ॥ धनस्वामिनमात्मानं संतारयति दुस्तरात् ॥ अथ प्रतिग्रहविषय
आपदनापसाधारणं किंचिदुच्यते ॥ तत्र मनुः ॥ एधोदकं मूलफलमन्नमभ्युद्यतं च यत् ॥ सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणां ॥ एधः इंधनं ॥ अन्नवान्नप्रदक्षिणाद्यतिरिक्तेऽभ्युद्यतमितिसंबध्यते ॥ आ

स्युघममस्यचदत्तं॥ अर्थिनः श्रद्धादपि अर्थं वापादयेत्। प्रतिग्रहप्रवृत्तस्यैव न तु निवृत्तस्य। अन्नस्य दक्षिणास्य। अत्र यद्दक्षिणा तु स्नेहछादिस्योपि। शस्यार्शतं अशानां क्षत्रं पुष्यमणीन् दद्यात् धान्यामस्यान्
पयो मांसं शाकं कुवृत्ति [illegible] विमाहि विक्षयकान् [illegible] नाजालात्॥ न निर्गुणे दद्यात् न प्रख्याख्यापयेत्। तिलधेनु गोजा वाप्य प्रिश्रुतान्नमजिनं मणि। स्तुवन्ति स्वयमानाच घोरो सम प्रतिग्रहाः। प्रतिग्रहे किं गुण
विशिष्टोधिकारी वा कोने न्याकास्यां निषिध्यमुखेनाधिकारिणाम् यदधिकारिणां वाह। याज्ञवल्क्यः। विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः। गृह्णन् प्रदातारमधो नयत्यात्मानमेव च॥ मनुः॥ हस्ते
वमानापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्॥ अथ क्षत्रियस्य निर्तिव्यदारानतः॥ अथाविदजनस्नानअध्ययनयजनदानधर्मशास्त्रपालनाशिष्टनिग्रहवान्। अति
जित्यध्वग्रामगृहे निर्वेदव्रतिकदेशाति। अजितानां शत्रोर्भूम्यादीनां प्रग्रहणं च दक्षतितकदेशेन चयनतार्थीयाज्ञवल्क्यः। अग्र हाधानानारं ड्राणां गुच्छयायतनानि यासावानाविचजगनस्तस्मात्पृष्यन
मायहा। महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः। विनीतः सत्त्वसंपन्नः कुलीनः सत्यवाक् शुचिः॥ स्थूललक्षवज्रवेधार्थदशबिन्दुसहदर्शिताचनू अदीर्घसूत्रस्स्मृतिमान् क्षुद्रोऽपरुषस्तथा। धार्मिकोऽव्यस
नश्चैव प्राज्ञः शूरो रहस्यवित्। अदीर्घसूत्रः आवश्यककर्मणामारंभे आरब्धानां च परिसमापनायां न विलंबनसंरक्षस्यवित् गोपरीयार्थगोपननिपुणः स्वरंध्रगोप्ता आन्वीक्षिक्यां दंडनीत्यां तथैव च। वार्ता
नीतस्त्रय्यां च वार्तायां त्रय्यां चैव नराधिपः॥ आन्वीक्षिकी तर्कविद्या आत्मविद्या वा तथात्वमहत्। त्रिविधविनिर्दिष्टत्यं त्रयीं विद्यां दंडनीतिं च तदुक्तिः॥ आन्वीक्षिकी चात्मविद्यां वार्तारंभांश्च लोकतः इति। दंडनीति
रर्थशास्त्रं वार्ता कृषिवाणिज्यपशुपालनरूपा। त्रयी ऋग्यजुःसामरूपा। सुमंत्रिणः कुर्वीत प्राज्ञान् मौलान् स्थिरान् शुचीन्। सार्धं चिंतयेद्राज्यं विप्रेणाथ ततः स्वयं॥ मौलान् राज्यवंशपरंपर
यागतानां विप्रेणपुरोहितेन। पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितं। दंडनीत्यां च कुशलमथर्वांगिरसे तथा। उदितोदितं शास्त्रादितविद्याभिरुदितसमृद्धश्रौतस्मार्तक्रियाहेतोर्वरर्त्विजः॥ य
ज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान्। भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च॥ अक्षयोऽयं निधी राज्ञां यद्विप्रेषूपपादितं। भोगाः सुखसाधनानि। अस्कन्नमव्ययं चैव प्रायश्चित्तैरदूषितं। अग्नेः स
काशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते। अस्कन्नं क्षरणरहितं। अव्ययं पशुहिंसारहितं। अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत्। पालितं वर्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्। दत्त्वा भूमिं निबंधं वा कृत्वा लेख्यं
तु कारयेत्। आगामिभद्रनृपतिः परिज्ञानाय पार्थिवः॥ निबध्यत इति निबंधः। पण्यनिरुकादिः। स्वदत्तां परदत्तां वा यत्नाद्रक्ष्यादीनाम पाहारतुः स्वदत्तां परदत्तां वा यो हरेत वसुंधरां। षष्टिवर्षसहस्राणि विष्ठायां जाय
ते कृमिरिति ब्रह्मपुराणस्मरणात् पादवाताश्च पदेवासमुद्रोपरि विंहनो। अतिलेख्यात्मनावं स्वपानात्मानं च महीपतिः। प्रतिग्रहपरिमाणं दानच्छेदोपवर्णनं। स्वहस्तकालसंपन्नं शासनं कारयेत् स्थिरं। आ
त्मानं वा वंशयान्प्रतिग्रहीतारं प्रतिग्रहपरिमाणं दीयत इति दानं क्षेत्रादि तस्य छेदः छिद्यत इति छेदो नद्यादिनानाः परतरोधर्मान्प्रमाणं यद्गणार्जितं। विप्रेभ्यो दीयतेत् द्रव्यं प्रजा
भ्यश्चाभयं सदा। य आहवेषु वध्यंते भूम्यर्थमपराङ्मुखाः। अकूटैरायुधैर्यांति ते स्वर्गं योगिनो यथा। पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्तिनां। राजा सुकृतमादत्ते हतानां विपलायिनां। तं वा हत्वा हितं क्लीबं निरर्थं परसंगतान्
हन्यान्निवृत्तं युद्धप्रेक्षणकादिकं। नतरकासमुत्थायपश्येद्दायव्ययोस्वयं। व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुंजीत कामतः। प्रतिदिनं प्रातःकाले पुरस्यात्मनश्च रक्षां विधाय स्वयमेवाय्ययौ पश्येत्। ततो व्यवहारान्दृ
ष्ट्वा मध्याह्नकाले स्नात्वा यथारुचि भुंजीत। हिरण्यं व्याप्तृतानीतं भांडागारेषु निक्षिपेत्। पश्येच्चारांस्ततो दूतान्प्रेषयेन्मंत्रिसंगतः। व्यापृतादिरण्याद्यानयने नियुक्ताः। ततः स्वैरविहारी स्यान्मंत्रिभिर्वा समागतः। बलानां
दर्शनं कृत्वा सेनान्या सह चिंतयेत्। ततः पराह्णे स्वैरविहारी अंतःपुरे तथा वमनुः। उक्तवा विहरेद्वैवक्षीतिरंतःपुरे सह विहृत्य च यथाकामं पुनः कार्याणि चिंतयेत् इति। संध्यामुपास्य शृणुयाच्चाराणां गूढभाषि
तं। गीतनृत्यैश्च भुंजीत पठेत्स्वाध्यायमेव च। संध्यासायंसंध्यां। गीतनृत्यैः कंचित्कालं नीत्वा भुंजीत चाध्यतयमितिस्मरणार्थं पठेत्। संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च। शास्त्राणि चिंतयेद्बुद्ध्या सर्वकर्तव्य
तां तथा। संविशेत् स्वप्यात्। ब्राह्मणेषु क्षमा स्निग्धेष्वजिह्मः क्रोधनोऽरिषु। स्याद्राजा भृत्यवर्गे च प्रजासु च यथा पिता। पुण्यं षड्भागमादत्ते न्यायेन परिपालयन्। सर्वदानाधिकं यस्मात्प्रजानां परिपालनं। अन्यायेन

मदनपा०

२९

नृपो राज्ञश्च कोशाद्याधिवर्धयेत्। सा विराद्विगतश्रीकानाश्यामेति सबांधवा। प्रजापीडनसंतापात्समुद्भूतो हुताशनः। राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते। आह विष्णुः। निधिं ब्राह्मणो लब्ध्वा सर्वमाददद्यात्। क्ष
निहिताशो ब्राह्मणवर्जं द्वादशमंशं गृह्णीयुः। आह वसिष्ठः। अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरेदधिगंत्रे षष्ठमंशं प्रदाय ब्राह्मणश्चेदधिगच्छेत् षट्कर्मसु वर्तमानो न राजा हरेत प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्। अ
र्वाक्त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत्। परेण नृपतेर्गाढं त्रामाच्चमिदमिति व्यावदते। स्वाम्यागमने तु तद्दर्पणमेवानमेदमिति यो ब्रूयात् सोऽनुयोज्यो यथाविधि। संवाद्य रूपसंख्यादीन् स्वामी तद्द्रव्यमर्हति।
आददीताथ षड्भागं प्रनष्टाधिगमे नृपः। दशमं द्वादशं वापि सतां धर्ममनुस्मरन्। ममेदमिति यो ब्रूयान्निधिं सत्येन मानवः। तस्याददीत षड्भागं राजा द्वादशमेव वा। विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिं।
अशेषमप्याददीत सर्वस्याधिपतिर्हि सः। यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ। तस्माद्द्विजेभ्यो दत्त्वार्धमर्धं कोशे प्रवेशयेत्। आह नारदः। परेण निहितं लब्ध्वा राजा ह्युपहरेन्निधिं। राजगामी निधिः
सर्वः सर्वेषां ब्राह्मणादृते। ब्राह्मणोऽपि निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत्। तेन दत्तं तु भुंजीत स्तेनः स्यादनिवेदयन्॥ अथ वैश्यवृत्तिः॥ मनुः। वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहं। वार्तायां नित्ययुक्तः स्या
त्पशूनां चैव रक्षणे। मणिमुक्ताप्रवालानां लोहानां ---- लोहानां तान्तवस्य च। गंधानां च रसानां च विद्यादर्घबलाबलं। बीजानामुप्तिविच्च स्यात्क्षेत्रदोषगुणस्य च। मानयोगं च जानीयात्तुलायोगांश्च सर्व
शः। सारासारं च भाण्डानां देशानां च गुणागुणं। लाभालाभं च पण्यानां पशूनां परिवर्धनं। भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणां। द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव
धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमं। दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः। कालिकापुराणे॥ कृषिगोरक्षवाणिज्यमेतद्वैश्यस्य संमितं। तथाप्यनडुद्युग्मस्त्यां तामपि नैव समाचरेत्। द्विजवास्या
द्विषड्भाग्यां प्रहरादिप्रमाणतः। विक्रेयाण्यंतरस्यैव कारयेद्धर्मतो द्विजः। पिण्याकं तृणतायव तस्माद्यत्नान्न दापयेत्। धूमं कटुद्रव्यनं चैव नैवं कारयेन्नतः। विणावीमपि ... गम
यवाः कुर्वन्त्वेवं न सीदति ... महास्तुलं। राज्ञां षड्भागमुत्सृज्य पंचमं कर्षकस्य चाविलं नं प्रवर्तते ... यावहनं। ... विधिः। हारीतः। अ
ष्टगवं धर्म्यं षड्गवं बीजकर्षितं। चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनां। बालानां दमनं विवत्स हर्तं च न शस्यात्। वृद्धानां दुर्बलानां च प्रजापतिवधो यथा। बलीवर्दोपघातेन तासां वाहनं कार
यन्नता। वृद्धं युग्येन युंजीत जीर्णं व्याधितमेव वा॥ अथ कुसीदं॥ तत्र याज्ञवल्क्यः। अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके। वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा। अन्यथा तत्र बंधकामनु
तानि सांवत्सरी वृद्धिर्नासी ... चक्रवृद्धिः कालिका चक्रकारिका कायिका च। याज्ञवल्क्यः। वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासं तु कालिका। इच्छाकृता कारिता स्यात् कायिका कायकर्मणा। बृहस्पतिः। बहव
वर्ज्जितोपायाः सुवृत्तिः परिकीर्तिता। सर्वेषामपि चैतेषां कुसीदमपि नं विद्धि। अनापद्यपि राजन्यो स्वयं कार्षिकादिरूपद्रवैः। दृष्टादिके सवेधानि साकुसीदं न विद्यात्॥ अथ शूद्रवृत्तिः॥ तत्र मनुः। विप्राणां वेद
विदुषां गृहस्थानां यशस्विनां। शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः परः। बृहस्पतिः। शौचं ब्राह्मणशुश्रूषा सत्यमक्रोध एव वा। शूद्रकर्म तथा मंत्रो नमस्कारोऽस्य वा दितः। पराशरः। शूद्रस्य द्विजशुश्रूषा परमो धर्म
वर्णानां यदन्यत् कुरुते किंचित्तद्भवेत्तस्य निष्फलं। द्विजशुश्रूषा त्रिवर्णशुश्रूषा तस्य निःफलमिति। द्विजसेवाया विराधितं यदन्यत् कुरुते तन्निरर्थकमिति चार्थः। गौतमः। चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः। शौ
चमाचमनार्थे पाणिपादप्रक्षालनमेको श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चेतरेषामुच्छिष्टं लिप्सित इतरेषां द्विजातीनां। याज्ञवल्क्यः। भार्यारतिः शुचिर्भृत्यो भर्ता श्राद्धक्रियापरः। नमस्कारेण मं
त्रेण पंचयज्ञान्न हापयेत्। नमस्कारेण मंत्रः। देवतास्यः पितृस्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः। इति वा मं... शूद्रस्य कथमग्निसाध्यकर्माधिकारः। विवाहाग्नावितिवे
त्तानां शूद्रस्य विवाहहोमास्तावत् न स्यमंत्रको विहोमः। न च शूद्रो मंत्रवान्। न च नमस्कारमंत्रेणैव मंत्रवतां तत्र वाच्यां तस्य पंचयज्ञेष्वविहितत्वात्। तस्मादग्निसाध्यकर्मसु वक्तव्योऽस्याधिकारः इत्युच्यते। अग्न
यैरपि शूद्रस्य लौकिकेऽग्नौ विश्वेदेवादीनि कर्माणि कार्याणि न प्रतिसाध्याद्विधानात्। निषादस्थपती हि वत्। किंच द्विजातीनामपि न विवाहाग्नौ नियमेन विश्वेदेवकर्म किमुत शूद्रस्य। एवं च शूद्रस्यायमयन्ति

३२

हामविधिस्तत्र तत्र लौकिका ग्राह्याः एवमुं ग्रांतराविघ्नेनेन नमस्कारमंत्र एवेति सिद्धं ॥ ॥ अथापद्वृत्तिः ॥ ॥ तत्र मनुः । अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा । जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनंतरः ॥ उभाभ्याम
प्यजीवंस्तु कथं स्यादिति चेद्भवेत् । कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकां । वैश्यवृत्त्यापि जीवंता विक्रेयमाह स एव । सर्वान्रसानपोहेत कृतान्नं च तिलैः सह । अपोहेत वर्जयेत् न विक्रीणीतेत्यर्थः ।
व्यपोहेतेति सर्वत्रानुषज्यते । अश्मनो लवणं चैव पशवो ये च मानुषाः । सर्वं च तांतवं रक्तं शाणक्षौमाविकानि च । अपि चेत्स्युररक्तानि फलमूले तथौषधीः । अपः शस्त्रं विषं मांसं सोमं गंधांश्च सर्वशः । क्षीरं क्षौ
द्रं दधि घृतं तैलं मधु गुडं कुशांस्तथा । आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च । मद्यं नीलिं च लाक्षां च सर्वांश्चैकशफांस्तथा ॥ अत्र रसग्रहणेन लवणस्यापि ग्रहणे सिद्धे पुनर्ग्रहणं दोषाधिक्यप्रतिपादनार्थं ।
एतेनात्यधपि तु नरुक्तं व्याख्यातं । क्षौद्रं मधुकल्कः सिक्थकं माक्षिकस्य मधुशब्देनैवोपादानात् । सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् । इतरेषां तु पण्यानां विक्र
यादिह कामतः । ब्राह्मणः सप्तरात्रेण वैश्यभावं प्रयच्छति । रसा रसैर्निमातव्या न त्वेव लवणं रसैः । कृतान्नं चाकृतान्नेन तिला धान्येन तत्समाः ॥ निमातव्याः परिवर्तनीयाः ॥ जीवेदेतेन राजन्यः सर्वेणाप्य
नयं गतः । न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् । एतेन प्रवृत्तिकेन अन्यया आपद्गतो वैश्यो यावत्स्वधर्मेण शूद्रवृत्त्यापि वर्जयेत् । अप्यकुर्वंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनां । पुत्रदारात्ययं प्राप्तो जीवेत्कारु
ककर्मभिः । यैः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजातयः । तानि कारुककर्माणि शिल्पानि विविधानि च । कुर्वीतेति शेषः । आपद्यपीतरवृत्तिस्थोपि स्ववृत्तिरेव ब्राह्मणस्य ज्यायसीत्याह स एव । वरं स्वधर्मो वि
गुणः परधर्मात्स्वनुष्ठितात् । परधर्मेण जीवन्हि सद्यः पतति जातितः ॥ विप्रवृत्तिमनातिष्ठन्ब्राह्मणः स्वे पथ्यपि स्थितः । अवृत्तिकर्शितः सीदन्निमं धर्मं समाचरेत् । सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः । नाध्या
पनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् । दोषो भवति विप्राणां ज्वलनांबुसमा हि ते ॥ तथा जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः । आकाशमिव पंकेन न स पापेन लिप्यते ॥ तथार्थवादोपि । क्षुधार्तश्चात्तुम
भ्यागाद्विश्वामित्रः श्वजाघनीं । चांडालहस्तादादाय धर्माधर्मविचक्षणः ॥ श्वजाघनीं श्वश्रोणिं ॥ आपद्यनुपनागत्या आवश्यककस्य कर्मणः संपत्त्यर्थमपि — नानाजाति वानस्पत्यं मूल
फलं दार्वग्न्यर्थं तथैव च । तृणं च गोग्रासार्थमहोयं मनुरब्रवीत् । वानस्पत्यं पत्रपुष्पादिकं ... आददानः परक्षेत्रान्न दंडं दातुमर्हति ॥ तथैव सप्तमे भक्ते
भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥ ब्राह्मणव्यतिरिक्त अश्वस्तनविधानं ... कर्म न विद्यते । स धर्मो कर्मणो हि वा सर्वसाधारणो हि ते ।
... ब्राह्मणकर्म । अपवृष्टं शूद्रकर्म न विधत्ते । मध्यमे कर्मणी च त्रैवर्णिकस्य कर्मणी सर्ववर्णसाधारणे इत्यर्थः । एवमापदं निस्तीर्य प्रायश्चित्तं ... निरतास्ते वै तु तथाह याज्ञवल्क्यः ।
निर्वीर्यतामथात्मानं पावयित्वा पथि स्थितः (?) । तामापदं पावयित्वा प्रायश्चित्तं । पथि स्ववर्णधर्मे स्ववर्णधर्मनिरतो नांपक्रमाह ॥ ब्राह्मणस्य ... क्षत्रियस्य ... वर्णस्य गार्ध्यवृद्ध
जस्य स्वं स्थानं व्रजंति ते स्वे स्वे कर्मण्यवस्थिताः इति ॥ ॥ इति वर्णधर्मप्रकरणं ॥ ॥ अथ प्रासंगिकं परिसमाप्य प्रकृतमनुसरामः ॥ ॥ तत्र मध्याह्नस्नानविधिः । तत्रादौ तावच्छरीरे स्नानप्रशंसा ॥ ॥
याज्ञवल्क्यः । अग्निमागमनाक्षैयात्यापि स्वयंप्रतिग्रहात् । रहस्यावरितात्यापानुच्यते स्नानमाचरन् ॥ मनः प्रसादजननं रूपसौभाग्यवर्धनं । शोकदुःखमनहं स्नानं मोक्षदं ज्ञानदं तथा । स्नानं तदा
शौचः । स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः । तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं मतं ॥ नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं । क्रियास्नानं तथा षष्ठं षोढा इति प्रकीर्तितं ॥ प्रातर्मध्यं दिने
स्यापि नित्यत्वमेव । तथा च साधारण्येनाह गार्ग्यः । तिर्यग्मनुष्यनिर्माल्यमिति देव्या बृहस्पतिः । प्रातः स्नानं तथ नित्यं मध्ये स्नानं सदा तत्र विदितिः । चांडालशवयूपादि स्पृष्ट्वा स्नानं रजस्वलां । स्नानार्हस्तु यदा स्नाति स्नानं नैमि
मितिकं हि तत् । पुष्यस्नानादिकं यत्तु देव — विद्याहितं । तद्धि काम्यं समुद्दिष्टं नाकामस्तु प्रयोजयेत् । जप्तुं कामः पवित्राणि अर्चिष्यन्देवताः पितृन् । स्नानं समाचरेद्यस्तु क्रियांगं तत्प्रकीर्तितं । पवित्राणि स्नानानि मलापक
र्षणं नाम स्नानमभ्यंगपूर्वकं । मलापकर्षणार्थाय प्रवृत्तिस्त — नान्यथा । सरस्सु देवखातेषु तीर्थेषु च नदीषु च । क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया ॥ स्नानामवतत्क्रियाकर्तव्यता तदा विरहितत्वमर्थः ॥ दक्षः ॥

63

वंचर्थेड नथात्तागेस्नानार्थं मृदमाहरेत्तु तिलपुष्पकुशादीनि स्नानं च — — मजले चैवैर्थेता गार्दर्वाङ्कस्यैव। रक्ता गौरा तथा श्वेता त्रिविधा मृत्तिकास्मृता। श्वेतैर्देशात्तु संग्राह्या शर्करादिविवर्जिता। राषलक्ष्णां तका
याः शा — — — कुरणो बाह्यं तिलाः स्वमाः। पुष्पाणि यथोक्तानि कुशाः वक्ष्यमाणलक्षणाः। कुशग्रहणकालविशेषमाह कात्यायनः। मासे नभस्यमावास्या तस्यां दर्भचयो मतः। अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः। एत
श्चप्रतिदिनाहृतो बाह्यं कुशोत्पाटनविधिः अश्चोदराकुविस्तृत्य याहु वत्तिरा तु खं कारणं ठमात्रमासरदेवकुशास्थच्चे तु सद्यादवपथमत एवादर्सी — — — मनुः। विरिं विना सहोत्पन्नः परमेष्ठिनिसर्गजः। नुद सर्वा
णि पापानि मम स्वस्ति करो भव। कुशमूले स्थितो ब्रह्मा कुशमध्ये तु केशवः। कुशाग्रे शंकरो देवस्त्रयो देवाः कुशे स्थिताः। अच्छिन्नाग्रा ह्यसंस्पृष्टाः समूलाः कोमलाः शुभाः। पितृदेवजपार्थं च समादद्यात् कुशान् द्विजः। संपूर्णाः कुशा दर्भाः स्मि
लाद्दित्र समुद्भवाः। लप्रशस्तानि योक्तव्यादि वा पित्र्ये च कर्मणि। जातिमात्रेण वर्द्धन्ते सायमूला कुशाः स्मृताः। समपत्रस्तु कुशपच्छिन्नाग्रस्तु कुशोपाते। अच्छिन्नाग्राश्च ये कर्म आग्राकुस्या चैव प्रमाणतः। कुशपाशन्तिविज्ञेयास्तेषु शुभा
ऽसमाचरेत्तु। छेदाग परिशिष्टं अनंतगर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्। कौशं याविस्तयानि च पवित्रं दक्षिणे करे। भुंजानस्तु विशेषेण गृहीतं तस्य बाधनं। जोदती दक्षिणे हस्ते सव्ये स्या
सानसत्तु। उपवीतशिरवायांउ पादमूले सन्नमस्तु। सन्तु नू एकद्रयर्थः। कौशिकश्च्यपी। पवित्रस्य तु नाशो वं आचांत कदाचन। पितृणां तर्पणं यावं उच्चारे मूत्रजने तथा। गौरवः। उत्तरं तत्र छितिर्दास्तिः समावामतं
योद्विजः सामपानं फलं तस्य तु स्यायज्ञफलं लभेत्तु। ग्रंथिर्यस्य पवित्रस्य नाततनावमनंत्स वेत्तु। आवामेद्यस्तु मेहश्च यथासोकान्तथा डसाः। यथा सोकेति हर्ष्यांत। आतासोजनकाले ग्रंथिर्निषिद्धः। ब्रह्मयज्ञे जपे चैव ब्रह्मग्रं
थिर्विधीयते। लाजानवर्द्धितः ओ कषयेवं धर्मेन हीयते। वामदास्त सव्येच्छेया दक्षिणो नादकं पिबेत्। रुधिरं तद्भवेत्ताम्र्यंपीत्वा चांद्रायणं चरेत्तु। कुशास्तु वितथा काशाः दूर्वाविपयवाश्च पितः। तावेकुनीवारा नृपमाकां श्यनिये
जयेतु। हारीतः। जपे दाने तथा होमे स्वाध्याये पितृतर्पणे। अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः। आपस्तंबः। ब्रह्मयज्ञे चयेद नायेद र्भाः पितृतर्पणे। धृता नमस्त्रपुरीषे उतर्पणाद्यागे विधीयते। चितोद
सर्पियमाग्निस्चाध्याययेपितृतर्पणे। स्तरणासनपिंडेषु नग्राह्याः सप्तविकुशाः। अपूतागर्भितादर्भायेच्छिंदितानखैः। कथितांश्चाग्निदग्धांश्च कुशानयत्नेन वर्जयेत्तु। नीवामध्ये स्थिता दर्भाः ब्रह्मसत्रेण
यद्धृताः। पवित्रं तान्विजानीयाद्यथाकायस्तथा कुशाः। अत्र विशेषमाह कात्यायनः। हरिता यज्ञियाद र्भाः पीतकाः पाकयज्ञिकाः। समूलाः पितृदेवत्याः कल्माषा वैश्वदेविका इति। पितृदेवताः पित्र्यां गो
बालपवित्रं प्रशस्याः कौशिकः। गवां बालपवित्रेण धीयमाणेन नित्यशः। न स्पृशंतीह पापानि श्रीश्च गात्रेषु तिष्ठति। गवां बालपवित्रेण वध्नुयपार्ष्णि करोतियः। पंचाग्नेयाज्ञतास्तेन यावज्जीवं न संशयः। गवां बालपवि
त्रेण संध्योपास्ति करोति यः। सविंशद्दशवर्षाणि संध्ये नवेन्नर इति हारीतः। समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्तु। शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्व्रजत्यधः। कुशपुष्पाणि समिधश्च अर्घ्यं तु विशेषतः। निषे
धोपि च ग्रहणीयाद माावास्यामपि द्विजः। यत्तु वचनं अमावास्यां न हिंस्यात्तु कुशांश्च समिधस्तथा। सर्वत्रावस्थितः सोमः हिंसायां ब्रह्महा भवेत्तु। इतिनतु यस्मिन्काले वनस्पत्यादिषु सोमो वसति तन्मुहूर्त्तनिषेधपरं सर्वत्राव
स्थितदेव्रूपादाना तु। सर्ववनस्पति कुशादिष्वप्यवस्थानकालविशेषश्च व्यासा पहे स्तिहितः। त्रिमुहूर्त्तं वसेदर्के त्रिमुहूर्त्तं जले वसेत्। त्रिमुहूर्त्तं वसेद्गोष्ठे त्रिमुहूर्त्तं वनस्पतौ। वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतीं घोरायां
नपाद च्यायां सुजपातनात्र संशयः इति वनस्पतिरिकुशादीनामपि प्रदर्शनार्थं इति कुशविधिः।। अथ विशिष्टस्नानविधिः।। अथ स्नानविधिं वक्ष्यं प्रवक्ष्याम्यतु पूर्वशः। येन स्नात्वा दिवं याति अहृष्यता द्विजोत्तमाः। नदी
षु देवखातेषु तडागेषु सरस्सु वा। स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु वा। पारक्येषु निपानेषु न स्नायाद्धि कदाचन। निपानकर्तुः स्नात्वा तु दुःखतो येन लिप्यते। अलाभे देवखातानां सरसां सरितां तथा। उद्धृत्य चतुरः पिंडान्
पारक्ये स्नानमाचरेत्तु।। याज्ञवल्क्यः। पंच पिंडाननुद्धृत्य न स्नायात्परवारिषु। योगी याज्ञवल्क्यः। अह्नि दिना चरेत्स्नानं मध्याह्ने तु विशेषतः। प्रयातामहं दमादाय हूर्वान्माई कोमयं। अरुणनायुरः। विशेषत इति वचनात्
अपराह्णेप्यत्यनुज्ञानमस्तीति गम्यते। उच्छाय पयित्वा तथा चम्य ततः स्नानं समाचरेत्तु। प्रक्षाल्य हस्तौ पादौ च शिखाबंधं समाचरेत्तु। शिखाबंधनप्रकारमाह व्यासः। स्मृत्वोंकारं च गायत्रीं निबध्नीयाच्छिखां ततः। पुनराचम्य हृदयं बा
ह्वोः स्कंधौ च संस्पृशेत्तु। इति। मृदेकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि। अधश्च तिसृभिः कार्यः पादौ षड्भिः तथैव च। प्रक्षाल्य सर्वकायं च द्विराचम्य यथाविधिः। ततः संमार्जनं कुर्यान्मृदा सर्वत्रमेव च तु। अंगान्यनुतविधिना मृदा संमार्ज

यदितीर्थः।अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे।मृत्तिकेहरमेपापंयन्मयापूर्वसंचितं।त्वद्धृतासिवराहेणकृष्णेनशतबाहुना।मृत्तिकेत्वांचगृह्णामिप्रजयाचधनेनच।मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता।मृत्तिके

जहिनःसर्वंयन्मयादुष्कृतंकृतं।मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं।ततस्तुगोमयेनैवमग्रमग्रमितिद्वयानु।अग्रमग्रंचरंतीनामोषधीनांरसंवने।तासामृषभपत्नीनांपवित्रंकायशोधनं।तन्मेरोगांश्चशोकांश्चनु

दगोमयसर्वदा।ततोदूर्वया।कांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि।एवानोदूर्वेप्रतनुसहस्रेणशतेनच।यातनप्रतनोषिसहस्रेणविरोहसि।तस्यास्तेदेविइष्टकेविधेमहविषावयं।चखेवंमार्जनंमंत्रैरभ्युक्ष्यतादिति

त्स्नातः।इहेतेदेवीरम्यंतांपारावंतस्यराशिष्ठा।द्विरापःपारावंतस्यराचित्यादिमंविरस्मंतमिहलोएतिरस्तिमञ्जिताअस्नातस्तरंतीत्यर्थः।यातशतमितिक्रात्पांतीर्थान्यावाहयेत्ततः।कुरुक्षेत्रादीन्यावाहयेत्तु।कु

रुक्षेत्रंगयांगंगांप्रभासंपुष्कराणिच।ततोमहाव्याहृतिभिर्मंत्रयेत्तु।आपोहिष्ठेतिदमापश्चद्रुपदादिवइत्यपि।तथाहिरण्यवर्णाःपावमानीस्तिरंततः।ततोर्कमीक्ष्यॐकारंनिमज्यांतर्जलेबुधः।प्राणायामांश्चकु

र्वीतगायत्रींवाघमर्षणं।यथाश्वमेधःक्रतुराट्तत्सोसुमार्जनंत्रिदंडवत्ततः।यथोक्तैःप्राणायामादित्रिःस्नातः।ऋचं।सर्वविरव्यामतिक्रांताविगतपापइतियावत्।अन्येपिस्नानविधयोबहवःसंतितत्रग्रंथगौरवस्यांतरुप

दर्शिताः।एतच्चस्नानंसर्वसाधारणंविशेषस्तुस्वस्वशाखोक्तोविज्ञेयः।अत्रचापवादः।सानोसोमत्रयोदश्यांनंदास्वश्लमघासुच।पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमिति।पिंडदानंकाम्यंननित्यं।।योगीयाज्ञव

ल्क्यः।मृदास्नानंनकुर्वीतरात्रौसंध्याग्रहेषुच।विधिज्ञःस्नानकालेतथासोमार्कवारयोः।तिलतर्पणस्यप्रतिप्रसवस्तर्पणप्रकरणेकथ्यते।संक्षेपस्नानविधिमाह।योगीयाज्ञवल्क्यः।एषविस्तरतःप्रोक्तःस्ना

नस्यविधिरुत्तमः।असामर्थ्यान्नकुर्याच्चेत्तत्रायंविधिरुच्यते।स्नानमंतर्जलेचैवमार्जनाचमनेतथा। जलाभिमंत्रणंचैवतीर्थस्यपरिकल्पनात्।अघमर्षणसूक्तेनत्रिरावृत्तेननित्यशः।स्नानाचरणमित्ये

तदुपदिष्टंस्वयंतुवा।जाबालिः।प्रवाहाभिमुखोमज्जेद्यत्रापःप्रवहंतिवा।स्थावरेस्नानंकुर्वी तवाहुविःस्नायीताकूलमाथेनयदिवा---मंत्रावामनुः।नस्नानमाचरेद्भुक्त्वानातुरोनमहानि

शि---------जम्बुनाविज्ञातजलाश्रये।व्यासः।अनुत्सृष्टेषुनस्नायादनुत्थिवसंकल्पतथाश्च संकल्पमप्रतिष्ठितं।अनुत्सृष्टमदत्तंपरकीयमितियावत्।जाबालिः।नपारकासदास्नायान्न

स्नानमहानिशि।नाद्यमेकंचवसनंपरिदध्यात्कथंचन।देवलः।राहुदर्शनसंक्रांतिविवाहात्यय य---षुस्नानदानादिकंकुर्यान्निशिकाम्यव्रतेषुच।।भारद्वाजः।विद्यमानेनस्नायात्संगृहीते

स्वयमूलंतत्सुवर्णादिकंचस्नायाच्छायाजलं---।पराशरः।अपोरात्रौनगृह्णीयात्सविशेषात्क रुणालयं।आवश्यकेषुधर्मेषुत्राणधर्मान्धर्मानितिस्वयं।धर्मोधर्मइतिमंत्रोच्चारणमेवगृहीत्वा

---।योगीयाज्ञवल्क्यः।दर्शस्नानंप्रकुर्वीतमातापित्रोस्तुजीवतोः।पुत्रःकुर्वीतरावष्टेपित्रोरुन्नतिजीविते।मातापित्रोरिति------ब्रह्मजातायात्रथनित्यादर्शांतेतृतीयायांदशम्यांच

विनाशतः।स्कंदे।विष्णुस्वरूपिणोयाःस्नानंनाचरेत्तुकथंचन।एतन्नित्यनैमित्तिकादिस्नानव्यतिरिक्त----भारद्वाजः।भोगार्थंक्रियतेयत्तुस्नानंयादृच्छिकंनरैः।तन्निषिद्धंतृतीयादौनित्यनैमित्तिकेनदोषोपिचीन्न

सिरपि।नित्यं-------काम्यंनैमित्तिकंचयत्तुदशम्यादिषुकर्तव्यंनतुयादृच्छिकंकदाचित्।यादृच्छिलक्षणांगानि।क्रियतांवानकुर्याद्वाथास्वयंत्राग---ना।बिलव्यपोहनफलंस्नानंयादृच्छिकंचतत्।।

पिंगीनसिः।पुत्रजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा।नित्यस्नानेचकर्तव्येतिथिदोषोनविद्यतइति।मार्कंडेयपुराणे।मातरंपितरंजायांभ्रातरंसुहृदंगुरुं।यमुद्दिश्यनिमज्जेतअष्टभागंलभेतसः।।नादद्यात्के

नवस्त्रेणस्नायात्कोपिनकादत्तानान्यदीयेननार्द्रेणनस्त्रतोयार्थितैनवास्नानंकुर्याद्वासस्तुविस्मृतेनकृतयदि।प्राणायाममतःस्नात्वाततःस्नानंनचाप्नुयात्।स्नातस्यवह्नितप्तेनतथैवपरवारिणा।

शारीरशुद्धिर्विज्ञेयानतुस्नानफलंलभेत्।यमुनाप्रभृतीनांतुआपःस्नानावतामेध्याःत्रिषुनर्दीक्षितुता।।तेनसंततःप्रत्नंसतिस्नानमुष्णेनवारिणा।इतिएतदातुरविषयं।अनातुरस्यापिनद्यादिसंभवेउष्णोदक

स्नानमुनिरुद्धमित्याह।यमः।नित्यनैमित्तिकंचैवक्रियांगंमलकर्षणं।तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकैः।अन्त्यमलापकर्षणस्नानंतीर्थेकर्तव्यमितिनविधीयतेअपिचप्रायश्चित्तसाध्यउष्णोदकसाध्यउष्णोदक

स्नानमुनिरुद्धमित्याह।यमः।---गताह्वयोनाद्यात्प्रथमादिवजाः।प्रके

प्रकरणे---तातंगलोदकस्नानेनकर्तव्यं।व्यासः।शीतास्वप्सुनिषिच्यासाःमंत्रसंस्कारसंस्कृताः।गृहेपिवास्यात्स्नानंतत्स्नानेनमफलंलभेत्।सतारामदादयः।अग्रा

65

सिमाद्यकेनापि तथा तीर्थावि निर्गताः। तथा प्रयागे तीर्थके स्नानं वर्ज्यं नित्यं द्विजातिभिः। तस्यां रजकतीर्थेत्र दशाह केन वर्जयेत्। प्रतिस्रोतसि जायेगे रथ्याजलनिवर्तने। गंगायां न मनुष्याणां तिस्रहि धर्मद्रवः स्वयं देवलः।
नत्तो न तस्यायामध्ये सर्वनिद्यो रजस्वलाः। तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणं। एवं श्रावणात् प्रत्यमध्ये सर्वास्विन दीषु स्नाननिषेधे प्रसक्ते क्वचित् विरोध— हूतं तद्विष्णुपुराणे। आदौ कर्कटके देवि महान
द्यो रजस्वलाः। त्रिदिनं तु चतुर्थेह्नि शुद्धा स्युर्जाह्नवी यथेति। महानद्यश्च पुराणे दर्शिताः। गोदावरी भीमरथी तुंगभद्रा च वेणिका। तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः। भागीरथी नर्मदा च यमुना च सरस्व
ती। विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः। द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः इति। एवं गंगादिष्वपि प्रसक्तापवादमाह देवलः। गंगा च यमुना चैव प्लक्षजाता सरस्वती। रुद्ध्येत्र यासु सरस्वती साप्लुत्य जाता
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञकाः। शोणसिंधुहिरण्याख्याः कोकिलाहितबर्बराः। शतद्रुश्च नदाः सप्त पावना ब्रह्मणा श्रुताः। निगदः। गंगा धर्मद्रवः पुण्या यमुना च सरस्वती। अंतर्गतरजा योग्याः सर्वावस्थासु
सर्वदा॥ एवं चन्द्रः। गंगा रजः स्वलत्यादि गंगायमुनासरस्वतीनां रजो— प्राप्यकायानि तासामपि अंतर्गतरजो विषयाणि। आतानादोषः। तथा कर्कटादौ रजोदुष्टा गोमती वासरत्रयं। चंद्रभागा सती सिंधुः सर
यूर्नर्मदा तथा। आसु नदीषु रजो नास्ति [illegible] तीरवासिनां न दोषः। तथा च निगमः। नद्यस्तीरवासिनामिति। अत्र विशेषमाह व्याघ्रपदः। अभावे कूपवापीनां मनसापि पयोत्तरां। रजोदुष्टेपि पयसि ग्राममध्ये
गो न बध्यते इति। वसिष्ठः। उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च। चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते। याज्ञवल्क्यः। न स्नायादुत्सवेतीते मंगलं विनिवर्त्य च। अनुव्रज्य सुहृद्वंधूनर्चयित्वेष्टदेवताः॥
प्रसंगात् सव्यग्रहे प्रतिकक्षत विरोधं कथ्यते। तत्र स्मृतिसंग्रहे। कालेन वमनश्मश्रुकर्म प्रयत्नमश्रुवि॥ अहः। अकाले न [illegible] द्यादहर्निशामिति। काले वर्षाकाले। अकाले तद्विपरीते। अत्रापि वि
दाघोतविष्णोतरा। महद्वंतु समं यात्रय दिति ष्ठे स्तुरातनो नवां [illegible] मिश्रितं तत नंदुष्टमिति हरयेत्। चकं नित्यस्नानं। अर्थाने मित्तिकानि। याज्ञवल्क्यः। उदक्याशुचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशे
त्। अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृत्। उदक्या रजस्वला। अशुचयः च पतित चांडाल सूतिकाशावचैत्योविनः। एतस्पृष्टः स्नायात्। तैरुदक्यादिस्पृष्टैरुपस्पृष्टः आचामेत्। आचम्य सा
ब्लिंगानि आपोहिष्ठेत्येवमादीनि त्रीणि सूक्तानि वाक्यानि वा जपेत्। विशेषवबृहद्ववनस्य कपि जलाधिकरणन्यायेन चरितार्थत्वात् [illegible] वाक्ययोः ईश्वकालानुसारेण व्यवस्था। तत्र गायत्रीमन
सा सकृत्पेत्। पराशरः। दुःस्वप्ने मैथुने वांते विरेके क्षुरकर्मणि। चितिधूमस्य शालास्थि स्पर्शने स्नानमाचरेत्। मैथुनमिति ऋतुकाले। अऋतुकाले बृहस्पतिना शौचमात्रविधानात्। अन्यतोप्ययमुक्तः शौचमृच्छे
चंद्रस्य ग्रहणे वदिति। अष्टमीचचतुर्दश्योः नृत्तावपि कालविशेषे स्नानमेव। तथा च स्मृतिः। अष्टम्यां च चतुर्दश्यां दिवा पार्श्वे मिथुनं सत्वा सचेलस्नानं तु वारुणीति श्रमार्जयदिति। अष्टमी वचनं चतुर्दशी पर्व सुरात्राव पि अ
न्यत्र दिवा। अत्र च गोवल्लीवर्दन्यायेनाष्टमी चतुर्दशी व्यतिरिक्ता माघास्या दिष्टु पर्वरात्रे वर्तितो अजीर्णादिषु स्नानमात्रमेव न सचेलं स्नानं। यथाह यमः। अजीर्णेभ्युदिते वांते तथा श्मश्रुमिते रवौ। दुःस्वप्ने दुर्जनस्पर्शे
स्नानमात्रं विधीयते इति। अजीर्णे सद्भुक्तपक्वमसति। अभ्युदिते इति। निद्रायां क्रियमाणायां रवावभ्युदित तथैवास्तमिते च एतत्सर्वं स्नानाकामतः स्पर्शे विदितम्। बृहस्पतिवाक्ये तिथितिपरो रजस्वलां। स्पृष्ट्वा बका
माता विप्रः स्नानं कृत्वा विशुद्ध्यतीति बृहस्पतिना अकामतः स्नानं [illegible] कामतस्तु [illegible] दृष्टव्यः। श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं। ग्रामयाजकं सोमविक्रयिणं यूपं चितां चितिकाष्ठं मद्यमद्यभा
ण्डं स्नेहं मानुषास्थि शवस्पृष्टं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचेलमंभोवगाह्य उत्तीर्य मग्निमुपस्पृश्य गायत्र्याष्टवारं जपेत् घृतं प्राश्य पुनः स्नात्वा त्रिराचामेदिति। कश्यपः। उदक्या मयोक्तं दत्वा पुष्टिस्पंदन
कर्माणि कारान वियोगे [illegible] स्पर्शने नवसचेलं स्नात्वा पुनर्मनस्तिजपेत् महाव्याहृतीः सह आज्यजातित्रिर्जपेदिति। तथा स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्। देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं
यो आदिदेवलको नाम हव्यकव्येषु गर्हितः। ब्रह्माण्डपुराणे। शैवान्पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान्। विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत्। अधिकारे अविद्यमाने यस्यैवाः पाशुपताः सर्वत
स्पर्शनिरुत्तानमवगंतव्यः। अन्यथा तद्दीक्षाविधायकपुराणवचनानिरवयविरोधात्। अथवा श्रोत्रियादीनां साक्षवदन निषेधो यथा वाचनिकः। श्रोत्रियादिषु दोषाभावे विवाचनिकस्पर्शनिषेधः। विकर्मस्था

× विधिस्नानानिकाण्डेवपंचांशाध्मेतन २

पतितेः

निषेत द्विजातिर्यानिवसंबध्यात्। न स्पृश्यानि यान न अस्वर्ग्या ह्याकृतिः सास्याद्वृद् संस्पर्शदूषितेति शूद्रमात्रस्पर्शीनना स्वर्गत्वप्रतिपादनसामर्थ्यात्। व्याघ्रपादः। चंडालैश्चैव दूरतः परिवर्जयेत्। गोवाल
व्यजनाद्वर्ष्टि स्ववासा जलमाविशेत्। एकंवातिसंकीर्णस्थानविषयं। असंकीर्णे तु हस्तयुगं वा हस्तयुगं वा चैव त्रियुगं च चतुर्युगं। चंडालस्पृतिकादक्योपतितानामधः क्रमादिति। अधः क्रमात्प्रतिलोम
क्रमात्। चतुर्युगं चांडाले त्रियुगं सूतिकायां मिर्यग्वा पतिते नसि। अत उदकमूत्रकरणो सचैलस्नानं व्याहृतिहोमश्च। एतच्च गोचमरजस्वलाचिरकाल — तो वदितव्यं। अंगिराः। श्वासवायसमार्जारखरोष्ट्र
नस्पर्शनात्। अमेध्यमानि च संस्पृश्य सचैलजलमाविशेत्। मार्जारस्पर्शे स्नानमुच्छिष्टसमये कर्मकाले चाग्निमार्जारे चैव दर्वीतुमारुतश्च सदा शुचिरिति यमस्मरणात्। खरस्पर्शनात् ऊर्ध्वं स्नानं नाभेरूर्ध्वं करौ तु का
स्नानायद्युपहन्यात् तत्र स्नानमधस्तात्। दत्वा हस्तौ प्रक्षाल्य आचम्य शुध्यतीति अंगिरसैव स्मरणात्। अस्पृश्य पद्दिस्पर्श जानुकस्यां कुर्यान्नाभेः करौ तु कायदंगसंस्पृशेत्स्वगं। स्नानं तत्र प्रकुर्वीत तत्रापि प्रक्षाल्य शुध्यति। य
मः। सकर्दमं तु वर्षासु प्रविश्य ग्रामसंकरं। जंघयोर्मृत्तिकास्तिस्त्रः पादयोर्द्विगुणास्ततः। ग्रामसलिलमुत्वाहृद्द्वयोर्ग्रामसंकरः। सर्वकर्दमं प्रविश्य मनुः। नीरं स्पृष्ट्वा रिंखस्तनं स्नात्वा विप्रो विशुध्यति। आचम्य एव तु नित्यं
हंगो स्पृष्ट्वा वीस्पवारविं। एतच्च द्विजातिविषयं। अन्यत्र उमानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचं अस्निग्धे चाहोरात्रमिति विशिष्टेतं। अस्माद्युपे वस्थिनि विलिप्तं च व्यजनं पनरवं दत्वत दस्थि चस्नेहं स्पृष्ट्वा स्नातः शु
ध्यति स्वयं चालितं विस्पृश्यादिति। अन्ये प्येवं विधाः स्नानार्हाः स्मर्यंतरे वर्भंगतव्याः। अथ गोरवत्तयालिह लिखितं। उदक्यादिना स्पृष्टानां मनुष्याणां स्नानं अचेतनानां पीवदीनां प्रक्षालनं तत्तोदक्यादिस्पृष्टा चेतने
स्पर्शविनामाचमनं। उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेदिति याज्ञवल्क्यस्मरणात्। उदक्यादि। स्पृष्टश्चेत्तत्स्पर्शश्चेद्वितीयस्यापि स्नानमेव। तथा च मनुः। दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति। स्नानार्हं चैतन्नस्पर्शात्पि द्वितीयस्य क्वचिन्नापवादमा- हसंग्रहकारः। कटश्मस्पर्शे वांते विरेके क्षुरकर्मणि। मैथुनाचरिते — स्पृष्ट्वा स्नानं न विद्यत इति
सद्युपलक्षणं। आर्तायमस्य स्नानमात्रमेव प्राश्नं सचैलं तत्स्पर्शी द्वितीयस्याप्याचमनमेव तु सिद्धात्तृतीयस्याचमनं। यथाह संवर्तः। तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते। ऊर्ध्वमाचम
नं प्रोक्तं द्रव्याणि प्रोक्षणं तथेति। एतच्चाकामकारविषयं। कामतस्तु तृतीयस्यापि स्नानमेवापतित चंडालस्पृतिकादक्याशावतत्स्पृष्टितस्पृष्ट्युपस्पर्शनात्सचैलमुदकोपस्पर्शनाच्छुध्येदिति गोतमस्म
रणात्। चतुर्थस्याचमनं। यथाह देवलः। उदक्यास्पृश्य स्पृष्टस्तृतीयं वापि मानवः। हस्तौ पादौ च वा तोये नप्रक्षाल्याचम्य शुध्यति यत्तु ब्रह्मपुराणे। तत्स्पृष्टस्पृष्टिनं स्पृष्ट्वा बुद्धिपूर्वं द्विजोत्तमाः। आचामेत्तस्य शुध्य
र्थमाह देवपितामह इति। तत्तु दुर्बलत्वेन स्नानाशक्तृतीया विषयं। अन्यथा गोतमादिवचनविरोधात्। अथवा चेतनपीनादिस्पर्शविषयं। एवं सर्वत्र विषयविवेको वगंतव्यः। स्वयमशुचिना उदक्यादिस्पर्शे कृते
देवलः। अशुचा चक्ययमप्येतान् शुद्धस्तु यदि संस्पृशेत्। विशुध्यत्युपवासेन तथा कृच्छ्रेण वा संस्पृशेत्। कृच्छ्रमपाकादिविषयः। आतुरस्नानं प्रति पराशरोक्तो विशेषः। आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः। स्नात्वा
स्पृशेद्दिनं ततः शुध्येत्स आतुरः। स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेत्। सिक्तगात्रा भवेदद्भिः सांगोपांगं कथंचन। न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्। यथा
नाः दशरात्रिं तायानारी रजसा च परिप्लुता। कथं तस्याः भवेच्छौचं शुद्धिः स्यात्केन कर्मणा। चतुर्थेऽहनि संप्राप्ते स्पृशेदन्यां तु तां स्त्रियं। सा सचैलावगाह्यापः स्नात्वा चापुनः स्पृशेत्। दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः।
अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा। दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति। सूतिकामरणे रजस्वलामरणे पूर्ववत् स्नानं च कारयित्वा पंचगव्येन स्नापयेत्। तथा च संग्रहकारः। सूतिकायां मृतायां तु कथं कु
र्वंति याज्ञिकाः। कुंभे सलिलमादाय पंचगव्यं तथैव च। पुण्यर्भिरिति मंत्रेणापो वाचा प्रक्षिलेत्ततः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि। पंचत्वं स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां। वस्त्रांतरावृतां कृत्वा दाहयेद्विधि
पूर्वकं इति। स्कंदपुराणे तु अश्वात्तात्तपस्तु रजस्वलायां मृतायां संस्कारादीनि नाचरेत्। ऊर्ध्वं त्रिरात्रात्स्नातायां शवधर्मेण दाहयेत्। मृतानां स्नानं तदनंतरं दाहादिसंस्कारमाह। अन्यदेशकालात्साया चावस्था विज्ञेया। यातातपः। ग्रामेषु य
त्र संस्पृष्टिर्यत्रा — कलहादिषु। ग्रामसंदूषणे चैव स्पृष्टिदोषो न विद्यते। इत्यत्राविवाहोत्सवयज्ञेषु प्रकृतेषु च उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते। बृहस्पतिः। तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे नगरग्रामदा

स्तीना

मदनपा०

३४

हिमुस्पृष्टस्पृष्टिं न दुष्यति। एतच्चयाज्ञवल्क्येमतेन स्पृष्टं इति प्रत्यक्षत्वज्ञातं नास्ति तद्विषयं। एतन्मात्रेणापवादोपि वचनानां चरितार्थत्वात्। यात्रातपः। रात्रौ स्नानं न कुर्वीत स्नानं दानं च रात्रिषु। नैमित्तिकं च कुर्वीत

तस्नानं दानं च रात्रिषु। एतन्माध्यमयामद्वयातिप्रायं। तथा च पराशरः। महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयं। प्रदोषपश्चिमो यामो दिनवत्स्नानमाचरेत्। एतद्व्याप्यपदिष्यापि यत्। स एव दिवाकरक

रेः पूर्वं दिवास्नानं प्रशस्यते। अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्। राहुदर्शनादिति पुत्रजन्मादिप्रदर्शनार्थं। तथाह पराशरः। पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रश

स्तं नान्यथा निशीति। इति नैमित्तिकस्नानानि। अथ काम्यस्नानानि। तत्र पुलस्त्यः। पुष्ये तु जन्मनक्षत्रे व्यतीपाते च वैधृतौ। अमायां च नदीस्नानं पुनात्यासप्तमं कुलं। चित्रशभ्युवइद्ध्यायां स्नायाच्छिव

संनिधौ नरः। तत्त्वमवाप्नोति गंगायां तु विशेषतः। तत्र विष्णुपुराणे। शिवलिंगसमीपस्थं यत्तोयं पुरतः स्थितं। शिवगंगेति तज्ज्ञेयं तत्र स्नात्वा शिवं व्रजेत्। यमः। कार्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते।

माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः। ज्येष्ठमासि सिते पक्षे दशम्यां हस्तसंयुतां। दशजन्मान्यदो गंगा तेन पापहरा स्मृता। यमुनायां तथा स्नानं माघे कृष्णचतुर्दशी। विशाखर्क्षे कृष्णपक्षे तु तृतीयां

यां तथैव च। गंगातायेन रः स्नात्वा मुच्यते सर्वकिल्बिषैः। पुष्ये कार्तिकनवमी शुक्ला पितृणां तुस्वायसा। तस्यां स्नानं कृतं दत्तमनंतफलदं स्मृतं। विष्णुः। सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी। अरुणो

दयवेलायां तस्यां स्नानं महाफलं। पुनर्वसुबुधोपेता चैत्रमासे सिताष्टमी। स्रोतस्सु विधिवत्स्नात्वा वाजपेयफलं लभेत्। तथा। कार्तिकं सकलं मासं नित्यं स्नायाज्जितेंद्रियः। जपन् हविष्यभुक् स्नातः सर्वपापैः प्रमुच्य

ते। तुलामकरमेषेषु प्रातःस्नायी सदा भवेत्। हविष्यं ब्रह्मचर्यं च महापातकनाशनं। यमः। षष्ठेद्वि पुलस्त्यो गार्ग्यः सूर्यग्रहोपमा तु। प्रातःस्नायीत वै नित्यं मासौ द्वौ माघफाल्गुनौ। मत्स्यपुराणे। आषाढ्यां

दिवसं मासि प्रातःस्नायीत वै नरः। विप्रेभ्यो भोजनं दद्यात् कार्तिक्यां गोप्रदो भवेत्। विशेषवं वपदं याति विष्णुव्रतमिदं स्मृतं। मार्कंडेयः। गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलं। तत्फलं जाह्नवीस्नाने राहु

ग्रस्ते दिवाकरे। वृद्धवसिष्ठः। रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः। सप्तजन्मांतरे रोगी ङः खत्तागीसहस्रवेत्। मार्कंडेयः। ब्रह्मयामलके विष्णुरेकादश्यां विशेषतः। अकामः सर्वदा स्नानं

४ मद्गमा १२

कुर्वीतामलकैर्नरः। नवमीं चैव पर्वकालं च वर्जयेत्। गर्गः। कुर्यान्नैमित्तिकं स्नानं शीतांभिः काम्य मेवस्या। निर्ययाद्दृच्छिकं विवयथारु यिसमाचरेत्। ब्रह्मांडपुराणे। नित्यं नैमित्तिकं काम्यं त्रिविधं स्ना

नमुच्यते। तर्पणं तु सचैलस्य अंगत्वेन प्रकीर्तितं। अंगतर्पणं तु देवांस्तर्पयामीत्यादिकं यजुर्वेदिकं। अथ माघस्नानविधिः॥ ॥नारदीयपुराणे॥ ॥संप्राप्ते माघमासे तु तपस्विजनवल्लभे।

इति काम्यस्नानानि। अधिकतागमुकायां सरित्तत्रानीतं तोय

कौशीती सर्ववारीणि समुद्रं गच्छति ताः स्फुरे। पुनाति सर्वपापानि निर्विशं मनि न संशयः। तडागे स्वल्पवा स्नायात्कोपे तांडास्थिते तथा। वायुना ताडितं रात्रौ गंगास्नानसमं स्मृतं। मकरस्थे दिवाकरे। ततश्चोत्थाय नियमं गृह्णीया

मित्यर्थः। स्नात्वा वर्ष्णिन सेवेत अस्नातो वा कथं चन। सेवेताप्तिं होमार्थं निशीतार्थं कथंचन। विष्णुः। दर्शे वा पौर्णमासी वा प्रारभ्य स्नानमाचरेत्। कुष्ट्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे। पितॄणां तर्पयित्वा तु अवती

द्विधिपूर्वकं। माघमासमिमं पूर्णं स्नास्येहं देव माधव। तीर्थस्यास्य जले नित्यं इति संकल्प्य चेतसा। ततः स्नात्वा स्मृते तीर्थे दत्वा शिरसि वै मृदं। वेदोक्तविधिना राजन् सूर्यायार्घं नियोजयेत्। पितॄणां तर्पयित्वा तु अथ शक्त्याधनाद्यं स्वैच्छासं

यतितां जलात्। — मौनी नमस्कृत्य प्रजयेत्सुरबोधं मां शंखचक्रधरं देवं माधवं नाम पूजयेत्। वह्निकुंडविधानेन लक्ष्मीकोसीनो स्वेतु। स्वशय्या ब्रह्मचर्येण राक्षः स्नानं समाचरेत्। अथ शक्त्याधनाद्यं स्वैच्छासं नार्थी द्विजे

च कुर्यात्। अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः। तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी। तिलदश्तिलसोक्ता च षट्तिली नावसीदति। तिलमामलकाश्चैव तीर्थादयस्तु निरग्रयः। तथा पक्षालयेद्धर्मिसेधनार्थी द्विजे

न्मनां। एवं स्नानावसाने तु भोजयेद्यं नवारितं। भोजयेद्द्विजदांपत्यं स्वपेद्वस्त्रस्वपाणिः। कंबलाजिनरत्नानि वासांसि विविधानि वा। लक्ष्मानिवेदयानि प्रच्छादनपटीस्तथा। उपानहौ तथा गुप्तमोचकोपायमोचकौ। च

नेन विधिना दद्यान्माधवः प्रीयतामिति। अत्र समापनमंत्रः। सवित्रे प्रसवित्रे च परं धामाजले मम। त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा। दिवाकरजगन्नाथ प्रभाकर नमोस्तु ते। परिपूर्णं कुरुष्वेदं माघस्नानं तवाज्ञया। अ

हन्यहनि दातव्याः खिलाः शर्करयान्विताः। माघावसाने सुनगे भद्रं संभोजनं तथा। स्वयोनिप्रीयतां देवो विष्णुर्मूर्तिर्निरंजनः। दंपत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते। त्रिंशतु मोदकादेयाः शर्करातिलसंयुताः। नागत्रयं तिल

३४

68

नोच चतुर्थी शर्करां शाकं। अनन्यां गौरवरारादै सर्वमासत्राया — ति॥ ॥इति माघस्नानविधिः॥ ॥ क्रियांगस्नानलक्षणं प्रागभिहितं। तन्नुते निवक्ष्या व्याख्यातं॥ अथ मलापकर्षणस्नानं॥ ॥ तत्र गार्ग्यः॥
पंचमी नवमी विवर्ह्य तृतीयां च त्रयोदशीं। एकादशीं द्वितीयां च पक्षयोरुभयोरपि। अस्वंगस्य विनिर्दिष्टास्तिथयो वर्ज्या निषिद्धते। चत्वारि तु स्पृशन्ति आयुः प्रज्ञा यशो बलं तथा। पंचदश्यां चतुर्दश्यामष्ट
म्यां रविसंक्रमे। द्वादश्यां सप्तमी षष्ठ्यां तैलस्पर्शं विवर्जयेत्। गार्ग्यः। त्रयोदश्यां तृतीयायां प्रतिपद्दशमीषु च। तैलाभ्यंगं न कुर्वीत स्वर्गे … नवमां विना। माहात्म्यात् … रिक्तां तिथिं तथा। तैलेना
भ्यंजयेद्यस्तु … परिहीयते। व्यासः। आदित्यादिषु वारेषु तापः कीर्तिरल्पायुर्धनं … सर्वकामदः। स्नानतः च मातृ। गार्ग्यः। मांसं … स्नानं पंचदश्यां तिलाभ्यंगं चतुर्दशी। अष्टमी ग्राम्यधर्मं च वर्जनीयं … पातये
त्। षष्ठ्यष्टमी अमावास्या उभे पक्षे चतुर्दशी। अत्र संनिहितं पापं तैले मांसे क्षुरे स्त्रियां। अत्र … मार्कण्डेयः … सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन। तिलाभ्यंगनिषेधस्त्व
र्थायेरपीष्यते। स्नेहात्यंगास्तवश्चैव सस्नेहः सार्षपादिकः। न तु जनायते तैलस्य निषेधो … एव सा। तैलं चात्र … तिलस्नेहे सरूढौ … योगिकः। अत एव तिलविकारा अपि पिण्याकतिलमोदकशष्कुलीत्यादयो निषेधाः। ने
व जायते मनुः। शिरस्नातस्तु तैलेन नांगं किंचिदुपस्पृशेत्। अस्यार्थः। तैलेन शिरःस्नातः सन् सर्वांगमर्दं पि तैलेन न स्पृशेत्। न प्रक्षालयेदिति। एतावंत तस्मिन्दिवसे एव न … इति शिष्टाचारात् ज्ञेयं। निषिद्धदिना
दिष्वपि मांगल्यादिषु रक्तवत्येव तथा सत्यायनः। मांगल्ये विद्यते यस्मिन् … सर्वे … स्नेहमात्रं समाश्रयेत्। … शिष्यते। निषिद्धतिथिष्वपि … योगे तैलस्नानं कार्यं तिथ्यादिदोषावार
स्यप्राबल्यात्। … तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणं। करणं षड्गुणं चैव वारस्त्वष्ट गुणः स्मृतः। इति। तिलैः स्नानं सदा पुण्यं … दिमलके श्रियै। सप्तमी नवमी दर्शे रविसंक्रमणादिने
सा। तथा दर्शे च सप्तम्यां संक्रांतौ च रवेर्दिने। चंद्रसूर्योपरागे च स्नानमामलकैस्त्यजेत्। … स्मृतः। सर्वकाले तिलैः स्नायादिति व्यासोऽब्रवीन्मुनिः। शिरःस्नानं तटे कृत्वा … यथाविधि
अथ क्रियास्नानं॥ ॥ तत्र शौनकः। क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकं। मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि। तीर्थस्यावाहनं कुर्यात्तत्त्वक्ष्याम्यतः परं। प्रपद्ये वरुणं देवमंभ
सां पतिमार्जितं। याचितं देहि मे तीर्थं सर्वपापापनुत्तये। सान्निध्यमस्मिंस्तोये तु क्रियतां मदनुग्रहात्। रुद्रान् प्रपद्ये वरदान् सर्वानप्सुषदस्त्वहं। सर्वानप्सुषदश्चैव प्रपद्ये प्रणतः स्थितः। देवमप्सुष
दं वह्निं प्रपद्ये … निषूदनं। आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा। रुद्राश्चाग्निश्च … सर्पाश्च वरुणश्चाप एव च। शमयंत्वशुभं पापं रक्षंतु च सदा शुभं। इत्येवमुक्त्वा कर्तव्यं ततः संमार्जनं बुधैः। आपो
हिष्ठेति तिसृभिर्यथावदनुपूर्वशः। हिरण्यवर्णा इति च … तिसृभिस्तथा। शंनो देवीरिति तथा शंन आपस्तथैव च। इदमापः प्रवहत व्यस्तं सर्वमुदीरयेत्। एवं संमार्जनं कृत्वा छंदआर्षादिदैवतं। अघमर्षण
सूक्तस्य संस्मरेत्प्रयतः सदा। ततो निमज्ज्य … त्रिः पठेदघमर्षणं। प्रदद्यान्मूर्धनि तथा महाव्याहृतिभिर्जलमिति। इति क्रियास्नानं॥ ॥ अथ गौणस्नानानि। तत्र जाबालिः। असामर्थ्याच्छरीरस्य देशकालाद्यपेक्ष
या। मंत्रस्नानादिकाः सप्त केचिदिच्छंति सूरयः। योगी याज्ञवल्क्यः। मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात्। आपोहिष्ठादिभिर्मांत्रं मृदालंभस्तु पार्थिवं। आग्नेयं भस्मना स्ना
नं वायव्यं गोरजः स्मृतं। यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते। वारुणं चावगाहश्च मानसं विष्णुचिंतनं। दिक्कालादसामर्थ्यात् सर्वं तुल्यफलं स्मृतं। कूर्मपुराणे। स्वस्थस्य वारुणं स्नानं ब्राह्मं व्याधौ जले तथा। दिव्यं
अशक्तानां … वायव्यमुपपद्यते। जाबालिः। अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणां। आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः। नासिरः … कटिं … आर्द्रेण कर्पटेनांगं कापिलं शोध
नं स्मृतं। विष्णुः। … रस्वती स्नानं प्राप्तं सारस्वतं मतं। विद्वद्भिः कोनपावित्र्यापादनं सारस्वतं स्नानमित्यर्थः। … एवं स्नात्वा वस्त्रादि … न प्रमृज्यात् तथा … अप्रम
ज्य न वस्त्राणां गात्राण्यंबरपाणिना। न चाविधूतयेत्केशान् वाससी न विधूतयेत्। तिस्रः कोट्योऽर्धकोटी च याव … लोमानि मानवे। स्रवंति सर्वतीर्थानि तस्मान्न परिमार्जयेत्। देवलः। देवाः पिबंति शिरसो मुखं
स्य पितरस्तथा। वक्षसा पितृगंधर्वा अधस्तात्सर्वजंतवः। … अंगानि सक्तो वस्त्रेण पाणिना वा न मार्जयेत्। अमार्जयन्निति गोदोहमात्रं तिष्ठेत्। एतच्च शिष्टाचारादवगम्यते। ततो वाससी परिधाय …

…सुरे ५

स्मृत्यां याज्ञवल्क्यः। स्नात्वैवं वाससी धौते अक्लिन्ने परिधाय च। प्रक्षाल्योरू मृदाद्भिर्हस्तौ प्रक्षालयेत्तथा। अथ वस्त्रविधिः॥ ॥ तत्र स्मृतिः। ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुल्बणं। पीतं वैश्यस्य शूद्रस्य नीलं मलवदि
ष्यते। तत्र श्वेतं निबिडं रक्तं धातुरक्तं। शातातपः। कृष्णं नीलं न वस्त्रं तं सदर्शयन्न हारितं। अहतं तत् द्विजानीयात्सर्वकर्मसु पावनं। ईषद्धौतं जलमात्रप्रक्षालितं। यद्यप्यधौतं यद्यपि प्रक्षालितं तदप्यहतं। शातातपः। ईषद्धौतं नव
यथा हस्सचतपाः। अहतं यन्त्रनिर्मुक्तं उक्तं वासः स्वयंभुवा। अस्तं तन्मांगलिके च तावत्कालं न सर्वदा। मांगलिके विवाहादि प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत्। पश्चिमाग्रं दक्षिणाग्रं मतः प्रक्षालनाद्धु
लितोऽन्यद्वस्त्रं वासः शायनीयं नराधिप। अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि। अन्यल्लोकयात्रायामन्यदीश्वरदर्शने। बोधायनः। उत्तरं वासः कर्तव्यं पंचस्वेतेषु कर्मसु। स्वाध्यायोत्सर्गदाने भु
क्ताचमनयोः स्मृतं। व्याघ्रगोमूत्रादिः। स्वाध्याये आदिग्रहणं विहितसकलकर्मोपलक्षणार्थं। याज्ञवल्क्यः। अन्तावधौत वस्त्रस्य पदं होमाजिनानि च। अकृत्वा पशुगर्भं देवाद्विवासायेन वातवेन्नूय
ज्ञोपवीतवद्धार्यं श्रौतस्मार्तेषु कर्मसु। तृतीयमुत्तरीयं च वस्त्राभावे तदिष्यते। नारकण्वः। वस्त्रोत्तरीयालाभे त्र्यंगुलं वा वत्तरंगुलं वासस्त्रिवृत्सूत्रान्तु तिपरिमंडलं तदुत्तरीयं कुर्यात्। तथा व्यापार
स्करः। एकवीचिवासा सवति तत्संवीतस्य वा चरणं गोप्यं छादयीतेति। योगी योगेश्वरः। भूतादि हेतोर्नाईवासी निकवासा स्थलेऽजपेत्। कषायं कृष्णवस्त्रं वस्त्रं च न मलाग्रथितमेव च। वर्जयेद्धि स्त्रियाः स्थिः। एतद्व्यसनि विसवेदि
स्कपुराणे। होमदेवार्चनाद्यासु क्रियास्वासनेऽजने। निकवस्त्रः प्रवर्तेत द्विजवाचनिके जपे। जातूकर्ण्यः। परिधानाद्बहिः कच्छा निबद्धा ह्यासुरी मता। धर्मकर्मणि — वर्जनीया प्रयत्नतः। परिधापनकं बहि
रुत्तरीयं च मंत्रतः। आचमेद्धि द्विजो वस्त्रे धौते विपरिधाय च। तत्रापूर्वग्रहणे एव मंत्रो पारस्क रेण दर्शितः। परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि। शतं च जीवामि शरदः पुरूची
रायस्पोषमभिसंव्ययिष्ये इति। उत्तरीये यशसा मा द्यावापृथिवी यशसामेन्द्राबृहस्पती यशो भगश्च मा विदद्यशो मा प्रतिपद्यतामिति। तथा वासः छन्नोपानदध्वास्पृष्टं विचिन्मंत्रत
इति निन्द्यवस्त्रपरिधेवारादयो जपाः। शास्त्रे प्रदर्शिताः। वृद्धगुरेश्वरः। सार्तं द्विचषने वणः शरधरे क्लेशः सदा स्वमिजवस्त्रे धलानकेरबुधेः सुरस्य रोविद्यागमः संपदः। नान
योगरतिः प्रमादवनिताशय्यादिलातोत्संगे देवः शाखतरोगवाक्लिन्नरो द्वावंबरसोरि णाः। श्रीपतिः। रोहणीशुक्ररविकेषु तो नूतनं रेपिस्त्र धृतवस्त्र द्वयाद्देवतीर्थवसुदेवतस्वतन्ना
वस्त्रपरिधानमिष्यते॥ ॥ अथ क्रमप्राप्तः तिलकविधिः॥ ॥ ब्रह्मांडपुराणे॥ ॥ भगवान्नारायणः। अंगु ष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्। अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी। एतैरंगु
लिभिर्देहस्तु कारयेन्न नखैः स्पृशेत्। वर्तिदीपाकृतिं वापि वेणुपत्राकृतिं तथा। पद्मस्य मुकुलाकारं तथैव कुमुदस्य च। मत्स्याकूर्माकृतिं वापि शंखाकारमतः परं। दशांगुलप्रमाणं तु उत्तमोत्तममुच्यते। नवांगु
लं मध्यमं स्यादष्टांगुलमतः परं। सप्तषट्पंचतिस्रः पुंड्रं मध्यमं त्रिविधं स्मृतं। चतुस्त्रिद्व्यंगुलैः पुंड्रं कनिष्ठं त्रिविधं भवेत्। ललाटे केशवं विद्यान्नारायणमथोदरे। माधवं हृदये न्यस्य गोविंदं कंठकूपके। विष्णुं च
दक्षिणे कुक्षौ तद्भुजे मधुसूदनं। त्रिविक्रमं कंठदेशे वामकुक्षौ तु वामनं। श्रीधरं च सदा न्यस्य वामबाहौ नरः सदा। पद्मनाभं पृष्ठदेशे ककुदि दामोदरं स्मरेत्। वासुदेवं स्मरेन्मूर्ध्नि तिलकं कारयेत्क्रमात्। व्यासः।
जाह्नवीतीरसंभूतां मृदं मूर्ध्नि बिभर्ति यः। बिभर्ति रूपं सोऽर्कस्य तमोनाशाय केवलं। सत्यतपाः। गोमतीतीरसंभूतां गोपीचंदनमुद्वहेत्। मृदं मूर्ध्नि विहेयस्तु सर्वपापैः प्रमुच्यते। ब्रह्मांडपुराणे। श्यामं शांतिकरं प्रोक्तं
रक्तं वश्यकरं भवेत्। श्रीकरं पीतमित्याहुः वैष्णवं श्वेतमुच्यते। ब्रह्मपुराणे। यागो दानं तपो होमः स्वाध्यायः पितृतर्पणं। भस्मीभवति तत्सर्वं ऊर्ध्वपुंड्रं विना कृतं। ऊर्ध्वपुंड्रं मृदा कुर्यात् त्रिपुंड्रं भस्मना सदा। तिल
कं वै द्विजः कुर्याच्चंदनेन यदृच्छया। ऊर्ध्वपुंड्रं द्विजः कुर्यात् क्षत्रियस्तु त्रिपुंड्रकं। अर्धचंद्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु। अथ माध्याह्निकीं संध्यां स्नानोद्दिष्टां समाचरेत्। उपस्थानं च तत्रोक्तं जपस्याच विधिः क्रिया।
अथ ब्रह्मयज्ञः॥ ॥ तत्र श्रुतिः। उदित आदित्ये पवित्रपाणिः स्नातो वनिर्जप विरावमेतद्धि परिस्तर्यासनं कृत्वा जपेत् विरासश्च तु प्रानासिके श्रोत्रे हृदयमालभ्येति। अयमाश्वमेधिकप्रकारः। आश्वलायनानुष्ठानप्रकारः।
शौनकेनोक्तः। आश्वोदग्ग्रामान्निःक्रम्याप्सु स्नात्वा यज्ञोपवीत्यक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी संधाय पवित्रवंतौ द्यावापृथिव्योः संधिमीक्ष

२५

माणः॥ संमील्य वा यथायुक्तमात्मानं मन्येत तथा युक्तोऽधीयीत स्वाध्यायं दुः पूर्वाह्णे इति ॥ सवित्रीमन्वाह पच्छोऽर्धर्चशः सर्वामिति तृतीयकं यावन्मन्येत तावदधीयीत यापरिदधाति नमो ब्रह्मण इति ॥ अ
लिन्नवासी अनार्द्रवासाः ॥ महदुपस्तीर्य प्रक्कलिर्दर्भैस्तुवं निबिडं यथा भवति तथाच्छाद्य च पस्थं कृत्वा ॥ वामपादांगुष्ठे दक्षिणपादांगुष्ठं निधाय पादपार्ष्णिसंमीलनं कृत्वा तन्मध्य उपस्थानं तिरिव स
वृतिलडुपस्थमिकुर्यात् ॥ इतरेतरपादचर्ष्यासंस्थानेनोपावेशनमुपस्थकरणं इति स्मृतिमंजर्या ॥ अथ वा यथोपादर्शं कुर्यात् यथा वा युक्तमात्मानं मन्येत यथा समाहितमात्मानं मन्येत
र्ङ्कारपूर्वाः सूरादिव्याहृतित्रयं क्रमेण गायत्रीपादादौ निक्षिप्य प्रथमतः पठेत् ततस्तथैव वसूरादिव्याहृतिद्वयमर्धादिक्रमेण ततस्तथैव तृतीयव्याहृतीपूर्विकां सर्वां गायत्रीं पठेत्
यावन्मन्येत तावदित्यादिगायत्रीजपानन्तरं ऋग्यजुःसामादि यावत्पठितुं मन्येत तावदधीयनामा ब्रह्मणे नमो अस्त्वग्नये च तथा परिदधाति परिधानं त्रिपवनो याज्ञवल्क्यः ॥ अ
दावारस्य वदं उत्साहो पर्युपरि क्रमात् तु यदधीते स्वहं शाखायाः सस्वाध्याय इति श्रुतिः ॥ ब्रह्मयज्ञस्य सिद्ध्यर्थं विद्यां वाधमन्तिकीं जपेत् जप्यां च प्रणवं वापि ततस्तर्पणमारभेत् ॥ मनुः ॥ अपोस
मीपनियतो नित्यं विधिमास्थितः ॥ सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ॥ अरण्यं गच्छेति यथाच्छदिर्न दृश्येत तथारण्यं गच्छेत्यर्थः ॥ तथा च श्रुतिः ॥ ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि
आदच्छदिर्दर्शं दीप्यां वादितं उदिते आदित्य इति ॥ आदित्यस्य उदयोत्तरकालः सकालो पि गृह्यते न प्रातः काल एव ॥ अत एव बृहस्पतिः ॥ सचार्कोर्घ्यपूर्णा कार्यः पश्चाद्वा प्रातराहुतेः ॥ विश्वदे
वावसाने नान्यदन्ते निमित्त इति ॥ स ब्रह्मयज्ञ इत्यर्थः ॥ वैश्वदेवावसाने इति मनुष्यो ॥ ब्रह्मयज्ञाय सनकाद्युद्देशेन दं न कोऽपि यदीयते स एव नान्तिराणे यदि स्यात् तर्पणा
दर्वा ब्रह्मयज्ञः कृतो न हि ॥ क्रियाम नुष्ययज्ञं वितनुतः स्वाध्यायमारभेत् यदि दिवा दिनि मि ॥ ध्यानान्तरां मनुष्ययज्ञं सनकाद्युद्देशेन ... यदा ग्राममध्ये तदा मनसा पठेत्
तथा च श्रुतिः ॥ ग्रामे मनसा स्वाध्यायं स्वस्वगृह्यानुसारेण च ब्रह्मस्वाध्यायमधीय तेनाक्त बलिब्रह्मयज्ञान्नतः तदा कालान्तरेऽपि भवति ॥ ब्रह्मा जातिकृतं पुष्यम
नध्यायवषट्कृतौ तथा ॥ वेदोपकरणे चैव स्वाध्याये चैव नित्यके नानुरोधोऽस्त्यनध्याये होम न दिवा नक्तं भवति ॥ मनुः ॥ नित्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतं ब्रह्मा जातिकृतं पुण्यम
मन्त्रेष्वेव हि ॥ वेदोपकरणे वेदांगे अत्र विशेषो गौतमेनोक्तः अथ यदि वाला वायात्मानं यम
विद्युत्पतने वा अवस्फूर्जद्वा वेकावर्चा मर्कवा यजुरेकमेकं सामाभिव्याहरेत् ॥ स्तुर्वं सपतं ॥ पः अध्यायं जुहोमीति ॥ अत्र वा तातावाया ॥ दिवाध्ययनाध्यायोपलक्षणं आतान ध्यायेऽस्वेकुर्वी
दिमवपठेत् तानाधिकामिति गम्यते ॥ आदावेव वक्तं तत्पूर्वं परस्तात्त्ववरम्यात् जैशात्तुत्तरतः ॥ द्विस्नाय यथा वमनमाचरेत् इति विद्या तपो याति निरयं निर्विष्ठारीरितः ॥ ब्रह्मयज्ञार्चितादेवः प्रीयतामजं
नार्दनः ॥ इति ब्रह्मयज्ञविधिः ॥ ॥ अथ तर्पणं ॥ तत्र बृहस्पतिः ॥ ॥ ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्यां वाधमन्तिकीं जपेत् जप्यां च प्रणवं वापि ततस्तर्पणमाचरेत् ॥ ज्ञातानपाः तर्पणं च शुश्रूषुः कुर्यात् स्वग्रहं
स्नानाकांक्षिजः ॥ देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं ॥ अत्रांजलिनियममाह व्यासः ॥ एकैकमंजलिं देवानामेव जपेज्जयेत् ऋषीणां द्वयं यथान्यायं सकृदपि प्रजायतेः यथान्यायमिश्र्येन न देवानामि
वत्रिरित्यर्थो गम्यते ॥ यत्तु त्वाशब्दार्थी अपित्रि स्याद्दंजलिद्वयं गृह्यात् ॥ अत्रांजलिसंख्यायां स्वस्वगृह्यानुसारेण व्यवस्था ॥ यथा स्वशाखायां नाकापि विशेष आम्नातस्तथा विकल्पः ॥ याज्ञवल्क्यः ॥
अचारत्वेन सव्येन पाणिना दक्षिणेन तु आदेवर्षी स्तर्पयेद्धीमानुदकांजलिभिः पितॄन् अन्नापि सर्ववेदवेद्यवचनः एवं च एकहस्तेन तोयेन न
कुर्यात्तर्पणं ॥ पितरो न प्रशंसन्ति न प्रशंसन्ति देवताः ॥ उत्सात्त्यामपि हस्ताभ्यामुदकं यः प्रयच्छति ॥ समूढो नरकं याति कालसूत्रमवाक्शिराः इति योगियाज्ञवल्क्याद्यादिवचनानि तानि तत्तच्छाखाग
युक्तानि निषिधकानि तु सर्वसाक्षरण्येन ॥ अतान काप्यनुपपत्तिः ॥ ननु अचारत्वेन सव्येन पाणिना दक्षिणेन तु आदेवर्षी स्तर्पयेदिति कूर्मपुराणवचने देवर्षीनिति विशेषोपादानादितरस्य प्रकृते
विशेषविषयकूर्मपुराणवचनविषये देवर्षितर्पणानन्तु प्रविद्याचिति वत्तु ॥ नैवं ॥ अचारत्वेन सव्येन नाम्ना गोत्रेण चाप्यथेति योगियाज्ञवल्क्येन नामगोत्रसहितं सव्यहस्ते
स्तर्पणवचनानि ॥ सामान्यानि विशेषविषय कूर्मपुराणवचनविषये

मदनपा०

४ ग्रा ५

न्वारब्धदक्षिणहस्तेन तर्पणविधानात् ॥ मात्स्याद्याचारएणं तु पितृणामेव न देवानामृषीणां ॥ अतएकहस्तेन तर्पणं देवर्षिपितृतर्पणं साधारणं ॥ एवं च सर्वोऽपि व्यवस्था ज्यायसी ॥ विवाहादावेकहस्तेन तर्पणं च काम्यानि न ॥ विवाहे श्राद्धकाले च पाणिनैकेन दीयत इति ॥ हारीतः ॥ वसिष्ठश्च वसनं शुष्कं स्थले विस्तीर्य बर्हिषि ॥ विधिज्ञस्तर्पणं कुर्यान्न तु पात्रे कदाचन ॥ एतच्चाशक्यस्थलतर्पणविषयं ॥ तदाह दक्षः सएव पात्राद्वा जलमादाय शुभे पात्रान्तरे क्षिपेत् जलपूर्णे तथा गर्ते न स्थले तु विबर्हिषि ॥ पृथ्वीचन्द्रे पितामहेनोक्तं ॥ हेमरूप्यमयं पात्रं ताम्रं कांस्यसमुद्भवं ॥ पितृणां तर्पणे पात्रं मृन्मयं तु परित्यजेदिति ॥ अत्र योगीयाज्ञवल्क्यः ॥ अद्भिस्तु तेन तिलैश्च न तिलान्मिश्रयेज्जले अन्यथा वामहस्तेन ततस्तर्पणमाचरेत् ॥ अत्र चैतद्वचने च पृथ्वीपाठः ॥ पितामहास्विनो वामहस्ताच्चारस्येन दक्षिणहस्तेन तर्पणं तेषां वामहस्तेन तिलग्रहणं मिश्रणं तु संभवः ॥ अपरो विधिर्वृद्धोक्तानि वाक्ये ॥ आदाय सर्ववचनं विशेषं च कर्यानुसारेण प्रागग्रेषु सुरान् सर्वान् दक्षिणाग्रेषु वै पितॄन् ॥ देवदेवर्षीणामपि क्रमेणैव राणां देवांश्च ऋषींश्चैव तर्पयेद्दत्तात्तादकैः ॥ पितृंस्तथा तिलैः सम्यक् स्वसूत्रोक्तविधानतः ॥ गार्ग्यः ॥ अत्तैस्तु तर्पयेद्देवान्मनुष्याञ्शबलैस्तिलैः ॥ पितॄंस्तु तर्पयेत्कृष्णैस्तर्पयन्सर्वदा द्विजः ॥ तिलग्रहणं तु वामहस्तेनाहृष्णमादूर्मरीचिः ॥ मुक्तहस्तेन दातव्यं नमुद्रां तत्र दर्शयेत् ॥ वामहस्ते तिलान्न्यस्य ग्राह्यास्तु कृष्णहस्तस्तु दक्षिणः ॥ प्रदेशिन्यङ्गुष्ठाग्रसंयोगो मुद्रा अतएव तर्जन्या अङ्गुष्ठेन वा तिला ग्राह्याः ॥ तदयोतयदक्षिणहस्तस्थमेवा अतएव युक्तहस्तेन दातव्यमित्युक्त्वा पिमुक्तहस्तस्तु दक्षिणः इति पुनरस्ति हितं मरीचिना ॥ एतच्चैयमामञ्जलिना तर्पणं ॥ तद्विषयं विषयान्तरे तु स्वमनिहिता तिलस्थापनस्थानं तु स्मृत्यर्थसारे ॥

वामहस्ते तिलान्न्यस्य ग्राह्या जलमध्ये तु तर्पयेत् तु लेशाद्यान्न जले पात्रे रोममूलेन कश्चित् तु जलतर्पणे लोमरहितप्रदेशावामबाहुः ॥ तिलान्संस्थाप्य मुक्तारहित दक्षिणतर्जन्यङ्गुष्ठयोरन्यतरेण तिला गृहीत्वा वामहस्ततलेन स्थापयित्वा तर्पयेदित्यर्थः ॥ वामबाहुतिलसंस्थापनव्यतिरिक्तम च्छलतर्पणापि समानी ॥ एवमुक्ताप्रकारेण स्थले स्थित्वा स्थलपात्रे वा तर्पणं कुर्यात् न तु जले ॥

इति प्रसिद्धं तथा च वस्त्रकाल्यायिनिनाऽदेवतानां पितृणां च जले दद्याज्जलाञ्जलिं ॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलं ससदिति ॥ तत्तु जलतर्पणनिषेधावचकानि तानि जलस्थितस्यायानि जलतर्पणनिषेधकानि तानि स्थलस्थितस्ये तिवचनानां विरोधः परिहरणीयः ॥ विमुक्तस्थलस्थितस्यापि जलतर्पणं कुर्यात् दद्धानि तायात्र शुचिः स्थलं वा स्यात् उदके देवताः पितॄन् तर्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितमिति हारीतः ॥ आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपं ॥ शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपं ॥ अत्र च अमुक

तृप्यतु तृप्यतामिति वा अमुकं तर्पयामीति वा प्रयोगास्तवति तथा च योगीयाज्ञवल्क्यः ॥ तृप्यध्वमिति समुच्चार्य तृप्यतामित्यथापि वा ॥ विधिज्ञः प्रक्षिपेत्तोयं देवादीनामशेषतः ॥ बोधायनः ॥ अथ दक्षिणतः प्राचीनावीती पितॄन् स्वधा नमस्तर्पयामि पितामहमित्यादि स्मृत्यर्थसारेऽपि ब्रह्मादयो ये देवास्तां देवांस्तर्पयामि ॥ भूर्देवांस्तर्पयामि भुवर्देवांस्तर्पयामि स्वर्देवांस्तर्पयामि भूर्भुवः स्वर्देवांस्तर्पयामि ॥ एवं ऋषीन् ॥ पितॄन्नित्यादि ॥ यमः ॥ दोहेऽशोयुगमात्रं तु ऊर्ध्वमुदकाञ्जलिं ॥ गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥ गोशृङ्गनियतस्य प्रमाणत्वात्तु विवक्षितप्रमाणमाह दक्षः ॥ प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् ॥ उदङ्मुखो मनुष्यांस्तर्पयेत्पितॄन् दक्षिणतस्तथा ॥ अग्रैस्तु तर्पयेद्देवान्मनुष्यान्कुशमध्यतः ॥ पितॄंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमं ॥ मरीचिः ॥ विना रूप्यसुवर्णेन विना ताम्रतिलैस्तथा ॥ विना मन्त्रैश्च दर्भैश्च पितृणां नोपतिष्ठत इति ॥ नात्र रजतादिसमुच्चयो विवक्षितः ॥ अतएव संग्रहकारः खड्गमौक्तिकहस्तेन कर्तव्यं पितृतर्पणं ॥ मणिकाञ्चनदर्भैर्वा न शुष्केन कदाचनेति ॥ शुष्केन केवलेनाखड्गादिरहितेनेति ॥ यावत् अन्यथा शोपादानां समुच्चयस्य ग्रहः ॥ तथा मरीचियोगियाज्ञवल्क्यावपि तिलानामप्यलाभे तु सुवर्णरजतान्वितं ॥ तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण वा पुनरिति ॥ अत्र च खड्गादिनिरपेक्ष्यो हस्तः कार्यो न तु खड्गादिपात्रस्वीकरणं तथा सति एकैकमञ्जलिं दद्यादिति जलनिर्विधायकवाक्यबाधापत्तेः ॥ एवं तर्हि खड्गादिपात्रप्रशंसापराणां वाक्यानां विधेयकाकांक्षायाअर्थवादप्रामाण्यं च मन्त्रुनाऽतिहितां राजतेनाऽजनेरेषामथवा रजतान्वितैः ॥ वायुपिरि कुर्यादन्नं अक्षय्यायोपकल्पत इति ॥ एतदपि श्राद्धप्रकरणपरिपठितत्वादर्घ्यदानमेव ॥

३६

अतस्तर्पणे खड्गादिमुद्रिकातिलहस्तेन कार्यं। तथा च याज्ञवल्क्यः। अनामिकाधृता दर्भं तर्जन्यां रूप्यधारणं। कनिष्ठिकाधृतं खड्गं तेन स्नातो न तैर्नरः इति। यच्च शंखेन तर्पणं प्रकारान्तरं एवासिहि ससौ

सौवर्णेन पात्रेण राजतेनोडुंबरेण खड्गपात्रेणान्यपात्रेण वोदकं पितृतीर्थस्पर्शं दद्यादिति। तच्च पितृतर्पणप्रकरणोक्तत्वात् अर्घप्रकरणे योज्यं। अंजलिवाक्यमपि च याप्रकरणस्य दुर्बलत्वात् अ

सवा वाक्याप्रकरणशिष्टाचाराणामविरोधश्चायं यस्मिन् पात्रे तदंजलिः प्रशिथिला न स्यात् तद्वैनाद्य कर्मात्र विशिष्टेनांजलिना पितृतर्पणं सलील उदकं तर्पणविद्यात्। तालिखितः। अप्सु खाय ज्ञोप

वीति प्राग्ग्रे। कुशैर्देवतातर्पणं देवतीर्थेन कुर्यात्। देवाश्च योगी याज्ञवल्क्ये नोक्ताः। ब्रह्माणं तर्पयेत् पूर्वं विष्णुं रुद्रं प्रजापतिं। देवांश्छंदांसि वेदांश्च ऋषींश्चैव सनातनान्। आचार्यांश्चैव गंधर्वा

नाचार्यतनयांस्तथा। संवत्सरं सावयवं देव्यश्चाप्सरसस्तथा। आचार्यान्व्यासादीन्। सावयवं अवयवा - साद्यः। तथा देवानुगान्नागान् सागरान्पर्वतानपि। सरितश्च मनुष्यांश्च यक्षान् रक्षांसि चैव हि।

पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूंस्तथा। वनस्पतीनोषधीश्च भूतग्रामं चतुर्विधं। विष्णुसमुच्चाय। ततः कृत्वा निवीतं च यत्नसूत्रमुदङ्मुखस्तदिति। प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत्पृथक्। सनकादि

नि। सनकश्च सनंदश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा। एते ब्रह्मसुताः सप्त मनुष्याः परिकीर्तिताः। ततः स्वस्वशाखानुसारेण मंडलऋषीन् प्राजापत्यादिकान् तर्पयेत्

र्पयित्वा पितृतर्पणमारभेत्। तत्र याज्ञवल्क्यः। अपसव्यं ततः कृत्वा सव्यं च पितृदिङ्मुखः इति। तथा सव्योत्तराभ्यां पाणिभ्यामिति जीवतस्सिः। अपसव्यं ततः कृत्वा सव्यं च पितृदिङ्मुखः। पितृन्दि

व्यान् दिव्यांश्च पितृतीर्थेन तर्पयेत्। दिव्याश्चादयः। आदित्याश्च पित्रादयः। तद्वदिव्यानले ...वदरिता। ध्रुवो धरश्च सोमश्च आपश्चैवानलोनलः। प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः।

अजैकपादहिर्बुध्न्यो विरूपाक्षोथ रैवतः। हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः। सावित्रश्च जयं तश्च पिनाकी चापराजितः। एते रुद्राः समाख्याता एकादश सुरोत्तमाः। इंद्रो धाता भगः पूषा मित्र

त्वाथ वरुणोर्यमा। अर्चिर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च। एते वै द्वादशादित्या देवानां प्रवरा मताः। इंद्रो धाता भगः सूर्यः अथ तस्यादित्यतर्पणं पृथक्। नवपित्रादितर्पणं च पृथ

मुपास्तमिति। वसुरूपं पितरं तर्पयामि इत्येवं तर्पणं न विधेयं। अपि तु नामगोत्रोच्चारणमेवाश्रा रुद्रवसुरुद्रादित्यत्वेनापि अग्निर्निवात्ति आयेण स्मृत्यर्थसारे। वसुरुद्रादित्यरूपास्तु श्राद्धे

तर्पयेत्पितॄन्। नामगोत्रे समुच्चार्य तिलैस्तीर्थेषु संयत इति। अथवा श्राद्धशब्दो गौण्या वृत्त्यात्र तर्पणे पिवर्तत इति। वस्वादिनामसहितानामेव पित्रादीनां तर्पणमन्त्रायत। शिष्टाचार एवमेव प्राय

ह उपात्त। उदकग्रहणे विशेषमाह याज्ञवल्क्यः। दक्षिणे पितृतीर्थेन जलं सिंचेद्यथाविधि। दक्षिणेनैव गृह्णीयात् पितृतीर्थेन संयतः। तथा। सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च। गोत्रनामस्वधाकारैस्तर्प

येदनुपूर्वश इति। अनुपूर्वशः। पित्रादिक्रमेण। अत्र यद्यप्यसवर्णेभ्य इत्य विप्रादीनां इति तथाप्युत्तमवर्णेन हीनवर्णं प्रति न कार्यं। हीनवर्णेन तूत्तमवर्णे द्विजेन स्नातेन दोषः। ...न तापत्ति

दपि त्वेनाति हितस्मृतिषु। हीनस्योत्कृष्टं न दुष्टं नष्टं स्यात् हीनं च दुष्टमेव। ...शब्दो मूर्धावसिक्तादिद्विजातीनामुपलक्षणार्थः। यद्यप्यसवर्णसापत्नमात्रादयोप्यसवर्णाः। तथापि तत्त

र्पणं कार्यं सुमंतुना तत्तैषां मात्रादिसमत्वप्रतिपादनात्। पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानीति। ...समत्वापादानं तत्र सुरव्यापेक्षया

खिन्नतूनसौ सवतीति नात्र तत्प्राधान्यमपि तु असंनिहितसवर्णतर्पणानंतरमेव तत्तर्पणमिति विवेकः। नन्वेवमंतवचनेपि सवर्णानामेव मात्रादिसाम्यं न त्वेतमानामसदिसवर्णानामिति चेत् न

तथा सति पितृपत्न्यः सर्वा मातरः इति न ब्रूयात्। अपि तु श्च सर्वशब्दो न तु पितृपत्न्यो व्यवस्थितः। सर्वशब्दासंकोचाय सर्वाः एवयुक्ताः। पक्षे एतन्नतीक्ष्णतर्पणमपि ब्राह्मणस्य मनेनिषिद्धमिच्छुतं सवति

जीवत्पितृकमपि याज्ञवल्क्यः। कव्यवाडनलः सोमो यमश्चैवार्यमा तथा। अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च। यदि स्याज्जीवत्पितृक एवाविद्या तदा पितृगणं ये स्याद्यथाविपितादद्यात् येभ्योवापि पिता दद्यात्

एतान् हि वप्रमीताश्च प्रमीतपितृको द्विज इति। न स्यान् जीवत्पितृकः ते भ्यः तिलैस्तर्पणमाचरेत्। उक्ततिलतर्पणस्य च विदपवादो मरीचिनोक्तः। सप्तम्यां रविवारे च गृहे जन्मदिने तथा। भृत्यपुत्रकलत्रार्थी न कुर्या

मदनपा०

तिलतर्पणमिति तथा पक्षयोरुभयोरपि जन्मर्क्षे निशि संध्ययोः । विद्यापुत्रकलत्रार्थी वर्जयेत्तिलतर्पणमिति तिलान्यं वस्तु वर्जयेत् । नानो सोमे त्रयोदश्यां नंदासु च मघासु च । पिंडदानं मृदा स्नानं न
र्यात्तिलतर्पणमिति । स्मृत्यर्थसारे । विवाहे चोपनयने चौले सति यथाक्रमं । वर्षमर्धं तदर्धं च नैव कुर्यात्तिलतर्पणं । तिथितीर्थविशेषेषु कार्यं प्रेतेषु सर्वथा । पिंडं सपिंडानां दद्यात् प्रेतपिंडं विनाप्यनु । अन्
विवाहादौ । पितृयज्ञे च यज्ञे वा मघायां दग्धुरेवत । गयासाम्यं मृताहस्य केचिदाहुः पुराणगाः । तथा तीर्थे तीर्थविशेषे च गयायां प्रेतपक्षके । निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितमिति । असमर्थश्चेत्सं
क्षेपतर्पणं । विष्णुपुराणे । आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन् क्षिपेत्पयोंजलीन् त्रींस्तु कुर्वीत संक्षेपतर्पणमिति । तीर्थे पीडयति यः स्नानवस्त्रमतर्पिते । निराशाः पितरो यांति शापं दत्वा सुदारुणं । परा
शरः । श्राद्धे दर्शे पौर्णमास्यां संक्रांतौ श्राद्धवासरे । वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेत् । [illegible] एवं यः सर्वभूतानि तर्पयेदन्वहं द्विजः । स गच्छेत्परमं स्थानं तेजोरूपमनामयं । इति तर्पणं ॥ ॥ अथ यमत
र्पणं ॥ ॥ तत्र स्कंदपुराणे । माघमासे चतुर्दश्यां अंगारकदिने यथा । तदा स्नात्वा प्रयत्नेन तर्पयेद्यमनामभिः । इति मनुः । याः काश्चित्सरितः प्राप्य कृष्णपक्षे चतुर्दशी । यमुनायां विशेषेण नियतो नियतेंद्रियः । यमाय धर्मराजाय मृत्यवे चांतकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च । औदुंबराय दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नमः इति । तर्पयेदिति नाम्ना । यमाय न
मः । यमं तर्पयामीति प्रयोगः । ग्रंथांतरेपि । कृष्णत्रयोदश्यां चतुर्दश्यां वा । यमाय धर्मराजाय मृत्यवे चांतकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च इति । सप्तभिर्नमस्कारमंत्रैः सप्तोदकांजलीन्
दद्यात्सर्वपापेभ्यः प्रमुच्यते इति । इति मनुः । एकैकस्यां तिलैर्मिश्रांस्त्रींस्त्रीन् दद्याज्जलांजलीन् । तथा । दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणं । अपसव्यविशेषः । स्कंदपुराणे । दक्षिणाभिमुखो भूत्वा ति
लैः सव्यं समाहितः । देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः इति । इति यमतर्पणं ॥ ॥ अथ देवता र्चनं ॥ ॥ एवं तर्पणानंतरं सूर्यायार्घ्यं निवेद्य जलदेवं नमस्कृत्याचम्याच्युतमभ्यर्च्य गृहं गच्छेत् विष्ण्वादि
पूजां कुर्यात् । याज्ञवल्क्यः । ततः सूर्यमुपस्थाय सम्यगाचम्य वस्त्रयोः । अच्युतं शंसमादायस यतात्मा स्वगृहं व्रजेत् । तथा नरसिंहपुराणे । नानाघ्र्यस्तानि वेदद्याद्विष्णुपूजनात्तितं ।
चंडालमूर्धपर्यंतं हंसं [illegible] जलदेवं नमस्कृत्य ततो गच्छेत् [illegible] पौरुषेण तु सू क्तेन नाना विष्णुं समर्चयेदिति हारीतः । कुर्वीत देवतापूजां जपयज्ञादनंतरं [illegible]
ह्मयज्ञः । मरीचिः । विधाय देवतापूजां प्रातर्होमादनंतरं । अथ पूर्वाह्णे देवतार्चनं मुख्यः कालः । पूर्वाह्ण एव कुर्वीत देवतानां च पूजनमिति एवकारस्मरणात् । माध्याह्निकानंतरं कालो विष्णु
ध्यस्य सद्भावः । तथा च कूर्मपुराणे । पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेदिति । विश्वेदेवं ततः कुर्याद्बलिकर्म तथैव चेति । तथा । कुर्वीत देवतापूजां जपयज्ञादनंतरमिति ब्रह्मयज्ञानंतरकालस्याप्युपादानात् । यदा
प्रातरेव ब्रह्मयज्ञो होमानंतरं करोति तदा पूर्वाह्ण एव । अथ तर्पणात्पूर्वकाले करोति तदा तर्पणानंतरमेव जलदेवतानमस्कारानंतरं गत्वा विष्णुपूजायां नरसिंहपुराणे विधानात् । पूज्यदेवतानियमेद नरसिंहे । ब्र
ह्माणं विष्णुमीशं वा सूर्यमग्निं गणाधिपं । दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत् । पद्मपुराणे । आदित्यं गणनाथं च देवीं रुद्रं यथाक्रमं । नारायणं विशुद्धाख्यं अंते च कुलदेवतां । याज्ञवल्क्यः । देवानामर्चनं कु
र्याद्ब्रह्मादीनाममत्सरः । विष्णुब्रह्मशरुद्रश्च विष्णुर्देवो दिवाकरः । तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात् । दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा । अर्चितं स्याज्जगदिदं तेन सर्वं चराचरं । अप्स्वग्नौ हृदये
सूर्ये स्थंडिले प्रतिमासु च । षट्स्थानेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं । अनुष्टुभस्य सूक्तस्य त्रिष्टुबंतस्य देवता । पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः । प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे । तृतीयां वा
मपादे च चतुर्थीं दक्षिणे न्यसेत् । पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत् । सप्तमीं वामकुक्षौ तु अष्टमीं दक्षिणे न्यसेत् । नवमीं नाभिमध्ये तु दशमीं हृदये तथा । एकादशीं कंठदेशे वामबाहौ ततः परां । त्रयोदशीं
दक्षिणे तु मुखदेशे चतुर्दशीं । अक्ष्णोः पंचदशीं विद्यात् षोडशीं मूर्ध्नि विन्यसेत् । एवं न्यासविधिं कृत्वा पश्चाद्योगं समारभेत् । आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमं । द्वितीयया आसनं दद्यात्पाद्यं चैव तृतीयया । अर्घ्य
श्चतुर्थ्या दातव्यः पंचम्याचमनीयकं । षष्ठ्या स्नानं प्रदातव्यं सप्तम्या वस्त्रमेव च । यज्ञोपवीतमष्टम्या नवम्या त्वनुलेपनं । पुष्पं दशम्या दातव्यं एकादश्या तु धूपकं । द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदनं ।

३४

वघर्दशपानमस्कारं पंचदशपाप्रदक्षिणां। अर्दयेच्चाच्युतं देवेशं षोडशपाद्यविसर्जयेत्। ज्ञानेनेवस्त्रे च ते विघ्ने दद्यादावमनीयकं॥ इति। एवमितरेषामपि ब्रह्मादीनां पूजनं कार्यं तत्तन्मंत्रकः शाकेविद्वेद्व केमैत्रेलदद्य
क्तोत तन्नामधेयमंत्रैर्नामांतं पूजयेत्। अथवा वेदाविरुद्धास्वदीक्षोक्तसारेण देवतार्चनं कुर्यात्॥ इति देवार्चनं॥ ॥ अथ पूजोपयुक्तपुष्पाणि। तत्र नरसिंहपुराणे। पुष्पैरवन्यैः संस्पृष्टैः पुष्पैर्वा गिरिसंभवैः। अपर्यु
षितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः। आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं। हरिरेव तु पलाशानां शमीपुष्पं बिल्वपुष्पपंचकं तगरं तथा। करवीरं तथा श्वेतपालाशं कं रक्तपुष्पकं। नवमालाप्यशोकं च सेवंतीकुसुमा
लती त्रिसंध्यं च तथा श्वेतं कंदं चपानपात्रकं। मल्लिका वेवजातीव सर्वपुष्पाद्विशिष्यते। जातीपुष्पसहस्रेण यत्फलं मास्ते मुनीन। विष्णवे विधिवद्भक्त्या तस्य पुष्पस्य फलं स्तृणु। कल्पकोटिसहस्राणि कल्पकोटिशतानि
च। वसेद्विष्णुपुरे श्रीमान्विष्णुतुल्यपराक्रमः। पत्राण्यपि। अपामार्गस्तिंगराजं शमीपत्रं च खादिरं। दूर्वाकुशपत्रं च दमनं मरुकं तथा। तत्र श्रेष्ठं बिल्वपत्रं ततस्तु तुलसी वरा। एतेषां च यथालाभं पत्रैरभ्यर्चयेद्धरिं।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते। एषामुत्तरोत्तरं पुष्पाणि प्रशस्तान्यर्चने हरेः। पद्मवान्यपि तत्रोक्तं ... शाखाश्च ... विकृतान्नाम तावेन वर्हिषा वार्चयेद्धरिं। अपराधसहस्राणि अपराधशतानि च। पद्मनेकेन
देवेशः क्षमते हरिः --- पद्मनेकेन देवेशमभ्यर्च्य कमलापतिं। वर्षायुतसहस्रस्य पापस्य कुरुते क्षयं। अगस्त्यपुष्पसंपूर्णं कुसुमैरसितैः सितैः। पर्चयंति च देवेशं ते प्राप्नुवन्ति परमं पदं। सुवर्णकेतकीपत्रं यो ददाति
जनार्दने। कोटिजन्मार्जितं पापं दहति गरुडध्वजः। सहस्रकं दत्त पुष्पेण हल्याहरिरर्चितः। सप्तजन्मानि दिवर्षेत तस्य लक्ष्मीर्न दुर्गा। कांती तु पुष्पं तु देवर्षेयः प्रयछति किन्नवे। सुवर्णपलमात्रं तु पुष्पे पुष्पे तवेस्तुते। न
रदपुराणे। धात्रीफलेन यत्पुण्यं जयंत्या समुपोषणे। खरवेडयक्षेत्तेन मर्त्यस्तु लसीपूजनेन तत्। यथा कथं विदाहन्यकुसुमैः पूजयेद्धरिं। नाकपृष्टमवाप्नोति नात्र कार्या विचारणा। स्कंदपुराणे। विष्णुर्मभ्यस्थितं
ष्पाशिरसा ध्यायवहेन्नरः। अपर्युषितपापस्याद्यावत्पुगवतुष्टयं [illegible] पत्राणि देयानि स्वसुरार्चने पत्रात्तवपयोदियं तन --- मश्नुते। वनपानि [illegible] गंधीनि कुसुमा
निनदापयेत्। अन्यायतनजातानि कंटकीनि तथैव च। रक्तान्यकालजातानि [illegible] ज्ञानमातपुष्पाणि दानं देवे विवर्जयेत्। [illegible] पुष्पाणि तथा धत्तूरकस्य च। [illegible] कुसुमं च
कनिवदेयं जनार्दने। ककरः करीरः। शाल्मलं च शिरीषं च [illegible] गिरिमल्लिका। सर्जकं चैव [illegible] वर्जयेत्। अथ गिरिवर्ज्यानि प्रसाददीपिकायां जपा बंधूकसिंदूरं तथा चैसंधिकीद्युत दमं तिकेतकीस्य
थीमालतीकुटजानि च। धुस्तूरांवा [illegible] प्रमादेनापि नार्पयेत्। अरण्यान्यपि गंधीनि सकीटं वोग्रगंधिय तू। अशुद्धपात्रपात्रस्थं गवासोत्तितं कुत्सितानि। अनीतं नार्पयेद्भक्तो प्रमादादपि नाशनं तु [illegible] पुराणे।
शोवेविवर्जयेत्कुंदं चन्ममन्नं च हरेः सदा। देवीनां चार्कमंदारो आदित्ये तगरं तथा। विष्णुरहस्ये। नस्तुधेः पूजयेद्विष्णुं कुसुमेनर्मदीगतैः। न विशीर्णैर्दलैः शुष्कैर्न चैवाशुभविकाशितैः। आशुविकासितैर्वलाद्विकासितैः। तथा
जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च। तुलस्यगस्त्यबिल्वानि गांगं वारि न दुष्यति। स्नानं कृत्वा च यः कश्चित्पुष्पं चिनोति वै द्विजः। देवतास्तन्न गृह्णंति तस्मात्तवतिदा रुवतु [illegible] मध्यंदिनस्नानानंतरं विहितं ॥ ॥
अथ नित्यश्राद्धपंचमहायज्ञानां स्वरूपाणि॥ ॥ तत्र यमः॥ ॥ पंचसूना गृहस्थस्य वर्तंते हरहः सदा। कंडणी पेषणी चुल्ली जलकुंभस्तु पस्करः। एतानि वाहयत विप्रो बध्यते वै मुहुर्मुहुः। एतासां पावनार्थाय पंचयज्ञाः प्रकी
र्तिताः। कुन्यहिंसास्थानं कंडन्युलूखलादि। पेषणी दृषदादि। चुल्ली पाकस्थानं। जलकुंभ उपाक्षानं स्पादि। बध्यते पापेन युज्यते इत्यर्थः। नवकं उन्यादिनिमित्त प्रवणान्नैमित्तिकत्वं पंचमहायज्ञानां। पंचयज्ञविधमंत्र
गृही नित्यं न हापयेदिति शंखेन नित्यत्वाभिधानात्। ते च यज्ञाः के इत्याकांक्षायां मनुः। ब्रह्मयज्ञो देवयज्ञः पितृयज्ञस्तथैव च। नृतयज्ञो नृयज्ञश्च पंचयज्ञाः प्रकीर्तिताः। एतत्स्वरूपमाह मनुः। अध्यापनं ब्रह्मयज्ञः पितृयज्ञ
स्तु तर्पणं। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं। अध्यापनमध्ययनं तर्पणं पितृतर्पणं। पितृश्राद्धमित्यावत्तायुतः स एवाह। स्वाध्यायेनार्चयेत्तर्षीन्होमैर्देवान्यथाविधि। पितृन्श्राद्धेन नृनन्नैर्भूतानि बलिकर्मणा इति।
विस्य तत्र विकल्पमाह कात्यायनः। श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वेति। नित्यश्राद्धं वा पितृयज्ञः। [illegible] वलि श्वदेविकं बलिकर्म चाह। अथवा हृद्य गतिषो [illegible] अनंतरसाहस्त्य
हिरवंडाकृतं [illegible] हाति। एमाविश्वेदेवाः संतिष्ठंते। धर्मयिस्वाहेत्यादिनमोरुद्रायपशुपतये स्वाहेत्यादिर्त्ति बलिहरणं बलवान्हरेयेन संतिष्ठंते। दावत्स्य स्वाहेत्यात्मजं हेत्य्यष्टदेवयज्ञाः संतिष्ठंते। पितृभ्यो दिरपिक ब्राह्म

मदनरत्न

णं तो जयेद पि वा दक्षिणाग्निं दक्षिणाग्रान्दर्भान्संस्तीर्य तेषु पिंडं ददातीति पितृभ्यः स्वधास्त्विति अपि वा अप्सु त्यजेत् पितृयज्ञः संतिष्ठते । उत्तरापामाग्नेयं वेदिदेशे प्रागग्रान्दर्भान्संस्तीर्य गंधपुष्पधूपदीपैरलंकृत्य बलिमपहरति ।
तत्त्येन नम इति स्मातस्यः न हुतयज्ञः संतिष्ठते । मनुष्ययज्ञार्थमतिथिं भोजयेदपि वा हंतकारं ब्राह्मणेभ्यो ददाति । मनुष्येभ्यो हंत तेति । हंतकारं पयस्विनं दानासमर्थस्य ... इति । भिक्षां वा पुष्कलं वापि हंतकारमथा
पिवेति पुष्कलमग्रं इति पर्यायो । भिक्षादिलक्षणं च मनुना लिखितं । ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं । अग्रं चतुर्गुणीकृत्य हंतकारो विधीयत इति । आपस्तंबपरिशिष्टे पितृविश्वदेवबलिहरणानंतरं मनुष्यदद्या
देवयज्ञार्थं हुतान्नादेवेभ्यः स्वाहेत्येकामाहुतिमग्नौ जुहुयात् पितृयज्ञार्थमपि विश्वदेवबलिहरणशिष्टादन्नात् प्राचीनावीती दक्षिणतो नमः पितृतीर्थेन पितृभ्यः स्वधास्त्विति बलिं हरेत् भूतयज्ञार्थं विश्वदेवशिष्टा
न्नादेवोन्नरतो ग्नेर्देवतीर्थे बलिमुपहरेद् भूतेभ्यो नमः इति मनुष्ययज्ञार्थमतिथिं भोजयेदिति यत्तावे संकल्पितं तद्धुरिति । एवं विश्वान्यत्रापि विरुद्धवचनानि स्थितिगोचरस्तथा समलिखितानि तत्र सर्व
त्र यथासंख्यं व्यवस्था ॥ इति यज्ञस्वरूपनिर्णयः ॥ ॥अथ नित्यश्राद्धं ॥ मनुना दद्यादहरहः श्राद्धमिति विधाय विश्वदेवस्य सिद्धस्य गृह्येग्नौ विधिकर्मित्यादिना पश्चाद्वैश्वदेव इति क्रमः ॥ यापांतु नित्यश्राद्धमेव पंच
यज्ञांतःपातितत्वं स्वशाखानुसारेण क्रमः । श्राद्धविषये मार्कंडेयपुराणे । कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा । पितृनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव चेति । अत्र विशेषमाह प्रचेताः । नामंत्रणं न होमश्च नावाहनवि
सर्जने । न पिंडदानं न सुरा नित्ये कुर्याद्द्विजोत्तमः । व्यासः । नंद्यासंपूज्याङ्कुसुमादिभिः । निर्दिश्य पितृ भोजयित्वा तु द्विजं विद्वान्विसर्जयेत् नूनमुरान्नं विश्वेदेवान् । किंचिद्दत्वेति दक्षिणार्थं । व्यासः । न वाहनं न स्वधाकारः
पिंडाग्नौकरणादिकं । ब्रह्मचर्यादिनियमो विश्वेदेवास्तथैव चेति । तथा तन्तुष्पाज्यं दक्षिणा पिंडवर्जितम् । मत्स्यपुराणे । यद्येकं भोजयेद्विप्रं त्रीनुद्दिश्य पितृंस्तथेति । त्रीनिति मातामहादीनामपि प्रदर्शनार्थं । अ
न्नका यायनोनुकल्पमाह । एकमप्याशयेद्विप्रं पितृयज्ञार्थसिद्धये । आदैवं नास्ति चेदन्यो भोक्ता ... ज्यमथापि वा । अशक्तौ तु यथाशक्ति किंचिद्दन्नं यथाविधि । पितृभ्य इदमित्युक्त्वा स्वधाकारमुदाहरे
तू एन्दुहुतान्नं ब्राह्मणायैव दद्यात् । तदा सावेगास्य । तथा च कूर्मपुराणे । उद्धृत्य वा यथाश क्ति किंचिदन्नं समस्य सिहितं । वेदवेदार्थविदुषे द्विजायैवोपपादयेत् । तथा सर्वेषामप्यला
भे उद्धृतं गास्यो निवेदयेदिति । यदा गवामप्यलाभस्तदा विमृश्य ... वेगात्योद्द्याद भ्यो वा प्रक्षिपेदिति । मनुष्ययज्ञेप्येवमेव प्रतिपत्तिकर्म । अत्राप्यशक्तस्य मनुः । दद्यादहरहः
श्राद्धं अन्नाद्येनोदकेन वा । अन्नाद्येनोदकेन श्राद्धार्थं सिद्धेनोदकेन । पयोमूलफलैर्वापि पितृभ्यः प्रीतिमाहरन्निति । पयःक्षीरं । एतच्च नित्यश्राद्धं श्राद्धांतरदिने अनियतं । तथा च मार्कंडेयः । नि
त्यक्रिया पितृणां तु केचिदिच्छंति मानवाः । न पितृणां तथैवान्ये शेषं पूर्ववदाचरेदिति । नित्यक्रिया नित्यश्राद्धं शेषं विश्वेदेवादिकं । अत्र व्यवस्था यत्र श्राद्धदेवतास्तत्र कर्तव्यमिति । तथा च मलकारखंडे नि
त्यश्राद्धं नकवीत प्रसंगाद्यत्र सिध्यति । श्राद्धांतरे कृतेन्यत्र नित्यत्वान्नैव लापयेत् । इति नित्यश्राद्धविधिः ॥ ॥अथ विश्वदेवविधिः ॥ ॥तत्र प्रथममेव कर्म आपस्तंबः । तेषां मंत्राणामुपयोगे द्वादशाहमुभयोरधः
शय्या ब्रह्मचर्यं क्षारलवणवर्जनं चोत्तमस्यैकरात्रमुपवास इति । तेषां विश्वदेवमुपकल्प्यार्थमेतेषां मंत्राणामुपयोगः प्रथमोपक्रमः । उत्तमस्य एतेषां प्रवर्तीनस्य मंत्रस्य उपयोगे एकरात्रमुपवासः । ततो वै
श्वदेवश्च । तथा । सिद्धेन्ने तिष्ठ हूतमिति स्वामिनं प्रब्रूयात् । तद्भूतं विराडन्नं तस्मान्नाश्नीयादिति प्रतिवचनमिति । ततो विश्वदेवादिकं कर्म कुर्यात् । यच्च सायंप्रातः । तथा च कात्यायनः । सायंप्रातर्वैश्वदेवः कर्तव्यो ब
लिकर्म च । अनश्नतापि सततमन्यथा किल्बिषी भवेत् । इति । एतेन पुरुषार्थत्वमुक्तं भवति विश्वदेवस्य । अतएव विश्वदेवपरिशिष्टे प्रवासस्थितस्यापि वचनं यः कर्तव्यता दर्शिता प्रवासेद्धाहिताग्नेः स्वक
दाचित्कालपर्ययात् । यस्मिन्नन्नो न वैश्यको विश्वदेवभुतस्त्वं वै मनुरपि पुरुषार्थमेवाह । विश्वदेवे तु निर्वृत्ते यद्यन्योतिथिराव्रजेत् । तस्मा अन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् । विश्वदेवानंतरमतिथि
व्रजार्थायां स्नातायां चेति । तिथिर्यदि आगच्छति अन्नं च पक्वं नास्ति तदा पाकं पुनः कृत्वा पाकं कृत्वा तस्मै दद्यान्न बलिं हरेत् । विश्वदेवं अर्थात् ... संस्कारार्थत्वं वैश्वदेवस्य तदा पुनः । करणनिषेधेन सुज्ज्वल
इत्यश्वीति तात्पर्यं । कचनान्नं संस्कारकर्तव्यं पुरुषार्थत्वं चेन्यु तस्यात्मकत्वमिच्छंति । अस्मिन्पक्षे तत्र यात्मकस्यास्य अश्मयीति संज्ञा । पात्यं च ... विमयात् ... संस्कारकारी पीच कर्माणि स्विष्टकृदुत्तमप्रयाजादी

× नीयोर

नित्यान्यग्निसंज्ञकानीति व्यवहरंतिमीमांसकाः॥ एतच्च लौकिके वैवाहिके वाग्न्यादिषु कुर्वीत। तथा च याज्ञवल्क्यः। स्मार्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु॥ शातातपः।
लौकिके वैदिके वापि हुतोत्सृष्टे जले क्षितौ वेति। आहृत्यो मृत्यज्ञं कुर्याल्लौकिकाग्नौ। पात्रान्तरकरणमाहरणं। मातामहाग्नौ तु अभ्युक्षणमाहरणं। उन्मार्जनं तस्यापकारणं मनुः। वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथावि
धि। पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही। अत्र विशेषस्तु विज्ञातिमतात्। तस्मिंस्तु निर्विशेषं समुद्धृत्य कुर्यादग्नौ॥ रामा महानसेऽग्नौ तत्र पाकं समाचरेत्। तस्मिन्नेव मेव वैश्वदेवं महानसे इत्यर्थः॥ यस्मिन्नग्नौ पाकस्त
त्रैव होमः। तथा च कूर्मपुराणे। यदि स्याल्लौकिके पाकस्ततोऽन्नं तत्र हूयते। शालायत्र वैदेऽन्ने विधिरेष सनातन इति। एतदनुसारेणान्यान्यपि वचनानि व्यवस्थापनीयानि॥ स होमः कथमित्याकांक्षायां शौनकः। अ
ग्नये सायं प्रातः सिद्धस्य हविष्यस्य जुहुयात् दग्निः सान्वदेवतास्यः सोमाय वनस्पतये अग्नीषोमाभ्यामिन्द्रप्रजापतयः। आपस्तंबः। अपासनेऽपचने वा सिद्धेऽन्ने इति होमं हस्तेन जुहुयादुत्तरयतः परिषेचनं यथा पुरस्तादिति
आद्ये। अन्यस्याहुत्यादिति। स्विष्टकृदंते। उत्तरयतः परिषेचनं। कर्मादावंते वा कात्यायनः। वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात् ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये इति गौतमः। अन्नाव
निर्धन्वंतरिर्विश्वेदेवाः प्रजापतिः स्विष्टकृदिति होमस्य तिरस्य वस्त्रामाह श्लोककात्यायनः। अहुत्यहविषासिद्धस्य हविषा घृतादिना स्वशाखविधिना कुर्यात्। नष्टे षेण बलिं हरेदिति। हविषेण घृतादिना। अहुतहवि
राश्रिद्धेनेह विषा जुहुयादित्यर्थः। इतानावेदधर्मयुक्तं हविर्जुहुयात्। तथा च व्यासः। जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितं। दध्यक्तं हविषाभ्यक्तं तदसावेत्स सापिवति। हविष्यान्नाभावे तु विज्ञातिमते।
विज्ञापोदर्शितः। आलाभेयेन केनापि फलशाकोदकादिनेति। पयो दधि घृतं जुहुयाद्वैश्वदेवं सवेणु। हस्तेनान्नादिति जुहुयाद्दिजः इत्यंजलिना जलमिति। अन्नापरो विशेषः। परिशिष्टे श्रौतकं वायद्विपन्ने
फलं वाय द्विवा फलं संकल्पयेद्दा हारे तनगौ जुहुयाद पीति। पयः सक्तिरसद्व्याणां होमं स्रुवेणाश्नविष्णादिकानन्नद्रव्याणां तु विशेषमास्ति हित। परिशिष्टे तत्रान्नेन तु हस्तेन अंगुष्ठाग्रे
सापीडितं। संहतांगुलिपाणिः स्रुवाग्य तान् जुहुयाद्विरिति। हविषे अपि स्रुवमध्यमादत्का यनः। हविषे तु यन् मुखास्तदनुबीहयः स्मृताः। माषकोद्रवगौरादीन्सर्वालाभे तु पिव
पीतु लिरागोरसर्षपाः। आपस्तंबः। नक्षारलवणा होमो विद्यते तथा परान्नसंसृष्टस्य होमस्तु दीनं मुख्यं तस्मात् पोह्यास्मिन्होतव्यं न स्मैस्मेति अंगारमिश्रितं तस्मै इत्यर्थः। अतएव बौधायन
अंगारात्तस्मान्मिश्रं च जुहुयादोरतां। न लाभं जुहुयाद्वैश्वदेवं च यदिक्षारादिमिश्रितमिति। तथा परोक्षम नंतसंस्कृतमथवा वधिस्यात्। क्षिः सर्वेत देवपवित्रमित्याचरतत इति। अधिश्रयणं तु नरस्य
स्य पक्वान्नमात्रमन्त्रसहितस्य वैश्वदेवपात्रस्य अधिश्रयसंस्कृतं इयापीति दियत्वयः। एतत्सायंप्रातः कर्तव्यं इत्युक्तं। तत्र प्रातरुपक्रमः सायमपवर्गः। अथ सायं समंत्रकं कर्म कर्तव्यमेतावदा
पत्नीसायममंत्रकं बलिं हरेत्। तथा च मनुः। सायं त्वन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत्। वैश्वदेवं हि नामैतत्सायंप्रातर्विधीयत इति। अत्र वैश्वदेवं हि नामैतदित्येतत्सर्वं तमेकं वाक्यं। सायंप्रातर्विधीयत
इत्येतदपरं वैश्वदेवस्य कालद्वयेपि कर्तव्यता विधायकं। अतः सायमेव पत्न्याहरणरूपं वैश्वदेवकर्माधिकारः। कश्चन बलिग्रहणं वैश्वदेवस्याप्युपलक्षणार्थं इति वर्णयंति। एवं च तद्वैश्वदेवस्य बहि
रिमाद्दमनुः। श्वनां च पतितानां च श्वपचां पापरोगिणां। वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि। अथ मनुः। यस्तु हित्वा बलिमादमनुष्ठे तान् प्रवर्तते दिवा नक्तं बलिमिच्छंतावितुं तदस्य प्रेष्या। तस्याबलिकर्म तु
हरामिमयिपुष्टिं पुष्टिको दधातिर्दधात्विति। अत्र दिवेति दिने रक्तमिति रात्रौ। दिवाचारिभ्य इति दिवा नक्तंचारिभ्य इति नक्तमित्याश्वलायनस्मरणात्। एतच्च वैश्वदेवाख्यं कर्म दिवाह्निस्तथा रात्रावपि द्विर्निकर्त
व्यं। धर्मविन्नाचरेत्स्नानं आह्निकं च पुनः। शान्तर्पणं ब्रह्मयज्ञं च वैश्वदेवं च नाचरेदिति विष्णुपुराणोक्तिः। धनात् वैश्वदेव बलिहृता सायंप्रातः पंचयज्ञानुदिवैवासनयाहरन्मदग्निः। वैश्वदेवं तथा रात्रौ जुहुयाद्विलिकं तत
स्यामहतः। पंचयज्ञांस्तु दिविवच्यादधर्मवितृप्तिरति। तेषां तु रात्रिकं विनान्नहयज्ञव्यतिरिक्तानां महायज्ञानां वैश्वदेवे बलिहृतोवाऽतत्तद्विः। तेषां दिवैव वैश्वदेवाख्यं कर्म न रात्रौ। यदि त्वच्छारवायां कालद्वयेपि विध
नं नाम्नि। अथ स्मितदाद्विरपि सवतीति निर्णयः। द्विविधं हि वैश्वदेवादिकर्म। एवं मत्वादिस्मृत्युक्तं साधारणमपरं स्वस्वगृह्योक्तमिति। तत्र साधारणाचरणात्स्वाविरुद्धं सर्वैरपि कार्यं कर्मणः सर्वशाखाधिकरणान्य

मदनपा०

३८

यत्निकत्वात्। अत्राचान्तेश्वेतस्य गृह्योक्तमेव। नावता पित्राद्यर्थस्य निःपन्नत्वात्। एतच्च संसृष्टिनां मध्ये। ज्येष्ठ एव कुर्यात्। तदशक्तावादिना न दद्यात् रस्यापि कर्तृत्वमस्ति। अनग्निकस्य विशेषमाह। अ
नग्निकस्तु यो विप्रः सोन्नं व्याहृतिभिः स्वयं। हुत्वा शाकलमंत्रैश्च शिष्टान्न तद्बलिं हरेत्। अनग्निकः श्रौतस्मार्ताग्निरहितः। यदा विश्वेदेवात्पूर्वं भिक्षुरागच्छति तदा विश्वेदेवार्थमन्नमुद्धृत्य तिष्ठेदिति तद्दद्यात्। तथा
व्यासः। अन्नं ते विश्वेदेवेभ्यस्तिष्ठेत गृहमागतः। उद्धृत्य विश्वेदेवार्थं तं दत्वा विसर्जयेत्। भिक्षुकाश्च पितने वदर्शिनाः। ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः। अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः इति
इति विश्वेदेवविधिः॥॥ अथ विश्वेदेवपाकनिर्णयः॥ तत्र नित्यश्राद्धस्य विश्वेदेवस्य चैक एव पाकः। नित्यश्राद्धे श्राद्धनियमविशेषाभावात्। नवश्राद्धे एकपाकेनैकैव नाशि। आशौचमध्ये विश्वेदेवनिषेधात्। ए
कादशाहादिश्राद्धे तु पृथक्पाकः। श्राद्धशिष्टान्नस्य ब्राह्मणेभ्यो देयत्वात्। तथा च देवलः। एकोद्दिष्टं तु शेषं तु ब्राह्मणेभ्यः समुत्सृजेदिति। दर्शश्राद्धे प्रचेताः। अतस्तन्निर्णयानेव तद्विकृतीनामपि निर्णय इति
चेतो विचार्यते। किं श्राद्धार्थं विश्वेदेवार्थमेक एव पाकः। उत पृथगिति। तत्र पृथगिति ब्रूमः। तथा च लौगाक्षिः। पित्रर्थं निर्वपेत्पाकं विश्वेदेवार्थमेव च इति। इत्युक्तिः पाकस्य पृथक्त्वे एकत्वे चैकरूपेति विशेषापरि
ज्ञानादतिप्रायं विहाणेति स एवान्तराधेन विश्वेदेवं न पित्र्यर्थेन दार्शं विश्वदेविकमिति। इतरदितरार्थेन सवतीति पृष्टाक्या कर्तव्य इत्यर्थः। नदाशमिश्रच दर्शाद्येन तद्विकृतयानि नित्यनैमित्तिककाम्यश्राद्धा
नि लक्ष्यात। विश्वेदेविकमित्यत्र विश्वेदेवशब्देन तत्र यज्ञादयः। अयं च पृथक्पाको विश्वेदेवस्य श्राद्धात्पूर्वं मध्ये वा विश्वेदेवानुष्ठाने न तत्रानुष्ठाने। वपाचापि वीनमि। पित्र्यपाकात्समुद्धृत्य विश्वेदेवं करोति यः। आसुरं त
द्भवेच्छ्राद्धं पितॄणां नोपतिष्ठत इति। न चैतद्वचनमुत्तरकाले विनिषिद्धं। तदापि तस्य पित्र्यपाकत्वात्। मैवं। उत्तरकाले पितृसंबंधस्य निवृत्तत्वात्। यदुद्देशेन कल्पितं यच्च विसृज्य तदुद्देशेन त्यागेनात तदुपभोगसम
नंतरमेवान्नसंबंधनिवृत्तेर्न्याय्यत्वात्। एवमेव वशिष्ठाचाराद्धि श्यते। अनेनाभिप्रायेण पिवीन सिरेवाहा। श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः। कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथेति। अत्र प्रथमतः श्राद्धा
हे तु परः। द्वितीयस्तु श्राद्धावशिष्टान्नपरः। एवं चायमर्थः संपद्यते। पित्र्यपाकात्समुद्धृत्य वैश्वदेवं करोति यः। आसुरं तद्भवेच्छ्राद्धं इति यत् श्राद्धात्पूर्वं मध्ये वा निषेधः। ततस्तस्माद्धेतोः श्राद्धं निर्वर्त्य तत्तच्छिष्ट
श्राद्वैश्वदेवादिकं कर्तव्यमिति। अत्र वचनस्थादिशब्देन नित्यश्राद्धमपि गृह्यते। तेन यच्छाखायां नित्यश्राद्धस्य पंचयज्ञांतःपातित्वं नाविलछारनीयानां श्राद्धपाकशेषेण पृथक्पाकेन वा नित्यश्राद्धं विश्वेदेवात्पू
र्वमेव। आवाहनं च नापि मार्कंडेयः। तानि नित्यक्रियां कुर्यादिति। ततः श्राद्धशेषात् नित्यक्रिया नित्यश्राद्धादि तथा। पृथक्पाकेन नित्यं स्यादिति। यद्ब्राह्मणविसर्जनांतं विश्वेदेवप्रदानं क्लेशेन इतरत्र पृथगिति निर्णयः।
॥ इति विश्वेदेवपाकनिर्णयः॥॥ अथ विश्वेदेवकालनिर्णयः। तत्र साग्निः श्राद्धात्पूर्वमेव वैश्वदेवं कुर्वीत। तदाह लौगाक्षिः। पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः इति। पक्षांतमन्वाध
नं। अन्वाहार्यकं दर्शश्राद्धं। ननु वैश्वदेवस्य पक्षांतपिंडपितृयज्ञमध्ये विधिबलादेव साग्निककर्तृकत्वावगमात्। पुनः साग्निकशब्दोपादानमपार्थकमिति चेन्न। अत्राधानं पितृयज्ञ कक्षसेरु उपासनाग्नेर्निवृत्त्यर्थत्वेन सा
र्थकत्वात्। दर्शे च निरग्निर्वैश्वदेवानंतरमेव पिंडपितृयज्ञादि कर्तव्यतामाह। आचतेष्वैश्वदेवस्थालीपाकप्रकीर्तितः। अन्यत्र पिंडयज्ञात्तु सोपराह्णे विधीयत इति। स्थालीपाकशब्देन स्थालीपाककर्मण्युच्यन्ते। एतानि पदादि
निकर्माणि विश्वेदेवात्पूर्वमेव कर्तव्यानि। पिंडपितृयज्ञस्यापि स्थालीपाकसाधर्म्येन तस्यापि पूर्वं च कर्तव्यतायां प्राप्तायां अपवादः। अन्यत्र पिंडपितृयज्ञादन्यत्रेत्यर्थः। दर्शश्राद्धस्य पिंडपितृयज्ञानंतर्यमाह। मंडः।
पिंडयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्निकः। पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकं इति। एवं च यानि निरग्नेः पूर्वं विश्वेदेवकर्तव्यतापादकानि वचनानि तानि सर्वाणि। लौगाक्षिवचनानुसारेण श्रौताग्निमद्विषयाण्येव व्यवस्थ
पनीयानि। साग्निकस्याप्येकादशाहश्राद्धे पश्चाद्देवं। संज्ञप्रपार्वणे श्राद्धे एकोद्दिष्टे तथैव च। अग्रतो विश्वदेवं स्यात्पश्चादेकादशेहनीति। परिशिष्टे विशेषविधानात्। तथा शाकटायनोपि। श्राद्धभागेव कुर्वीत विश्वेदेवं तु साग्नि
कः। एकादशाहिकं मुक्त्वा तत्र ह्यंते विधीयते इति। एवं वैदिकाग्नेः श्राद्धात्प्रागेव नियमात्। उपासनाग्नेर्न सर्वार्थत्वात्। निरग्नेस्तु विकिरांतब्राह्मणविसर्जनांते वैश्वदेव विधायकानि तान्युपासनाग्निवि
षये अनग्निविषये वच्यति तिष्ठंत। यानि च श्राद्धादौ निषेधकानि तान्यपि तद्विषयाण्येव। अथवा साग्नेरपि श्राद्धपाकविषये। अत एव तस्य पृथक्पाको विश्वेदेवार्थो निषेधश्च षड्भिः अन्ने प्रतिवासरिको होमः श्राद्धोदेनि

× पिंड०

श्रूपे

यताय दिदिवास्वधेन गृह्णंति कव्यानि पितरस्तथेति । इत्युगौतमोपि । पितृश्राद्धमध्ये तत्रापि वैश्वदेवं करोति यः । अनंतं तत्र वैश्वदेवं पितॄणां नाप्रतिष्ठते तन्निषेधः । वैश्वदेवमतश्चैव श्राद्धं कुर्यादनग्निकः । लौकिकेनैव तेनेह
पितॄणां नोपतिष्ठते । अनग्निको विदिकाग्निरहितः पितृसौपासनाग्नावपि विश्वदेवनिषेधः । अयमर्थो लौगाक्षिवचने साग्निकपदस्य सार्थक्यप्रतिपादनेन दर्शितः । अत एवात्र लौकिकाग्निरिति स्मार्ताग्निरस्तु केचपल
तर्णाद्युपासनाग्नेरनग्निकस्य वा त्रयः कालाः वैश्वदेवे । एकः श्राद्धमध्ये । अपरो विकिरात् । अन्यो ब्राह्मणविसर्जनात् । तान् [illegible] मध्यकर्तव्यता ब्रह्माण्डपुराणे । वैश्वदेवाहुतीरग्नौ ब्राह्मणभोजनात्तु जुहुयाद् ब्राह्मणस्तत्तयज्ञादि
श्राद्धं त्वाउत स्मृतमिति । ब्राह्मणभोजनादर्वाक् अग्नौकरणानंतरमित्यर्थः । अनंतरतयज्ञादेः श्राद्धानंतरकर्तव्यताभिधानात् । अस्मिन्प्रयोगे यानि स्मृतयज्ञोत्तरसावीनि कर्माणि संबध्यमाणानि तानि तदा शुकर्षन्याये
नोत्कृष्टानि श्राद्धोत्तकर्तव्यानि । न तु तत्तयज्ञात्पूर्वं तावन्त्यनु — ष्ठेयानि । यद्वा त्वायां बलिहरणादिकमेव तत्तयज्ञादिकं तेषां बलिहरणादिकस्यैवाकर्षः । येषां तु बलिहरणादिव्यतिरिक्तास्तत्तयज्ञास्तेषां बहिर्बलिव्यति
रिक्तस्तत्तयज्ञावधिकानां बलिहरणादीनामपि श्राद्धमध्ये कर्तव्यतास्तनाति विवेकः । नैवं संतव्यं । प्रारब्धे पित्र्ये कर्मण्यसमाप्ते तन्मध्ये कर्मांतरकरणमयुक्तमिति निरीक्षितन्यायेन विरोधस्तु । अत एव बह्वृचपरिशिष्टेषु
निमंत्रितेषु ब्राह्मणेषु श्राद्धपरिसमाप्तावेव सायंप्रातर्होमकरणं । द्वितीयः कालो विष्णुपुराणे । पितृसंतर्प्य विधिवद्बलिं दत्वा विधानतः । विश्वदेवं ततः कुर्यात् श्राद्धब्राह्मणभोजने । इतरभोजने । तृतीयः कालो ब्राह्मणवि
सर्जनांते स च मत्स्यपुराणे दर्शितः । उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः । विश्वदेवं ततः कुर्यान्निर्दिष्टे पितृकर्मणि । मनुरपि । पूर्वार्धितदेवानां गृहबलिं कुर्यादिति धर्मो व्यवस्थित इति । बलिशब्दो विश्वदेवप्रदानार्थः
तिमंतामध्यातिथ्ये । न विष्णुपुराणे । तथा श्राद्धं महाबाहो ब्राह्मणांश्च विसर्जयेत् । विश्वदेवादिकं कर्म ततः कुर्यान्नराधिप इति ॥ ॥ इति वैश्वदेवकालनिर्णयः ॥ ॥ अथातिथिपूजा ॥ ॥ तत्र विष्णुपुराणे । ततो गोदोहमात्रं वै कालं तिष्ठेद्गृहांगणे । अतिथिग्रहणार्थाय तदूर्ध्वं वा यथेच्छया । व्याघ्रपादः । अर्चितमनाहूतं विश्वदेवेस्य च [illegible] प्रयत्नेन तु संस्थितं अतिथिं तं विजानीयान्नैकग्रामनिवासिनं । [illegible] स्वर्ग
ज्ञः सोतिथिः स्वर्गसंक्रमः । इष्टो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा । संप्राप्तो वैश्वदेवांते सोतिथिः स्वर्गसंक्रमः । गवां ग्रासं च कुर्वीत नित्यमेव समाहितः । दिनेतिथौ त्वविमुखे गते यत्पातकं स वै तु । तदेवाष्टगुणं प्रोक्तं सूर्योढे विमुखे गते । [illegible]
यायो गृहात्प्रतिनिवर्तते । स तस्य दुष्कृतं दत्वा पुण्यमादाय गच्छति । याज्ञवल्क्यः । अस्नाता शी मलं भुंक्ते अजपी पूयशोणितं । अजापि च यत्तमा भुंक्ते अदत्वा विषभोजनं । आत्मार्थं पचनं यस्य स तु अर्थस्य मैथुनं । [illegible] निःफलं तस्य जीवितं
गवां कंडूयनं स्पर्शं समाक्षिकमेव वा मार्कंडेयपुराणे । अस्नाताशीमलं भुंक्ते अजपी पूयशोणितं । [illegible] मनुः । उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः । आपस्तंबः । यस्तु भोजनशालायां भोक्तुकाम
वितं । अथ भोजनविधिः । तत्र देवलहारीतौ । आहारं तु रहः कुर्यान्निर्हारं चैव सर्वदा । गुप्ता त्वालक्ष्म्युपेता स्याद्रक्षिता भवति श्रिया । [illegible] यालक्षवासिनी हि द्विगर्तिस्यादुरकन्यका
परस्थानात् । आसनस्थो वान्यत्र स विज्ञः पंक्तिदूषकः । भोजनकाले नाष्टायां कुर्यात् । स च आसनस्थोवा अन्यत्र अनासनस्थोवा न चोपस्पृशेत् । यस्तु पस्पृश्वोपसपंक्ति दूषकश्चेत्यर्थः । याज्ञवल्क्यः । बाह्यं च [illegible] व्यासः । पंच
संतोज्यातिथि स्त्री वृद्ध पत्यो । व्याघ्र भोजनं वाय [illegible] । विप्रः स्वर्गपरो नित्यं अर्थयति देवता । गुरूं स्तिथिबालांश्च तर्पयित्वा स्वयं ततः । आत्मानं तर्पयेत्पश्चान्नियता वाग्यतः सदा । स्त्रीशूद्रं तर्पयेत्पश्चादेष धर्मः सनातनः । व्यासः । पंच
भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः । हस्तौ पादौ तथैवास्यमेषां पंचार्द्रता मता । [illegible] प्राङ्मुखोन्नानि भुंजीत शुचिः पीठमधिष्ठितः । विष्णुः । नतु द्विआसनांतरिताया किंतासुपविन्यसेत् । आसनेष्वथ वा हन्यात् प्रचेताः । गोः
यानं यंतिन्नं तथा पालाशपिप्पलं लोहपर्कं संदेवार्कं वर्जयेदासनं बुधः । ब्रह्मपुराणे । उपलिप्ते समे स्थाने शुचौ शुद्धासमन्वित । मंडलं गामयेनस्यादथवा गोरसेनया । अत्र विशेषमाह श्रीरत्नाः । चतुष्कोणं द्विजातीनां त्रिको
णं क्षत्रियस्य च मंडलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं मतं । व्यासः । चतुरस्रं त्रिकोणं च वर्तुलं चार्धचंद्रकं कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं । हारीतः । नकांस्यायसे कृष्णमये वा पात्रे अश्नीयात् । मनुः । नया
दोषं वर्ज्येत्कांस्ये कदाचिदपि भाजने । भिन्नभांडे न भुंजीत न भावप्रतिदूषिते । भिन्नभांड निषेधस्ताम्रादिव्यतिरिक्तविषयः । तथा च पैठीनसिः । ताम्ररजतसुवर्णशंखमुक्ताश्मस्फटिकानां भिन्नमभिन्नमिति । ताम्रपात्रे यति विषयं । गृहस्थ

× नाव

स्मृ॰

79

मदनपा०

४०

स्यनिषिद्धत्वात् । तथा च वृद्धमनुः । ताम्रपात्रेन भुंजीत भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु गृही भुंक्त्वैंदवं चरेत् । पलाशपत्रेषु वल्लिपलाशपत्रेषु वल्लिपलाश इति स्मृत्यर्थसारकारः । एक एव तु यो भुंक्ते विमले कांस्यभाजने । चत्वारि तस्य वर्द्धं-
ते आयुः प्रज्ञा यशो बलं । अत्रिः । आसने पादमारोप्य यो भुंक्ते ब्राह्मणः क्वचित् । मुखेन चान्नमश्नाति तुल्यं गोमांसभक्षणे । मुखेन गवादिवत् इत्यर्थः । बौधायनः । भोजनं हवनं दानं उपहारः प्रतिग्रहः । बहिर्जानु न कार्या-
णि तद्वदाचमनं स्मृतं । हारीतः । मार्जनार्थं बलिकर्म भोजनानि च देवतीर्थेन कुर्यात् । वृद्धमनुः । न पिबेन्न च भुंजीत द्विजः सव्येन पाणिना । नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत् । मार्कंडेयः । पादप्रसारणं कृत्वा न च
वेष्टितमस्तकः । विष्णुः । नाश्नीयाद्भार्यया सार्धं नाकाशे न तथोत्थितः । गायानः । प्रौढपादश्च कृत्वा चैवावसक्थिकं । आकाशे सर्ववादेषु विशेषमाह मार्कंडेयः । यस्तु पात्रे तु भुंजीत पंचग्रासान्महामुने । शेषमुच्छिष्टमन्नं च
मित्युद्धृत्य यत् भोज्यपात्रे निक्षिप्य इत्यर्थः । पित्रर्थं भोजने तु भूमौ पात्रस्थापनमावश्यकं । पित्रर्थं च न लुप्यत इत्यत्रैव वाक्यस्मृत्यंतरे । तेनैवास्ति भोजनात् पादारोपितपादः प्रौढपादः । ब्रह्मपुराणे । पंचग्रासांस्तु भुंजीत
कृत्वा विधिवन्मनिसंकटे । पात्रमुद्धृत्य शेषं तु स्वकीयेन करेण वै । पित्र्ये कर्मणि भुंजानो भूमौ पात्रं न चालयेत् । विष्णुः । नति मत्स्यान्नेनोत्संगे न भूमौ न पाणौ । उत्संगे ऊर्वोः पात्रं स्थापयित्वा । वसिष्ठः । सर्वाति तिरंगुलीभिर्न भि-
न्नपाणिं च नाम्बु पिबेत् । मार्कंडेयः । यस्तु पाणितले भुंक्ते यश्च सर्वाश्च समश्नुते । अंगुलीभिश्चोद्धरेद्यस्तु गोमांसाशनवत् स्मृतं । सर्वाश्च सर्वानष्टमित्यर्थः । विष्णुः । नोच्छिष्टो घृतमादद्यात् । आदिपुराणे । नोच्छिष्टो ग्राहयेदाज्यं
दग्धं शिष्टं न संत्यजेत् । शुष्कतृणकाष्ठशिरश्चैव नाद्यात् । कांडच्छिन्नं च यिति । नग्नान्न संध्ययोर्न मध्यरात्रे नार्धश- त्रे कदाचन । नार्द्रवासा नार्द्रशिरा न चायज्ञोपवीती वा न्यूरश्वयं च सायंप्रातर्द्विजातीनां अशनं श्रुतिनोदितं । नांत-
राभोजनं कुर्यादग्निहोत्रसमो विधिः । इति मनुनाप्युक्तं सायंप्रातरित्युपात्तं त्वरात्रिदिनयोर्ग्रहणार्थं न तु संध्याकालनियमार्थं न संध्ययोरिति निषेधात् । अग्निहोत्रसाम्याभिधानाद्दिवारात्रौ वा द्विर्भोजनं नित्य-
विद्यमेवाए एवं प्रबलिप्रकारेण श्रावोदेवाउपविष्टत्यक्तनियममुक्तं अथ स्वधा वा व्याहृति निगमयिष्या वाचमसि मंत्रेण त्वा सुप्रापरिषिंच्य धर्मराजादिबलिं दत्वा आपोशानक्रियां कृत्वा पंचग्रासान्
हीत्वा भोजनानंतरमनंतरीकरणादिकं विधायाचमनं कुर्यात् । तथा च गोभिलः । अथातः प्राणाहुति- कल्पो व्याहृतिभिर्गायित्र्या वाऽमृतं च कृत्वा सव्येन परिषिंचामीति सायं सत्येन त्वर्तेन परिषिंचामीति प्रा-
तः । अंतश्चरसि भूतेषु गुहायां विश्वतो मुखः । त्वं यज्ञस्त्वं वषट्कारस्त्वं ब्रह्मा त्वं प्रजापतिः । आपो ज्योतिर- सोऽमृतं ब्रह्म भूर्भुवः स्वरोम् अमृतोपस्तरणमसीत्यपः पीत्वा दक्षिणाहोतारं मनसानुस्मृत्य अर्धं वग्रासानश्नी-
यात् । प्राणाय स्वाहेति गार्ग्यः । प्रथममेव तेन जुहोति अपानाय स्वाहेति द्वितीयं एवमेव तेन जुहोति व्यानाय स्वाहेति तृतीयं हवनीयमेव तेन जुहोति उदानाय स्वाहेति चतुर्थमेव जुहोति समानाय स्वाहेति पंचममेव तेन जु-
होतीति । होमकर्तुर्विशेषमाह छंदोगपरिशिष्टे । प्राणाद्याहुतयः पंचनाम्ना मात्रास्तु वायवः । जिह्वया वायसेदन्नं दशनैर्न विसंस्पृशेत् । तर्जनीमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत् । मध्यमानामिकांगुष्ठैरपानेऽजुहुयाद्बुधः । कनि-
ष्ठिकानामिकांगुष्ठैर्व्याने तु जुहुयाद्धविः । तर्जनीं तु बहिः कृत्वा उदाने जुहुयाद्बुधः । समाने सर्वहस्तेन समुदायाहुतिर्भवेत् । भविष्यत्पुराणे । भोजनात्किंचिदन्नाग्रं धर्मराजाय वै बलिं । चित्राय चित्रगुप्ताय प्रेतेभ्यश्चैव दद्यात्
र्म । ब्रह्मपुराणे । हस्तेन लंघयेन्नान्नं प्रसादं केन कदाचन । दंताग्रोल्लंघयेदन्नं तदन्नं निहितं त्यजेत् । विष्णुपुराणे । अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं । लवणाम्लौ तथा मध्ये कटुतिक्तादिकस्ततः । प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये तु
कठिनाशनं । अंते पुनर्द्रवाशी तु बलारोग्ये न मुंचति । जठरं पूरयेदर्धं अन्नैर्भागं जलस्य च । वायोः संचारणार्थाय चतुर्थमवशेषयेत् । आदिपुराणे । एकपंक्त्योपविष्टा ये च भाया मध्ये वेदाध्ययने पराः । तदा दोषं विहायैव विप्रास्स-
र्व्ये गुरुपुरस्थे वा तु । आदिपुराणे एकपंक्त्यैरेस्तु भाय एकपंक्तिस्थितानां सर्वेषां भोजनं अपरिसमाप्ते इत्यर्थः । पंक्तिभेदमाह बृहस्पतिः । अग्निना भस्मना चैव स्तंभेन सलिलेन च । द्वारेण वर्त्ममार्गेण पंक्तिभेदो बुधैः स्मृतः । भोजननियम-
माहापस्तंबः । अष्टौ ग्रासा मुनेर्भक्ष्यं षोडशारण्यवासिनः । द्वात्रिंशच्च गृहस्थस्य अमितं ब्रह्मचारिणः । आहिताग्निरनड्वांश्च ब्रह्मचारी च ये त्रयः । अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतां । यदा गृहस्थस्योपवासः प्राप्तस्तदा बौ-
धायनोक्तं द्रष्टव्यं । प्राणाग्निहोत्रमंत्रांस्तु निरुद्धे भोजने जपेत् । त्रेताग्निहोत्रमंत्रांस्तु द्रव्यालाभे जपेदिति । निरुद्धे भोजने इति उपवासेन भोजनरहित इत्यर्थः । वृद्धमनुः । भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन । अन्यत्र दधिसक्तु-

१४०

अपपललचरिमच्छपा। सोऽजनानंतरं देवलः। तृप्तानोच्छिष्टं समादाय सर्वस्मात्किंचिदाववान्। उच्छिष्टभागधेयेभ्यः। सादकं निर्वपेद्भुवि। अत्र मंत्रः। रौरवे पूयनिलये पद्मार्बुदनिवासिनां। पार्थिनां सर्वमात्मानं अक्षय्यमु
पतिष्ठतु। इति गद्यव्यासः। ततस्तु सः सन्नमृतापिधानमसीत्युपः आरुप तस्मात् द्विशान्मनागपाश्रित्य विधिवदाचामेत्। अपोभाचाने लोकवासः। हस्तं प्रक्षाल्य व्यासेन गंडूषेय। पिबेत्तु पापमोहितः। सद्यो देवं च पितृं च
आत्मानं त्वि वसादयेतु। अर्घ्यपात्रात्तु गंडूषं अर्घ्यं यजति स्थले। रसातलेगता ये वै नागास्तेन प्रीणांति नित्यशः। देवलः। आचम्य च ततः कार्यं दंतकाष्ठस्य लक्षणं। ताजनेदंतलग्नानि निरुच्याचमनं चरेतु। देवल
सम संकार्यं लिपमन्येवं दंतवतून तत्र वऊष्ठा कुर्याद्दि - मुहूर्तं प्रति। दंतलग्नकालांतरस्थानच्युतं च्युतस्यैव वस्तु विर्नाचामेतु। तथा याज्ञवल्क्यः। स्मृत्वा स्यगतं दंतसक्तं च्युतकालतः शुचिः। ... संगिर
न्नपि श्रुविरिरियादागोनम। दंतश्लिष्टेषु दंतवदन्यत्र जिह्वाभिमर्शनात्। आकुच्युतेरेकइति। ... च्युतजिह्वातिष्ठन् नदोषो नाशीर्यर्थं। ... वहंतभावनानंतरं। देवलः। आचितहृदयदेशमतिस्पृशाति प्राणानां
यं शिरसि तु जेभा विंशालकस्तानान्तो नाप्याय स्वेति पुनरावम्य दक्षिणपादांगुष्ठे पाणिं निस्रावयेत्। तिर्यगंगुष्ठमात्रं। पुरुषोऽंगुष्ठसमाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्। ततः करादिकमस्त्रं तज्जा
तुनी संस्पृशेतु। तथा च व्यासः। माकरेणकरं स्पृश्य दीन्माजं घेमाच वकुषी। करुसंस्पृश्य कोतयस्तद्वियस्तिमहाजनः। करुणानुनी जानुनी स्वशराजे ... ब्याबहवेयदीति तानिवातिभाना तु मा कांडयता स्व सोप्याचम
वर्तव्यंततस्तांबूलत्तक्षणं। श्रवणं चेतिहासस्य ततः कुर्यात्समाहितः। याज्ञवल्क्योऽपि। अहः शेषं सहासीनः शिष्टैरिष्टैश्च बंधुभिरिति। इति भोजनविधिः॥ अथ भोज्याभोज्यव्यवस्था। तत्र याज्ञवल्क्यः। अनर्चितं वृथा मां
संवेरावीटसमन्वितं। शुक्लं पर्युषितानाच्छिष्टं पदास्पृष्टं च कामतः। अनर्चितमवज्ञापूर्वकं दत्तं वृथा मांसम
न्तचुक्तं नपर्युषितमन्यत्रागाघाउंवचुक्तं दधिगुडगोधूमयवपिष्टविकारेभ्यः इतिशेषं रवस्मरणातथा
धूमयवगोरसविक्रयात्। शंखः। अपूपाः सक्तवो धाना स्तक्रं दधिघृतं मधु। एतत्पण्येषु भोक्तव्यं
उदकरोहिताः। तत्र गाकालमाह। प्राणात्ययेन तथा श्राद्धे प्रोक्षितं द्विजकाम्यया। देवान् पितॄंश्च समभ्यर्च्य खा
पादितमतिथिभ्यः आदौ तद्धवात। यच्च निगमवचनं। अदनागापस्तु श्रेवश्राद्धेमांसं तथा मधु। देवतातव
श्रुतात्यत्रिं कलौ पंचविवर्जयेत्। इति मांसं विवर्जयेदिति निषेधः कलियुगे कर्तृब्राह्मणकर्तृकत्वात्र विषयः।
तत्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः। मधुप्रधानं शूद्रस्येति श्राद्धप्रकरणोपलक्ष्येनविवेपातिक्ष्मनातुद्विजदेवतापितृदैवतेन ततस्ययं शेषस्तस्य अदस्य सद्भावाना नदोषस्तागिन्युपादानादस्त्वर्णेऽप्यव
उ…… दत्तमांसम्…… अच्छति प्रवसः। अनंतपर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं। अस्नेहा अपि गो
इलेपोन वेदइवेतु सक्ष्माणि। तत्र पंचनखाः सेधागोधाकच्छपशल्यकाः। चाखाद्यम मत्स्येष्वपि सिंह
दन्मांसनदोषता कृशोषितं यागेभोक्तव्यस्य संस्कारेणासंस्कृतं द्विजकाम्यया। ब्राह्मणभोजनार्थयसे
निषिद्धेष्वपि मांसेष्वपि हितकालसंपादितं। अकालेनाश्नीस्यात्पर्युषितं राशयंतरितं। …दध्याद्यतिरिक्तं
व्यानास्तीति यतागम्यते। अकृषकारेणाव्यतिरिक्तगासत्वेणोदाममाह। वसंमनराकवीरेदिनानि पश्वरापतिः। संमितानि दुराचारो यो हंत्यविधिवत्पशून्। परिवक्तमांसस्य फलमाह। सवर्जिका मानवाप्नोति द
यूमेध्यफलं तथा। गृहेऽपि निवसन्विप्रो मुनिर्मांसविवर्जनात्। इति भोज्याभोज्यव्यवस्था॥ अथ भोज्यान्नाः। जाड्यपसंगा भोज्या अभोज्या अपि प्रदर्शिता। तत्र गौतमः। प्रसक्तानां स्वकर्मसु द्विजातीनां ब्रा
ह्मणो भुंजीतेति। प्रशस्तानामिच्छपिपाठः। स्वकर्मसु प्रशस्तानां निस्नातानां स्वकर्मनिरतानामित्यावतां याज्ञवल्क्योऽपि। परपाकरुचिर्नस्यादर्निद्यामंत्रणादृते इति। नमदर्निपिवीनस्मी। ब्राह्मणस्य
सदाश्नीयात्क्षत्रियस्य च पर्वसु। प्रवृत्तेषु च वैश्यस्य शूद्रस्य न कदाचन। न त्वापि ब्राह्मणादयः स्वकर्मनिष्ठा एव। पर्वसु पूर्णिमादिषु। प्रवृत्तेषु प्रकमविशेषेषु उत्सवेषु गोमंगलादिषु। तथा। अमृतं ब्राह्म
णस्यान्नं क्षत्रियस्य पयः स्मृतं। वैश्यस्य चान्नमेवान्नं शूद्रस्य रुधिरं स्मृतं। अभोज्यान्याह याज्ञवल्क्यो दर्शिताः। अग्निहीनस्य नान्नमद्यादनापदि। कदर्यबद्धचौराणां क्लीबरंगावतारिणां। वेणानिराक्त
वार्धुष्यगणिकागणदीक्षणां। एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथेति। अग्निहीनाः श्रौतस्मार्ताग्निरहिताः शूद्रादिः। सत्यप्यधिकारे निहीनो ब्राह्मणादिश्च। नतु येऽभिक्षुः। बद्धो निगडादिना। वेणो वीणावादन
जीवी। वार्धुष्यं निषिद्धवृद्ध्युपजीवनं। आत्मस्तुतिपरनिंदाकरणं च। तथा च विष्णुः। यस्तु निंदत्यरं जीवं प्रशंसत्यात्मनो गुणान्। स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः इति। गणदीक्षी बहुयाजकः। शूद्रस्य

८१

मदनपा॰

४९

नक्रदावना॥ अमिहीनस्य नान्नमद्यात् अनापदीत्यादिति॥ शूद्रस्यतोऽप्यत्रे प्राप्ते प्रतिप्रसवमाह। याज्ञवल्क्यः॥ शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः॥ भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥ दासो गर्भदासा
दयः॥ गोपालो गोपरिपालनजीवी॥ कुलमित्रं वंशपरंपरायातः॥ अर्धसीरी संत्यसमुत्पादितधान्येन सह कर्षकः॥ अथवा सीरोपलक्षितं कृषिफलार्धग्राही॥ नापितो गृहव्यापारकारयिता॥ त्तोरकर्त्रीमिय स्वश्शूद्रो
विक्रीत एव वाङ्मनःकायकर्मभिरात्मानं द्विजाय निवेदयति। तवाहमिति ददाति स आत्मनिवेदयिता॥ एतद्दासादाय यदीयात्मस्यैव तेत्त भोज्यान्नाः॥ यथाह हारीतः॥ कुलमित्रं कुलद्रोहेति दासं सुहृदं खुड्डू॥
सतेद्यस्य सुखं तत्पतात्तोत्तयन्नातासायासावतु कुलपुत्रः कुलमित्रपुत्राः॥ सवेद्यस्य यस्य संबंधी स वे दिव्यपी॥ अवश्चयाह सर्वत्रान्वेति॥ एतद्दासादायापि स्वविहितनित्यकर्मनिरता एव भोज्यान्नाः॥ तथा च मनुः॥ ना
याश्चूद्रस्यापक्वान्नं विद्वानश्राद्धिनो द्विजः॥ आददीतामते तस्माद्वृत्तावेकरात्रिकं॥ अश्राद्धी नित्यमाचर दिताः॥ एतत्त्व नित्यकर्मप्रदर्शनार्थं सकायत्रिकमेकातः पर्याप्तीपक्वान्नान्यपि विशेषतः॥ कुर्वन्त्रगिरसे
गारसं विवसन्तूष्यतिलं पिण्याकमेव वा॥ अष्टपात्रं तु यच्छूद्राद्यत्त्वान्यत्यसाहृती दातीति॥ कांडुपर्के स्नेहपक्वं पायसं दधि सक्तवः॥ एतानि शूद्रान्नभुजो भोज्यानि मनुरब्रवीत्॥ एवं च यानि शूद्रान्ननिषेधक
निवचनानि॥ तानि परिगणितशूद्रपरिगणितपक्वान्नव्यतिरिक्तविषयाणि॥ यानि च दासादिलक्षणानि पराशरस्मृत्यावत्तिहितानि तानि च न शूद्रजातिपरायणा॥ तस्मात्तानि परस्परविरोधाद्दोषलक्षणानि च शूद्रकन्या
समुत्पन्नो ब्राह्मणेन तु संस्कृतः॥ संस्कारेण तु भवेद्दासः असंस्कारेण नापितः॥ क्षत्रियाच्छूद्रकन्यायां सुतः जातः सुनामतः॥ गोपालस्तु स विज्ञेयो भोज्यो विप्रैर्न संशयः॥ वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः॥ कुलमित्रातिथिर्जे
ख्यातो भोज्यो विप्रैर्न संशयः॥ वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः॥ दैर्घिकस्तु विज्ञेयो भोज्यो विप्रैर्न संशय ॥ गोपालस्य तन्नियोजनकः॥ अन्येषां तु ब्राह्मणः॥ अत्रत्य च पितृसना पितगोपालानां मातृदाराः शूद्रत्वमुपपन्नं
तथापि तु कुलमित्रार्धसीरिणो नमान्नदारापि॥ न तच्छूद्रविन्मात्रदाराः शूद्रवर्ये घे चान्नति॥ एतत्सर्वेषु भोज्या न्नाद्यतेन विरोधः स्यात्॥ किं च मद्यविसिक्तन्यायेन पातित्याच्चेत्तेषां न शूद्रत्वं। तथापि तेषां शूद्रत्वेऽपि विभि
कादिजातिप्रतिपादकवचनानि सह विरोधः स्यात्॥ लक्षणवाक्यानामयमभिप्रायः॥ शूद्रस्य पाकसाद्यो नीनां भोज्यान्नत्वकथनप्रसंगात् चित्रवपि य संज्ञा अपि संतीति प्रदर्शनार्थमिति॥ अतएव वसुतोजानसुनामतः
गोपालस्तु स विज्ञेयः इत्यत्र नामशतिग्रहणं स्वतः॥ किं च भोज्याभोज्यान्ननिर्णयः॥ ॥अथ शयनविधिः॥ ॥ नवांगिरा॥ तथा याज्ञवल्क्योऽपि॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च॥ भृत्यैः परिवृतो भुक्त्वा नातितृप्तो
थ्यसंविभागात् सुकाराविश्वदेवादिसमुच्चयार्थः॥ एतच्च पाकान्तरेणान दिवावशिष्टेन॥ तथा च विष्णुपुराणे पुनः पाकमुपादाय सायमप्यवनीपते॥ विश्वेदेवनिमित्तं वै पत्न्या सार्धं बलिं हरेत्॥ व्यासः॥ छयोदेशेऽविविक्तेऽगोमय
नोपलेपितायाः गुरुदक्षप्रवणे विवसंविताहुसदाबुधः॥ तथा मंगल्यं स्वस्तिकं तं डविरास्थाने निधायवावेदिके गारुडे मंत्रिरक्षोघ्नचास्वपेत्तत्॥ विष्णुपुराणे॥ गच्छेच्छय्यामस्फुटितामपि दारुमयीं नृप सुप्रक्षालितचरणः सर्वातार
दोसलवसुवामाणां इति॥ पथश्च त्रय्यामधिधायरात्रिसूक्तं जप्त्वा विष्णुं नमस्कृत्य सर्पापसर्पणं इति तत्र श्लोकस्यं जप्त्वा देवतास्मरणं सत्त्वासमाधिमास्थाय न्यायं वैदिकान् मंत्रान् मातृसमुच्चलामङ्गलस्तुतिं रांर्वत्रश्चत्वर दक्षिणा
रास्यापदिति॥ दक्षिणशिराः इति प्रदर्शनार्थं अतएव पुराणे॥ प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप॥ सदैव स्वपतः पुंसो विपरीतं तु रोगदमिति॥ मार्कंडेयः॥ शून्यालये श्मशाने च एकवृक्षे चतुष्पथे॥ महादेवगृहे वापि मातृवेश्म
लिनस्त्वपेन्नु॥ अपवेना॥ न संध्यायां न्यायात्तनदेवसमीपेन वेदसमाप्तोनाशुविनन्निमेन विशोऽस्विकद्वायांन स्ततय करूहायत्ते नेषु नस्मशान वल्मीकमहादृष्ट्वा छायासु चेति॥ विष्णुः॥ नार्द्रपादः स्वपेन्न पला शशायनेनं नपंचदा उरूक
तनगजतस्मत्तेन विद्युदग्ध्यत्तेना निपुष्टेन पटसिक्तदमजेन बालमध्येनाशिमध्येन भान्यगोसुरुजताराशुराणां तु पटिनाछिन्नेन दिवति गजसम्स्तगजदंतरतो तथा॥ निद्रासमयमासाद्य तां हलंवदना त्यजेतु पर्यंकात्
मदीकालात्सुहुं पुष्पाणि मस्तकात्तु गदप्रमादयश्चाहितयदाः सर्वदा इमे॥ ॥इह मदनपारिजाते मदनदिनिपालदानजरूढं सकलकृतीयश्चासीदामोदादहपंडितत्तमरः॥ शमतीयर्षो याश्चे प्रकृतिरमणीयाच्युबकृति परा
गीलंप्राणं जगतिसज्जवस्तोकतिपाया॥ विरंविदेतेषां मुकुरतलस्वतेच्छितिनीयादियं व्यासा रसय पत्र वरमुनि विषयस्यसानिति॥ २॥ ॥इतिमदनपालपंडितपारिजात के कारमल्लेयादि विरुदराजी विराजमानस्य निबंधे मदनपा रि
जातात्तिष्ठतीयस्तबकः॥ ॥३॥ ॥ईंद्रद्वेश॥ —— ॥ ॥ अथ नामयनानंतरगर्भाधानादिसंस्काराः॥ तत्र गर्भाधानोपयुक्तत्वेन प्रथमं ऋतुकालो निरूप्यते॥ याज्ञवल्क्यः॥ षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्॥ ब्रह्मचार्येव पर्व

४१

स्याद्याश्चतस्रश्च वर्जयेत्॥ स्त्रीणां षोडश निशा ऋतुः॥ गर्भाधानयोग्यकालः॥ तत्रोक्तविधिना गच्छेद् ब्रह्मचार्येव चतुर्दश्यष्टमीविवर्जममावास्याच पौर्णिमा॥ ब्रह्मचार्यतातिनिपर्वाणि॥ रविसंक्रांतिरेव च मनुः॥ अमावास्यामष्टमीं च पूर्णि-
मासीं चतुर्दशीं॥ ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः॥ तथा॥ तासामाद्याश्चतस्रस्तु निंदितैकादशी तथा॥ त्रयोदशी च शेषाः स्युः प्रशस्ता दशरात्रयः॥ एकादशीत्रयोदश्यो द्युतानप्रशस्या हारीतस्तु चतुर्थरात्रावपि गर्भाधा-
नमिच्छंति॥ चतुर्थे दिने स्नातायां युग्मासु वा गर्भाधानं तदुपेतं ब्रह्मगर्भं संदधातीति॥ तथा॥ शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला॥ दैवकर्मणि पित्र्ये च पंचमेऽहनि शुध्यतीति॥ तत्र चतुर्थ्यां स्त्रीगमनस्य विहितप्रतिषिद्धत्वाद्विक-
ल्पः॥ स च व्यवस्थितः॥ रजोनिवृत्तौ चतुर्थ्यां विधिः॥ तदनिवृत्तौ प्रतिनिषेधः॥ अनेनैवाभिप्रायेण मनुः॥ रजस्युपरते साध्वी स्नानेन रजस्वलेति॥ साध्वी गर्भाधानादिविहितकर्मयोग्येत्यर्थः॥ याज्ञवल्क्यः॥ एवं गच्छन्स्त्रियं क्षामां मघां मूलं च
वर्जयेत्॥ सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्॥ सकृत्तु एकस्यां रात्रावेकवारमगच्छेदित्यर्थः॥ उमात्रक नियमयुक्त्या प्रतिहतपुंस्त्वो न वेत्॥ ज्योतिःशास्त्रे पित्र्यं पौष्णं नैर्ऋतं वापि धिष्ण्यं त्यजेदिति॥ पित्र्यं मघा॥ पौष्णं रेवती॥ नै-
र्ऋतं मूलं॥ ऋतुगमने स्नानमाह हारीतः॥ ॥ ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनिनः स्मृतं॥ अनृतौ तु सदा कार्यं शौचं मूत्रपुरीषवत्॥ धारितावच्च वीस्यान्तौ दंपती शयनं गतौ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्॥ प्रसंगाद्रजस्व-
लाव्रतानि॥ तत्र वसिष्ठः॥ त्रिरात्रं रजस्वलाऽशुचिर्भवति॥ सा नाञ्ज्यान्नाप्सु स्नायादधः शयीत दिवा न स्वप्यात् न मांसमश्नीयात् न ग्रहान्निरीक्षेत न हसेन्न किंचिदाचरेत् खर्वेण पात्रेण पिबेदञ्जलिना वा पा-
त्रेण लोहितायसेन वेति॥ खर्वा वामहस्तः॥ अथवा अखर्वप्रांजलिर्मृण्मयपात्रं॥ लोहितायसं ताम्रं॥ स्नानानंतरं पुनरपि दर्शने विशेषमाह हारीतः॥ रजस्वला यदि स्नाता पुनरेव रजस्वला॥ अष्टादशाहादिनादर्वागशुचि-
त्वं न विद्यते॥ एकोनविंशतेर्वाथ काहं स्यात्तदाहं विंशत्यूर्ध्वं त्रिरात्रमशुचिर्भवेदिति। अष्टादशादिनादर्वाक् सप्तदशादिनात्पूर्वमित्यर्थः॥ एवमुत्तरत्रापि॥ इयं गणना रजोदर्शनादिनादारभ्य तु
क्तं॥ चतुर्दशादिनादर्वागशुचित्वं न विद्यते॥ इति तत्तु स्नानप्रवृत्तीनिन विरोधः॥ प्रौढयौवनायास्तु अ- ष्टादशादिनात्परे रजोदर्शने त्रिरात्रमशुचिर्भवेत्॥॥ इति ऋतुकालनिर्णयः॥॥ अथ गर्भाधानं
तत्र विष्णुपुराणे॥ ऋतावुपगमः शस्तः स्वपत्न्यामवनीपते॥ इति॥ मंत्रत इति द्विजादिविषयं॥ तत्र मं- त्रो गोभिलेनोक्तः॥ ऊर्ध्वं त्रिरात्रात्संभवः स्यात् यदर्तुमती भवत्युपरतशोणिता तदा संभवकालः इत्युक्त्वा
पञ्चम्याद्दक्षिणेन पाणिनोपस्थमभिमृशेद्विष्णुर्योनिं कल्पयत्विति चैतयेत् पर्वगर्भं धेहि सिनीवालीति च स- माप्नुवोसंभवतः॥ स्त्रीणां बहुत्वे सकृदेव यौगपद्ये च गमनक्रममाह देवलः॥ यौगपद्ये तु तीर्थानां विप्रादि-
क्रमतावद्व्रजेत्॥ रक्षणार्थं पुत्राणां ग्रहणं क्रमशोपि वेति॥ तीर्थं स्मृतं॥ विप्रादिक्रमो वर्णक्रमः॥ प्रदक्षिणो वि- वाहक्रमः॥ ननु वर्णक्रमेणैव विवाहापीति पुनरपि ग्रहणक्रमोपादानमनर्थकमिति चेन्न॥ एवं प्रथमतः सव-
र्णादिक्रमेण दारस्य द्वितीयादन्यतरवर्णदारांतरविषये तस्य पुनरुक्तवर्णकसिकोपरिणीतस्य सवर्णस्य पुनर्वतादारेषु ऋतुकालयौगपद्ये विवाहक्रमेण गमनं नियम्यते इति ग्रहणक्रमोपादानस्य सार्थकत्वात्॥ पराशरः॥ कंऽ
स्त्रीतां त्रयोनार्यासंनिधौ नोपगच्छति॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ असंनिधौ तु न दोषः॥ संनिधानेऽपि स्वस्थस्यैवायं नियमः॥ यः स्वदारान् ऋतुस्नातान् स्वस्थः सन्नोपगच्छतीति स्मरणात्॥ अयं च ऋतुगमननि-
यमः अजातपुत्रस्यैव॥ मनुना ज्येष्ठस्य जाता स्यात्पितृणामदितरान्कामजान्निर्दिशन्॥ ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः॥ यस्मिन्नृणं संनयति येन चानंत्यमश्नुते॥ स एव धर्मजः पुत्रः कामजानितरान्विदुरिति॥॥ इति गर्भा-
धानं॥॥ अथ पुंसवनं॥ ॥ तत्र याज्ञवल्क्यः॥ गर्भाधानमृतौ पुंसः सवनं स्पंदनात्पुरेति॥ पुंसवनमित्यत्र पुत्रजनोपारस्करः॥ मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चंद्रमाः स्यादिति॥ पुंसा नक्षत्रेण पुंनक्षत्रेण॥ तानि च रत्नकोशे दर्शि-
तानि॥ हस्तो मूलं श्रवणं पुनर्वसुर्मृगशिरस्तथा॥ पुष्यः पुंसंज्ञितः कार्यं स्वतानि धिष्ण्यानीति॥ बृहस्पतिस्तु॥ जाते गर्भस्पंदने पुंसवनमाह॥ सवनं स्पंदितः शयाविति॥ अत्र च यथाचारं व्यवस्थेति पुंसवनं॥॥
अथ सीमंतोन्नयनं॥ तत्र याज्ञवल्क्यः॥ षष्ठेऽष्टमे वा सीमंत इति॥ शंखः॥ गर्भस्पंदने सीमंतोन्नयनं यावद्वा प्रसवः इति॥ लैगायनश्च॥ सप्तमे मासि प्रथमे गर्भे सीमंतोन्नयनमिति॥ आपस्तंबः॥ सीमंतोन्नयनं प्रथमे गर्भे चतु-
र्थे मासीति॥ बैजवापः॥ अथ सीमंतोन्नयनं मासि चतुर्थे षष्ठे पंचमे वेति॥ लौगाक्षिः॥ तृतीये गर्भमासे सीमंतं कारयेदिति॥ अत्र विशेषमाह त्रिविनकः॥ आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यादिति॥ पुंसवनसीमंत-
नयने स्त्रीसंस्कारौ॥ अत एव सकृत्कृतौ स्यातामिति केचन॥ पारस्करः॥ सकृत् संस्कृता संस्काराः सीमंतेन द्विजस्त्रियः॥ यं यं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेदिति॥ विष्णुः॥ सीमंतोन्नयनं कर्म न स्त्रीसंस्कार इष्यते॥ किंतु गर्भस्य संस्कारो २

जनेपि नं वधुं जनत इति । अत्रापि स्वस्वगृह्यानुसारेण व्यवस्था । अन्ये तु सीमंतायाः प्रसवे सद्य एव तो विनाशः । स्त्री यदा त्वसीमंता प्रसवेत् कथं चैनां गृहीतपुत्रां विधिवत्स्तुनः संस्कारमर्हतीति ॥ ॥ इति सीमंतोन्नयनं ॥ ॥
अथ जातकर्म ॥ ॥ तत्र विष्णुः । जाते कर्म ततः कुर्यात्पुत्रे जाते यथोदितं । यथोदितं स्वगृह्योक्तविधिनेत्यर्थः । तच्च स्नानानंतरं । जातपुत्रे पितुः स्नानं सचेलं तु विधीयत इति संवर्त्तस्मरणात् । एतच्च स्नानं रात्रावपि भवति । रात्रौ स्नानं
न कुर्वीत नैदानं चैव विशेषतः । नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु इति । नैमित्तिकदानं … पि स एवाह । ग्रहणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषु च । दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यतीति । जातकर्म च नालच्छेदनात्
पूर्वमेव तथा च मनुः । प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयत इति । जैमिनिः । यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते । यच्च विष्णुधर्मोत्तरे । अछिन्ननाल्यां कर्तव्यं श्राद्धं वै पुत्रजन्म
नि । आशौचापरकार्यपि तथा नियतामारितेति तत्तु कर्तृ अवराद्यतावाचावदितव्यं । अथ व्यवि नापः । जन्मनानंतरं कार्यं जातकर्म यथाविधि । दैवादतीतकालं चेदतीते सूतके भवेदिति । एतच्च आरुमानेन अत एव बृ…चेतस ॥
…पश्चाय … जातकर्मणि चाप्यथ । आमश्राद्धं ततः कुर्याद्दक्षिणा पर्वणेन चेति । आमानावेदसा । तथा च व्यासः । द्व्यासाविद्विजातावेप्रसवे पुत्रजन्मनि । हेमश्राद्धं यदा कुर्याद्धिरण्येन न पार्वणेन चेति । …
रजस्वला … आमद्व्याला … यस्पला … अमंत्रा । आद्यकृत्वक्व्याख्यास्यात । प्रतिग्रहश्च नाभिवर्द्धनात्पूर्वं वा तद्दह वा यथाह शंखः । कुमारप्रसवे नाल्यामछिन्नायां गुडतिलहिरण्यवस्त्रगोधा
न्यप्रतिग्रहेषु दोषः स्यादस्त्येवं कुर्वत इति । तथा सूर्विषास कल्यानां द्विपदश्च उष्यदोश्च त्यानि हिरण्यानि दद्यात् इति । आशौचमध्येपि तत्कार्यमित्याह प्रजापतिः । आशौचे तु समुत्पन्ने पुत्रजन्म यदा तदा । कर्तुस्तु
कालिकी शुद्धिः पूर्वाशौचेन शुध्यतीति । ज्योतिःशास्त्रे । मृदुध्रुवचरक्षिप्रेष्वेषामुदये पिवा गुणोत्कृष्ट वा कुर्याज्जातकर्म च नाम चेति । एतद्वै जातकर्मनामकरणं वृषवे दितव्यं । अन्ये तु कर्षेतु नायं नियमः । इति
मित्तानंतरसाविशान्नैमित्तिकस्य ॥ ॥ इति जातकर्म ॥ ॥ अथ नामकरणं । तत्र मनुः । नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् । पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते । याज्ञवल्क्यः । अहन्येकादशे नाम इति
… विष्णुपुराणे । नामधेयं दशम्यां तु केचिदिच्छंति पार्थिवाः । द्वादश्यामथ केरात्र्यां मासे पूर्णे तु … तथापरे । अष्टादशेहनि तथा … न्ये मनीषिणः । … परिशिष्टे जननाद्दशरात्रेषु … तरात्रे संव
त्सरे वेति तच्छंखः । आशौचे व्यतिक्रांते नामकर्म विधीयत इति । न चायं नियमः । तथा च नामधेयं दशम्यामित्यादिवचनाविरोधात् । तत्र च ह न्येकादशे नामेत्यादीनां विवक्षितार्थमिव … आशौचमध्येपि कार्यं
स्वगृह्यानुसारेण वितपक्षाय … विज्ञेयाः । शंखलिखितौ । दशम्यामुत्थाप्य पितृवर्द्धनं मित्रकर्मनाम मलकुपिता … निधिमिति श्रुतेः । ब्राह्मणो … इति । पूर्वं पितृ नत्वा मान्यतद … नामकरणं कुर्यादिच
तानक्षत्रानिसंबद्धं पिता वा कुर्यादन्यो वा कुलवृद्धः यक्षरं चतुरक्षरं वा घोषवदाद्यंतरस्थं … अयमर्थः । दशमेहनि सूतिकां पूर्ववदुत्थाप्य … पित्र्यवर्द्धनमिति
कर्मनाम तत्कुर्यात् । तत्र चायं क्रमः । ब्राह्मण पूर्वमाकृतिं … तु माता … पितातदत्ताविसान्निध्यासहिना अन्योन्येन कुर्यात् । तत्र नियमः । द्व्यक्षरं चतुरक्षरमित्यादि । वर्गद्वितीयचतुर्थानि यान्यक्षराणि
ककारश्च तान्यादौ … य र ल वा अंतस्थाः तन्मध्ये कुर्यादिति विजवायः । पिता नामकरोत्येकाक्षरं द्व्यक्षरं त्र्यक्षरं चतुरक्षरमपरिमितं वेति । अत्र समसंख्याः पुंसः । शंखः । अयुग्माक्षरमाकारांतं स्त्रियै तद्धितमिति । शं
खः । ईकारांतं स्त्रीणामपि स्वकुलसंबद्धं वा नाम कुर्यात् । तथा च शंखः । कुलदेवतासंबद्धं पिता नाम कुर्यादिति । कुलसंबद्धं देवतासंबद्धं वेत्यर्थः । तथा । तद्धर्मा शक्तिपाले धनपुष्टौ हीनजातिः । यमस्त्वक्षरपदनियममा
ह । शर्मादि वस्त्र विप्रस्य धर्मज्ञाता च … । स्मृतिदत्तस्यैवस्य … शूद्रकारयेत् । जातति … अदर्शनार्थ … अतः शक्तिपालनइत्याशीर्षा … इति नामकरणं ॥ ॥ अथ निष्क्रमणं ॥ ॥ तत्र तु विष्णुपुराणे ॥ ॥
चतुर्थे मासि तु रपि । पाद … निराजें … निष्क्रमणं गृहात् । चतुर्थे मासि कर्तव्यं तथान्येषां मतं विदा । अत्र विशेषमाह । यमः । ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनं । चतुर्थे मासि कर्तव्यं शिशोश्चंद्रस्य दर्शनं ॥ लोगाक्षिः । तृतीय
द्वमासआदि … चंद्रस्य दर्शनमिति । अत्रापि पूर्ववदेव व्यवस्था । सुरेश्वरः । जीवताग…सोम्यानां … निष्क्रमणक्रिया । दिवसे रास्य … नित्यमायुर्वृद्धिश्च नप्रजा ॥ अश्विनीरेवती हस्त धनिष्ठा रोहिणी तथा । श्रवणः पुष्य संयुक्तं मृगेणोत्तर
फाल्गुनी । अनुराधोत्तराषाढा तथैवोत्तरचैव वसुः । इमानि तानि शस्तानि निष्क्रमणे बुधैः । इति निष्क्रमणं ॥ ॥ अथ कर्णवेधः । ज्योतिःशास्त्रे । कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेपि वा । कर्णवेधं प्रशंसंति शुक्लपक्षे शुभे दिने ।

न च्चेश्चमसे चंद्रे सुस्थे शीर्षोदये शुभे॥ दिनक्षिद्व्यतीपातविष्टिवैधृतिवर्जिते॥ विरिक्तानंदतस्य मातुरुत्संगसर्पिताः॥ शौ विके वेधये कर्णौ सूर्याद्वियुण रुनया। हस्ताश्विनी स्वातिषु सर्वसूत्र तिथिषु विमाद स्वि
वतीषु चंद्रे नुकूलेषु रुक्षु कवारे कर्णोवध्याव मरे स्थलग्ने॥ अयं च वेधः कुलक्रमागतकाले कर्तव्यः॥ इति कर्णवेधः॥ अथान्नप्राशनं॥ तत्र मनुः॥ षष्ठेन्नप्राशनं कुर्याद्यद्वेष्टं मंगलं कुले॥ लौगाक्षिः॥ षष्ठे मासेन्न
प्राशनं जातेषु दंतेषु वेति॥ यमः॥ ततोन्नप्राशनं मासि षष्ठे कार्यं यथाविधि॥ अष्टमे वाथ कर्तव्यमिति॥ शंखः॥ संवत्सरेन्नप्राशनमिति॥ व्यवस्था तु पूर्ववत्॥ अत्र विशेषो मार्कंडेयपुराणे॥ देवतापुरतस्तस्य
धात्र्युत्संगगतस्य च॥ अलंकृतस्य दातव्यमन्नं पात्रे च कांचने॥ मध्वाज्यकनकोपेतं प्राशयेत्पायसं तु तं॥ ततः तदनंतरं शिशोराज्ञोरिकापरी हीः प्रकारमाह स एव॥ देवाग्रतोथ विन्यस्य शिल्पभांडानि सर्वशः॥ शास्त्राणि
चैव शास्त्राणि ततः पश्येत्तु लक्षणं॥ प्रथमं यत्स्पृशेद्बालस्ततो भांडं स्वयं तदा॥ जीविका तस्य बालस्य तेनैव तु भविष्यतीति॥ इत्यन्नप्राशनं॥ ॥ अथ चूडाकर्म॥ तत्र मनुः॥ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः॥ प्र
थमेब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्॥ यमः॥ तथा संवत्सरे पूर्णे चूडाकर्म विधीयते॥ द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात्॥ शंखलिखितौ॥ तृतीये वर्षे चूडाकर्म पंचमे वा॥ लौगाक्षिः॥ तृतीयस्य वर्षस्य भूयिष्ठे
गते चूडाकारयेत दक्षिणतः कमुजा वासिष्ठानां उभयतोत्रिकश्यपानां मुंडा भृगवः पंचचूडा अंगिरसो वाजिमेके मंगलार्थं शिखिनोन्ये यथाकुलधर्मं स्युः इदं पवीति वेति॥ कमुजा चूडा॥ वाजि कयप
क्ति॥ मंगलार्थमिति॥ अन्ये तु मंगलार्थं शिखामात्रं च यत्र कचन कुर्वन्ति॥ अन्नापि यथागृह्यं व्यवस्था॥ व्यासः॥ ॥ अश्विनी श्रवणस्वाति चित्रापुष्यपुनर्वसू॥ धनिष्ठा रेवती ज्येष्ठा मृगहस्तेषु कारयेत्॥ क्षौरमिति॥ ज्योतिषे॥ तथा॥
नक्षत्रे तु न कुर्वीत यस्मिन्जातो भवेन्नरः॥ न प्रोष्ठपदयोः कार्यं नैवाग्नेये च तारके॥ दारुणेषु च सर्वेषु इत्युत्तरां च वर्जयेत्॥ अन्यदपि तिथिवारादिविशेषादुपनयनप्रकरणोक्तमत्र द्रष्टव्यं॥ इति चूडाकर्म॥ ॥ अथ स्त्रीसंस्का
राः॥ तत्र मनुः॥ अमंत्रिका तु कार्येयं स्त्रीणामावृदशेषतः॥ संस्कारार्थं शरीरस्य यथाकालं यथाक्रमं॥ आह जातकर्मादिक्रियायथाक्रममसिद्धानां क्रमातिक्रमो न कर्तव्य इत्युक्तं भवति॥ अतएव कालातिक्रमे वा
यायनेन प्रायश्चित्तमतिहितं॥ देवतानां विपर्यासे जुहोतिषु कथं भवेत्॥ सर्वप्रायश्चित्तं कृत्वा क्रम वोढुं जुहुयात्॥ पुनः संस्कारा अतियुज्येरन् स्वकालश्चेत्कथंचन॥ कृत्वैतदेव कर्तव्या ये रूपेनयनाद्या
वः॥ सर्वप्रायश्चित्तमपि एवाह॥ सर्वप्रायश्चित्तं च पंच ते॥ प्रत्यृचं त्वेन्नो अग्ने इति द्वाभ्यां मयाग्नेति मात मध्वं मनिति वेति॥ उपनयनकालातिपाते तु व्रात्यस्तोमइव वा॥ एतेष्वेके कलोपपाद ... चौललोपे च ये
तु॥ स्त्रीसंस्कारे गोभिलो विशेषमाह॥ स्त्रीमनाः॥ क्रियाः॥ स्त्रीणां मंत्रेण तु होम इति॥ अथ विद्यारंभः॥ तत्र मार्कंड यः॥ प्राप्ते पंचमे वर्षे अप्रसुप्ते जनार्दने॥ षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीं॥ रिक्तां पंचदशीं चैव सौरभौ
मदिने तथा॥ एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्॥ पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं॥ स्वविद्यां स्वसूत्रकारांश्च स्वां विद्यां च विशेषतः॥ एतेषामेव देवानां नाम्ना तु जुहुयाद्घृतं॥ दक्षिणाभिर्द्विजेंद्राणां कर्तव्यं चात्र पूज
नं॥ प्राङ्मुखो गुरुरासीनो वारुणाशामुखं शिशुं॥ अध्यापयेत्प्रथमं द्विजाशीर्भिः सुपूजितं॥ ततः प्रभृत्यनध्यायान्वर्जनीयान्विवर्जयेत्॥ इति॥ अस्य च विशेषो॥ कामवारणादेतस्य॥ यथाह गौतमः॥ प्रागुपनयनात्कामचारवा
दभक्षा इति॥ कामचारो पतनीयकर्म स्यात् वत्र पादो बालेषु दातव्य इति॥ आदि प्रायश्चित्तस्मरणात्॥ इति गर्भाधानादिसंस्काराः॥ ॥ ब्रह्मचर्याश्रमो गृहस्थाश्रम इति द्वावाश्रमौ सधर्मौ विस्तारेणोपपादितौ॥ अथ व
नाश्रमः प्रस्तूयते॥ तत्र शंखः॥ गृहस्थस्तु सदा पश्येद्वलीपलितमात्मनः॥ अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥ पुत्रेषु दारान्निक्षिप्य तया वानुगतो वने॥ अग्नीनुपाचरेन्नित्यं वन्यमाहारमाहरेत्॥ यदाहारो भवेत्तेन पूजये
त्पितृदेवताः॥ तेनैव पूजयेन्नित्यमतिथिं समुपागतं॥ ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्समाहितः॥ स्वाध्यायं च ततः कुर्याज्जटाश्च बिभृयात्तथा॥ तपसा शोषयेन्नित्यं स्वकं चैव कलेवरं॥ आर्द्रवासास्तु हेमंते ग्रीष्मे पंचतपास्तथा॥
प्रावृष्याकाशशायी स्यान्नक्ताशी च सदा भवेत्॥ चतुर्थकालिको वा स्यात्षष्ठकालिक एव च॥ कृच्छ्रैर्वापि नयेत्कालं ब्रह्मचर्यं च पालयेत्॥ एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत्॥ इति॥ अथ चतुर्थाश्रमः॥ तत्र प्रथमं त्रैवर्णिकस्यैक
स्य क्रियते इति विचार्यते॥ तत्र सूत्रकारः॥ त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति॥ तथापरार्के॥ ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः॥ ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात्॥ धर्मविद्वता वापि ब्राह्मणः क्षत्रि
यो वा विप्रः स्तनो गच्छेद्वनं कृतो॥ संन्यसेद्वाथवा शांतः सर्वस्तु तदया पर इति॥ त्रैवर्णिकस्याधिकारमेतानि वाक्यानि निदधति॥ अतश्च वर्णिकानामपि त्र्याश्रमेष्वधिकारः॥ यत्तु जाबालश्रुतिः॥ ब्राह्मणाः प्रव्रजंतीति तत्स्य गति

मदनपा०

ब्राह्मणशब्दः प्रदर्शनार्थः। अतः क्षत्रियवैश्यावप्युपलक्षयति। तेन न विरोधः इति। अथ ब्रह्म वेदः तन्निष्ठत्वं न वा ब्राह्मणा इति श्रुत्या ब्राह्मणशब्दो वर्णत्रयपरः। एतेनात्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्र-
जेद्गृहादित्यादिमन्वादिवचनान्यपि व्याख्यातानि। यद्वा द क्षत्रियवैश्यानां मुख्यानामयं धर्मो यत् त्रिदण्डलिंगधारणं बाहुजातोरुजातानां नायं धर्मो न विद्यत इति। तथा गौतमसूत्रे नास्ति बाहुजोरुजयोः क्वचित्तु
यतिश्रमे गतिः ओंकारमुखजानां स्वयंभुवेति। एतदपि वचनद्वयं वस्तुतो न विरुध्यते। मुखजो ब्राह्मणः। बाहुजः क्षत्रियः। ऊरुजो वैश्यः। एतेषामयं धर्मो लिंगधारणात्मको न विद्यते। लिंगं लक्षणं चिह्नं त्रिदंडैकदंडरूपं
न्यासवदक्षामिरवलाजिनदंडेन ब्रह्मचारीति लक्ष्यते। गृहस्थो यदि वेदाद्यैर्नखरोमैर्वनाश्रितः। त्रिदंडेन यतिश्चैवं लक्षणानि पृथक् पृथक् इति। त्रिदंडग्रहणमेकदंडस्यापि प्रदर्शनार्थं। एवंविधं लिंगं क्षत्रियवैश्य-
योर्नेति दंडधारणनिषेध एव नाश्रमनिषेधः। तथा गतिस्तु यतिश्रमे नास्तीति तस्याप्ययमेवार्थः। गतिर्ज्ञानं। सर्वे गत्यर्था ज्ञानार्था इति स्मरणात्। ज्ञानं च ज्ञापकनिष्पाद्यं अत एव ज्ञापककार्यं तस्मात् तेन ज्ञानरूपेण कार्येण
कारणं ज्ञापकं। दंडधारणं लक्ष्यते। तथा चेत्युक्तं भवति क्षत्रियवैश्ययोर्ज्ञापकं दंडधारणं नास्तीति। लिंगनिषेध एव न त्वाश्रमनिषेध इति। दंडधारणं बहिरंगं विषयविराग एव मुख्यः। विरागता चेदधिकारितावात् य
आश्रमविहितावेकवचनांतरं। संन्यसेद् ब्राह्मणः सम्यग्ज्ञानप्रतिष्ठोत्तवेन्नृपावानप्रतिष्ठोत्तवेद्देश्यएवं वक्ष्यमाणः स्मृत इति गम्यते। तथा च क्षत्रियवैश्ययोः ... हित आश्रमोत्तवेत्यर्थः। उक्तं भवति। अन्यथा छंदे
गसूत्रकारादिवचनविरोधः प्रसज्येत। अयं च तात्पर्यार्थः। अबाधेनोपपन्नो बाधो नान्याय्य इति न्यायेन श्रुतिस्मृतिवाक्यविरोधपरिहाराय विधिवाक्यानामाश्रमस्वरूपविधौ तात्पर्यं निषेधवाक्यानां तु दंडग्र-
हणमात्रनिषेधतात्पर्यं तस्मात् क्षत्रियवैश्ययोर्दंडग्रहणमात्रनिषेधेन न त्वाश्रमनिषेध इति। एवं प्राप्ते निषिध्यते। श्रुतिस्मृतिविरोधे श्रुतिरेव बलीयसी। अतः श्रुत्यनुसारेण व्यवस्था विधीयते। ब्राह्म-
णाः प्रव्रजंतीति श्रूयते। अत्र ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिर्विवक्षितोऽर्थः। ब्राह्मणोद्देशेन प्रव्रज्या विधीयते। उद्देश्यविशेषणमेवाविवक्षितं तं दृहविरुतयच वक्तूने उद्देश्यमविवक्षितं। तस्मादिह ब्र-
ह्मणोद्देशेन संन्यासविधानात् उद्देश्यब्राह्मणस्य रुचिर्वीदिवक्षितत्वात् तस्यैव प्रव्रज्याधिकारो नान्यस्य। ननु यदि तर्हि ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिर्विवक्षितोऽर्थः। तर्हि तस्योद्देश्यत्वेन विव-
क्षितत्वात् क्षत्रियवैश्ययोः प्रव्रज्यामानामस्तदधिकारः। न च तथा ब्राह्मणजातिरर्थः। अपि च ब्रह्म वेदः। तन्निष्ठात् तदध्ययनवंतो ब्राह्मणा इति वेदाध्ययनं धर्मेकोऽनुगतो धर्मः। स च ब्राह्मणशब्दस्या-
र्थः। तथा च वेदाध्ययनवत्त्वरूपेणोक्तेनोपाधिना ब्राह्मणक्षत्रियवैश्यानामपि क्रोडीकृतानि तेषु। एवं च ब्राह्मणोद्देशेन प्रव्रज्याविधानात् त्रयाणामपि वर्णानां तत्राधिकारोऽस्तीति चेत्। मैवं। यथा क्ष-
त्रियशब्दस्य क्षत्रियत्वं वैश्यशब्दस्य वैश्यत्वं गोशब्दस्य च गोत्वमर्थस्तथा ब्राह्मणशब्दस्यापि ब्राह्मणत्वमेवार्थ इत्याचार्यजैमिनिबादरायणादिभिर्निर्णीतं तद्बाध्येत। अथोक्तव्याघातनया ब्राह्मणस्य
शब्दस्य ब्राह्मणत्वं वेदाध्ययनत्वं चोभयमपि वाच्यत्वेन परिकल्प्येत तदा न्यायस्यानेकार्थत्वमिति नानेकार्थत्वमेकशब्दस्य निषिद्धं तेन न्यायेन सह विरोधः प्रसज्येत। अथ तेनं ब्रूषे अन्यायश्चानेकार्थत्वमिति
न्यायेन नायं यदपि गवादिशब्दानामप्यनेकार्थत्वं। एवं ब्राह्मणशब्दस्याप्यनेकार्थत्वमस्त्विति न चेत् तदुक्तं। अगतिका ह्ययं गतिर्यदनेकशक्तिपरिकल्पनयाप्यनेकार्थत्वमेगोग्जुर्वतेन ब्राह्मणशब्दस्य। अत एवाभिधा-
नकोशैरपि गवादिशब्दा अनेकार्थवर्गे परिगणिताः। तेषामपि व्यवहारः शब्दाद्यास्वार्थनिर्णयः स्वार्थपरिज्ञाने तु प्रसिद्धार्थस्य च ग्रहणं न तु रस्याद् इतरस्यापि ग्रहणे गोपशुविधायकवाक्ये
पि सत्स्यादिपता गोपिंडव्यतिरिक्तस्यापि ग्रहणं स्यात् न च गृह्यते तस्मात् शास्त्रार्थनिर्णये प्रसिद्धार्थस्यैव ग्रहणं युक्तं विपरीतार्थघातकवाक्यशेषाद्यभावे। अतोऽनेकशक्तिकल्पनादोषभयात् ब्राह्मणशब्दस्य ब्र-
ह्मणत्वजातिरेवार्थः। अनुवर्तमानाविब्राह्मणश्चिति ... णवजायत इत्यत्र ब्राह्मणशब्दो यथा वर्णत्रयपर एवमत्राप्यस्त्विति चेत् नामैवं दृष्टांते हि क्रियादौ संपाद्यत्। तथा हि ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः
प्रजया पितृभ्य इति वाक्यशेषे ब्रह्मचर्यादित्रिष्वप्यादि ऋणत्रयापाकरणश्रुतीत ब्रह्मचर्यादित्रिषु त्रैवर्णिकस्याधिकारात्। फलं च मनवमुखांतेरणाजायमानो विब्राह्मण इत्यत्रापि त्रैवर्णिकानुप्रवेशाद्युज्यते। तच्च
वर्णिकपरं। किंच। यावता कालेनावश्यवाप्युपासनरूपा याबाधा क्षत्रियवैश्यादयो ब्राह्मणशब्देन प्रत्याय्यंते। ततः सर्वानिवलज्ञप्तिकाया रूढेः प्राबल्यात्। अनुपपन्नता बाधरूढ्या ब्राह्मणत्वमेव प्रत्याय्यते।

एतद

।।४२।।

हूल ३

अतश्च प्रथमप्रतीतब्राह्मणोद्देशेन प्रव्रज्याविधेश्चरितार्थत्वात् नवरमप्रतीतयौगिकार्थस्वीकरणमुचितं। ततश्च कुर्दुवरी स्पृष्ट्वोद्गायेदिति श्रुत्याविरुद्धमौडुंबरी सर्वा वेष्टयितव्येति स्मृतिवचनं यथा
विरोधाधिकरणे अप्रामाण्यमित्युक्तं। एवं ब्राह्मणाः प्रव्रजंतीति जाबालिश्रुतिविरुद्धं त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमास्त्यादिकं स्मार्तवचनजातं प्रमाणमेवायत् [illegible] श्रुतिविरुद्धस्यापि स्मार्तव
चननिचयस्य सर्वथा प्रामाण्यपरिनिर्दोषं [illegible] सामान्ये वा अर्थपरिकल्पनीयः। तत्र त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति छंदोगपरिशिष्टस्यायमर्थः। त्रयाणां वर्णानां यथोचितं चत्वार आश्र
मा इति। अविशेषश्रुत्यविरोधाय ब्राह्मणस्यैव चतुर्थाश्रमाधिकारविशेषेणान्यथा। त्रैवर्णिकानां संन्यासो विद्यते नात्र संशयः। शिखायज्ञोपवीतानां त्यागपूर्वकं दंडमुगिति ब्रह्मांडपुराणवचनमपि छंदो
गसूत्रेण समनार्थं [illegible] वचनं। वैराग्योत्पत्तिमात्रेण वसंन्यासो परियुज्यते रागवानपि विप्रोऽपि वेदवेदांगवित्तम इति। वेदवेदांगवित्तमोऽपि विप्रो रागवांश्चेत् संन्यासेन परियुज्यत इत्यन्वयः। एवं
च विप्रस्यैव विरक्तस्यैवाधिकार अतिहितोऽस्त्वेव तु न क्षत्रियादेः। यद्वस्मृत्यंतरं [illegible] निर्ममा निरहंकृतिः। ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहादिति अस्यायमभिप्रायः। गृहात्प्रव्रजेद्वानप्रस्था
श्रमं गच्छेत् प्रव्रज्याशब्दो यद्यपि संन्यासे रूढः तथापि श्रुतिविरोधपरिहारार्थं अत्र तृतीयाश्रमपरः। अस्यापि वैराग्ये [illegible] ब्राह्मणः स्ववृत्त्यावजीवन् क्षत्रियवृत्तिमाश्रितः तत्रापि वैश्यवृत्तितत्र
तामापद्यं निर्लीप्यपि न वर्णांतरवृत्तिपरित्यजति किं तु तत्रैव वृत्ताववस्थितः तदा तद्ब्राह्मणानुक्षत्रियादिवृत्तिजीवनेन स एव ब्राह्मणः क्षत्रिय इति वैश्य इति च व्यपदिश्यते [illegible] अनुज्ञातकालेपि क्षत्रादि
वृत्तिनिरंतरत्वात् तस्यापि प्रव्रजेद्गृहादित्यत्र ग्रहणात्। ब्राह्मण एव अथानंतरं [illegible] आश्रयणात् क्षत्रिया अथवैश्यस्यानेन आनंतर्यप्रतिपादनादयमर्थो गम्यत इत्यर्थः। एतेन ब्राह्मणः क्षत्रियो वै
[illegible] संन्यसेत् [illegible] इति व्याख्यातं। एवं च मनुदक्षत्रियादिवचनान्यप्यनुकूलानि नवेयुः। तस्माच्छ्रुतिविरोधपरिहाराय तौ तरीत्या अन्यान्यपि विरुद्धवचनानि तथानि यथा
उत्तरतं प्रत्युपदेशः [illegible] पदमिच्छुरसितत्परमहंसोत्त वाहेति। अत्रेदं [illegible] उत्तरतं प्रत्येवोपदेशः [illegible] क्षत्रियमात्रं प्रतिआपद्य उत्त
रतस्येवेति न तर क्षत्रिय आपन्नि। किंच जडभरतादिप्रसिद्धाचारस्य पूर्वकमाश्रमं गृहीतवानिति तेन क्वापि श्रूयते। अतो ब्राह्मणः प्रव्रजेदित्येतदनुरोधात्परमहंसोत्तवचस्यायमर्थः। परमहंस इति ति
र्मामात्रवति। नापि द्वितीयः। तत्राखिललक्षणासावन मुक्तान विधान लक्षणेति तदनुरूपत्वेति लिविधेन लक्षणानि [illegible] तु विधिरितिवत्स्यादीत्प्रष्टव्यं। किं विशिष्टो विधिः। उतप्राप्तेककर्मण्यधिकारिकविधिरिति। प्रथमे
पिल लक्षणाप्रसक्तिर्दुर्वासा। ननु [illegible] विध्वंसो आतानंदो घइति वतु तल्लिलक्षणोद्देश्येपि न युक्ते तिब्रूमः। तथाहि संबंधानुपपत्तिरूपलिलक्षणा न वा प्राप्यनुपपत्तिः। स्वीकरीत्या वाक्यस्यार्थांतरपरं परत्वेन
[illegible] उपपत्तेः। सा च जाबालश्रुतिर्जनकयाज्ञवल्क्यसंवादे। तत्र परमहंसा नाम संवर्तकारुणिश्वेतकेतुदुर्वासा ऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतय इति। अत्रापि विधायकप्रत्ययाभावात्परमहंससद्भा
वमर्थवंत इति अहंकारमतयोरभावात्परमहंस इति व्यपदिश्यते। तस्मात्सिद्धं ब्राह्मणस्यैवाधिकार इति। अथ यतिधर्माः। तत्र याज्ञवल्क्यः। सर्वभूतहितः शांतस्त्रिदंडी सकमंडलुः। एकारामः परिव्रज्य भिक्षार्थी ग्राम
माश्रयेत्। त्रिदंडीत्यनेनैकदंडपरिग्रहात्। अतएव नैवानिजायाणामनुः। वाग्दंडोऽथ मनोदंडः कर्मदंडस्तथैव च। यस्यैते नियता दंडाः स त्रिदंडीति कथ्यते। बौधायनः। एकदंडी त्रिदंडी चेति। चतुर्विंशतिमते। एकदंडी त्रि
दंडी वा सर्वसंगविवर्जितः। तत्र दंडो वैणवः। तथा च मार्यता प्राजापत्येष्टिमनंतरं त्रिवेणुं वाग्दंडं मूर्ध्निप्रमाणाद्दक्षिणेन पाणिना धारयेत् सव्येन सोदकं कमंडलुमिति। वसिष्ठः। मुंडोऽममोऽपरिग्रह इति। स शिखावान्कैश
न्निःकृत्य विसृज्य यज्ञोपवीतमिति। काठकश्रुतिः। तथा परिविष्टोऽपि। अथ यज्ञोपवीतमप्सु जुहोति। स्वाहेत्यथ दंडमादत्ते सखे मां गोपायेति। देवलः। कषायां मुंडस्त्रिदंडी कमंडलुपवित्रपादुकासनकथामात्र इति।
कात्यः। एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकं। वर्षाभ्योऽन्यत्र वर्षासु मासांश्चतुरो वसेत्। मत्स्यपुराणे। अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनां। एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः। आविमुक्ते प्रविष्टानां विहारस्तु
न विद्यते। न देहो हि विना तत्र दृश्यात् [illegible] सनातन इति। मनुः। विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने। वृत्ते शरावसंपाते नित्यं भिक्षां यतिश्चरेत्। तथा। एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे। भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि

मदनपा०

४४

स्फुरति॥ अत्र [illegible] प्रति वसिष्ठः॥ ब्राह्मणकुले वायुर्ज्ञानेन तत्कुंजीत सायंप्रातर्मधुमांसवर्जमिति॥ तथा॥ सप्तागारग्रासं कल्पितानि चरेत्॥ संवर्त्तः॥ अष्टौ तिस्रः समादाय समुनिः पंच सप्त वा॥ अद्भिः प्रक्षाल्य ताः सर्वास्ता

स्ताश्नीयाद्वाग्यतः॥ मनुः॥ यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः॥ आत्मज्ञाने समे तस्याद्वेदाभ्यासे च यत्नवान्॥ [illegible]॥ अत एव समेतं तेरो एकांतरपरं ब्रह्म प्राणायामः परं तपः॥ उपवासात्परं [illegible]

यादानादिविशिष्यते इति॥ तथा॥ नाभिनंदेत मरणं नाभिनंदेत जीवितं॥ कालमेव प्रतीक्षेत निर्वेशं भृतको यथा॥ [illegible] याज्ञवल्क्यः॥ यानि पा

[illegible] सलिलं [illegible] [illegible]॥ इयं [illegible] [illegible] [illegible] [illegible] उपर्यतो [illegible] करणे [illegible] प्रमाणमनु संध्ये

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तेषामस्मिः

[illegible] [illegible] इति॥ इह मदनपारिजाते मदनक्षितिपालहानजलरूदे [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] जगति

[illegible] [illegible] [illegible] [illegible] व्यासारस्य प्रवरस्य नि [illegible]॥ २॥ ॥ इह मदनपालपंडितपारिजातकल्पसमस्तेत्यादि [illegible] [illegible] मदनपारिजा

ताभिधे [illegible]॥ ॥ [illegible] ॥ अथ [illegible] अधुना तत्कर्मसंकोचनिमित्तमाशौचकालो निरूप्यते॥ तत्र [illegible] [illegible] मासचतुष्टयात्पंतरस्त्रावः॥ पंचमषष्ठयोः पातः॥ सप्तम

[illegible] तथा [illegible] [illegible] पातः पंचमषष्ठयोः॥ अत ऊर्ध्वं प्रसूतिः स्यात् [illegible] [illegible] [illegible] [illegible] [illegible] अनुगतस्य [illegible] स्मरणात्॥

मारीचिरपि॥ गर्भस्रावे यथामासमचिरे तूत्तमे त्र्यहः॥ राजन्ये तु चतूरात्रं वैश्ये पंचाहमेव तु॥ अष्टाहेन तु [illegible] [illegible] अचिरे मासत्रयात्पंतरगर्भस्रावे तत्र ब्राह्मणे॥ अचराजन्ये तु चतूरात्रं

याद्यविवक्षितार्थः स्त्रावे तु त्रिरात्रं स्यात् पित्रोश्च वर्णेः॥ पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति तत्रेवा [illegible] [illegible] राजन्यादिषु चतूरात्रादि॥ तर्हि पाते मातुर्यथामासमित्युक्तं स्यात् विवक्ष

ऽयोरविरस्त्रावे पंचाहाष्टाहौ॥ पंचममासपाते च पंचाहमेवेति॥ [illegible]॥ ननु पाते मातुर्यथामासमित्यादौ [illegible] विवचनं ब्राह्मणव्यतिरिक्तविषयमस्तु॥ एवं [illegible] [illegible] परिकल्प्यते॥ तत्र मरीचिवचन

योः परस्परविरोधः॥ अत एव [illegible] त्रिरात्रं विप्राणामाशौचं [illegible] [illegible] [illegible] [illegible]॥ [illegible] मरीचिवचनयोरेव विरोधं तत्र स्यादुपपत्त्या॥

तथा हि॥ गर्भस्रावे यथामासं मारीचे तूत्तमे त्र्यह इति स्रावे मातुस्त्रिरात्रं स्यादिति [illegible] [illegible] [illegible] एतद्विषय इति [illegible] [illegible]॥ तथा च चतुर्थमासि स्रावे त्रिरात्रमपि

याधिकं सार्धं त्रिरात्रमाशौचं कल्पनीयं॥ अचिरस्रावविषये तु पाते मातुर्यथामासमिति पंचमषष्ठयोः॥ यथामासमाशौचं [illegible] तत्र गर्भस्रावे यथामासमिति चतुर्थमासेपि दिनचतुष्टयमाशौचं [illegible] विरुध्येत॥ अथास्त्रा

वशब्दः पातपरः॥ नहि पाते मातुः स्त्रियेनेन पौनरुक्त्यं स्यात्॥ अतः स्ववचनविरोधपरिहाराय रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यतीत्यादि [illegible] वचनानुसारेण राजन्ये तु चतूरात्रमित्यादिवचने गर्भस्रावविवक्षितार्थत्वम

निष्ठतापि मरीचिना गौकर्त्तव्यं॥ अतश्च सर्ववर्णसाधारणमेव मासत्रयगर्भस्रावे त्रिरात्राशौचं॥ अथवा आपद्यन्यत्र [illegible] मनायदि [illegible] त्रिरात्रादिकमिति व्यवस्था विज्ञेया॥ आ [illegible] सपिंडानामाशौचं नास्ति॥ पितु

स्तु स्नानमेव॥ सपिंडं शौचवर्जमिति॥ मरीचिस्मरणात्॥ स्नानमात्रमेव तु रूपस्येति [illegible] वसिष्ठ [illegible]॥ चतुर्थमासपर्यंतं [illegible] त्याग [illegible] स्नानमात्रं [illegible] दिनानि [illegible]॥ तथा च याज्ञवल्क्यः॥ गर्भस्रावेम

सतुल्या निशाः [illegible] कारणं॥ अत्र स्रवति द्रवाद्रवसा [illegible] पातनं वर्त्तते॥ अत्र च पातरूढ पंचमषष्ठमासस्त्राने पित्रादीनां दिनत्रयमाशौचं॥ पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति मरीचिस्मरणात्॥ [illegible] समेत

अजातदंतेन तायगर्भमृतगर्भच्युते तथा॥ सपिंडानां तु सर्वेषामेकरात्रमशौचकमिति॥ एतच्च गर्भपाते एकाहविधानं तु गुणवत्पित्रादिविषयं॥ यत्तु मादिपुराणे सद्यः॥ शौचं सपिंडानां गर्भस्य पतने सतीति तत्तु स्वरूप

४४

गर्भस्य मांसवद्धयान्यत्तरपतने। एवमन्यान्यपि वचनान्यनु— धेयानि॥ इति गर्भस्रावशौचं॥ सप्तममासप्रभृति प्रसवस्वरूपत्वात्पूर्णाशौचमेव तत्र भवति। तत्र मृते जाते जातमृते वा सपिंडानां जन्मनिमित्तं संपूर्णाशौचं भवत्ये
व। यथाह हारीतः। जातमृते मृतजाते सपिंडानां दशाहमाशौचं इति। दशाहमिति तत्र संपूर्णाशौचोपलक्षणार्थं यद्यपि मृते जाते कुलस्य सद्यः शौचमिति तु हरदत्तवचनं तत्तु शिशुमरणनिमित्ताशौचाभावप्रतिपादनपरं न प्र
सवदेहकस्य मरणनिमित्ताशौचमपि स्नानादपैति सपिंडानां न स्वरूपतस्तावत्। सद्यः शौचमिति मा— स्य शुद्धिविधानात्। नाभिच्छेदात्प्राक् मरणमात्रे संपूर्णसूतकं पित्रादीनां जन्मनिमित्तं त्रिरात्रं तथा च बृ
हन्मनुः। जीवं यातो यदि ततो मृतः सूतक एव तु। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकमिति तत्तदनंतरमेव नालिवर्धनात्तरमित्यर्थः। अत्राप्यग्निहोत्रार्थं सद्यः शौचमस्त्येव। अग्निहोत्रार्थं स्नानोपस्पर्शनात् सद्यः शौच
मिति संवर्तस्मरणात्। नाभिवर्धनात्तरकालं त्रिरात्रपरमेपि पित्रादीनां जननाशौचं संस्पर्शमिव तथा वृद्धमनुः। यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति जनननिमित्तमस्पृश्यत्वं
मातुर्दशाहादिकं पितुस्तु सचेलस्नानमात्रादस्पृश्यत्वमपगच्छतीति तथा च संवर्तः। जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते। माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः। अत्र पुत्रग्रहणमपत्यपरं। अतश्चापत्येपि समुत्पन्ने पितुः स्नानं सव
ति। यथागतक्षिप्रशंकायां सद्यः कालगमने स्नानमेवं जननेपि समानां पितुरपि स्नानादस्पृश्यत्वं निवृत्य निधानानामपिंडानामास्पृश्यत्वं नास्त्येव। आतानं तेषां स्नानमपि तथा चांगिराः। सूतिके सूतकावृद्धेः संस्पर्शो न निषिध्यते
रति। अहस्यार्थकार्येषु पैठीनसिर्विशेषमाह। सूतिकां पुत्रवतीं विंशतिरात्रेण कर्माणि कारयेत्। मासेन स्त्रीजननीमिति। षष्ठमषष्ठदशमदिवसेषु दानप्रतिग्रहाधिकारमाह व्यासः। सूतिकावासनिलया जन्मदा नाम देव
ताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता। प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि। हि यद्याज्ञवल्क्यः। न तत्र सर्वं प्रतिग्राह्यं... ततो माता हादिभिर्ध्यांश
यर्णावरे तु ग्रामा क्रीडया। रक्षणीया तथा षष्ठी निशा तत्र विशेषतः। रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः। पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः। रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतकमिति॥ इति जनना
शौचं॥ अथानुपनीताशौचं। तत्र नामकरणात् सद्यः शौचमेव। यथाह याज्ञवल्क्यः। आनामकरणात्सद्यः अर्वाक्... तिनामकरणानंतरं मन्युपादानं लेकल्पितं। तथा च मनुः। नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया। जा
तदंतस्य वा कुर्यान्नाम्नि वापि कृते सति। उदकक्रियेत्येतत्साहचर्यादग्निदानमपि लक्ष्यतीति तत्र नामक रणादूर्ध्वं दंतजननादर्वागग्निसंस्कारे च लोपि ज्ञातपिमातापित्रोस्त्रिरात्रं बालानामदंतजातानां त्रिरा
त्रेण शुद्धिरिति कश्यपस्मरणात्। तथा। विनिकादर्नि संबंधदंतुरूर्ध्वमदंतं यमहमिति त्र्यहं च वेनिकादितिवि त्व सोपादानाद्वा। एवमुपनयनपर्यंतं मातापित्रोस्त्रिरात्रमिवास्तरेषां सपिंडानां अग्निसंस्कारे कृते एकाह
आशौचं। अदंतजाते तनये शिशौ गर्भच्युते तथा। सपिंडानां तु सर्वेषामेकरात्रमशौचमिति स्मरणात्। स च संस्कारस्तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव चेति लौगाक्षिस्मरणात्। जातारणिश्चेद्भवति तदा तन्मथि
तानि ला तदत्ता त्वचनिविरूढा। लिकि कायेनादाह। अग्निसंस्कारानवे सद्यः शौचं स्यादंतजन्मनः सद्य इति याज्ञवल्क्यस्मरणात्। अग्निसंस्कारहितस्यापि तद्विज्ञेन चिवर्षस्य निखनन मेवाथ यथाह या
ल्यचेत् जनविवर्षं निखनेन्नद्रव्य संस्कृतनं। आस्मशानाद्नुव्रज्य इतरो ज्ञातिभिर्वृतः। इतरः पूर्वसिद्धिवर्षः। अत्र विशेषमाह। अनद्विवार्षिकं प्रेतं निदध्युर्बांधवा बहिः। अलंकृत्य शुचौ भूमावस्थि
संचयनादृते। इति। बहिर्ग्रामाद्बहिः। अस्थिसंचयनादृते। अस्थिसंचयनरहितायां भुवीत्यर्थः। अन्यो चेवं यथार्थमिति। अस्याग्निसंस्कारस्थिसंचयनं न कार्यमिति। एतदुपपत्तौ अस्थिसंचयनप्राप्तेरेवासावात्
उपपादितं चैतत्पंचमास्याः स्मिति राजादीकायांस्यबाधिन्यांयम। कनद्विवार्षिके प्रेते घृताक्ते निखने ह्युदि... प्रथमवर्षे अतद्वृद्धस्य वर्षप्रिय
चौत्तरं मृतस्य। अग्निसंस्कारे सत्यप्यकाहादं तज्जाते प्यत्तरं चूडैवही रात्रेणा शुद्धिरिति विष्णुस्मरणात्। प्रथमवर्ष चूडाकरणअग्निसंस्कारस्यपूजानंतरं नियतत्वात्त्रिरात्रमेव। अतएव वसिष्ठः। ऊनद्विवर्षे प्रेते
सपितने वा सपिंडानां त्रिरात्रमाह इति। वर्षत्रयादूर्ध्वं दंतजाते अग्निसंस्कारनियतमाह यथा च मा चावीं। नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रियेति मनुना त्रिवर्षन्यूनस्य संस्कारनिषेधेनात्रिवर्षस्यात्यन्नज्ञानात्।
अंगिरसा चन्यूनत्रिवर्षरूपकालापेक्षयाग्निसंस्कारनादित्वं ... तस्याविज्ञानतत्रिवर्षस्य तदूर्ध्वं तु नियमेन अग्निसंस्कारः... तिथि मेघ्यमलतदूर्ध्वं जातदंतस्य संस्थितं। दाहयित्वा तदाशौचं त्र्यहमा

मदनपा०

८५

×२६२

वरदिति वा स्त्रीणाम् नतचूडानां मृतौ सद्यः शौचं। अप्रत्तचूडायां तु सद्यः शौचमित्यापस्तंबस्मरणात्॥ तन्तचूडानामपि वाग्दानादर्वाङ्मृतावेकाहः। यदाह याज्ञवल्क्यः। अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति।
अदत्तां वाग्दानरहितां कन्यकां नासापिंड्यं पुरुषत्रयपर्यंतमेव। तथा च वसिष्ठः। असत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते इति। त्रिपुरुषानंतरं समानोदकाशौचं कल्प्यं। एतच्च बालेष्वेवं विषयमेवाविवाहे त्वन्यथा
तथैव वरस्यैव प्रतिपादितत्वात्। वाग्दानादूर्ध्वं विवाहसंस्कारात् प्राक् पतिकुलेपि पितृकुलेपि च त्रिरात्रं। यदाह मरीचिः। वारिपूर्वं प्रदत्ता तु या नैव प्रतिपादिता। असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति। या तु प्रतिपा
दिता वाग्दत्ता वारिपूर्वं नैव प्रतिपादितेत्यर्थः। उभयोः पतिपित्रोः पक्षयोः। विवाहानंतरं तु विष्णुः। संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदेकरात्रं त्रिरात्रं वेति। प्रसव एकरात्रं मरणे त्रिरा
त्रमिति विवेकः। एतच्च वयोविशेषरहितमाशौचं सर्ववर्णसाधारणं। तथा चांगिराः। अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः। त्रिरात्रं तु भवेच्छुद्धिरिति। व्याघ्रपादोपि। ऊनेवयसि सर्वेषामिति। यत्त्वंगिरसाभिहितं। विप्रे —
विनिर्वर्तितचूडे तु शुद्धिस्तु नैशिकी। द्वाहेन क्षत्रियस्य शुद्धिस्त्रिभिर्वैश्ये मृते तथा। तथान्यदापि तन्निवर्तितचूडके त्रिरात्राच्छुद्धिरिष्यते। निवृत्ते क्षत्रिये षड्भिर्विप्रे नवभिरुच्यते। शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पंचभिः। अत ऊर्ध्वं मृते
शूद्रे द्वादशाहाद्विधीयते। षड्वर्षांतमतीतायां शूद्रः सप्त्रियतयदि मासिकं तत्संवर्तांगिरसेनाभिहितमिति। षड्वर्षांतमतीतायामित्यनेन च हारीतवचनं विरुध्यते। आमौंजीबंधनाद्विप्रः क्षत्रियश्चाधनुर्ग्रहात्। आप्रतोद
ग्रहाद्वैश्यः शूद्रो वस्त्रग्रहणात्तथेति। मौंजीबंधनाद्यनंतरं मृतेऽप्याशौचनिमित्तं सचतीत्यर्थः। शूद्रो वस्त्रग्रहणयोग्यो द्वादशाद्वादिवर्षाद्वितीय एव न षड्वर्षाद्वितीय इति शूद्रस्य षड्वर्षानंतरं मासिकाशौचाल्लिखन
हादिरूपः शूद्रो वस्त्रग्रहणात्तथेति। मौंजीबंधनाद्यनंतरं मृतेऽप्याशौचनिमित्तं ... इत्यर्थः। शूद्रो वस्त्रग्रहणायोग्यो ... सर्ववर्णसाधारणमेवेति व्याख्यातं
मांगिरसं हारीतेन विरुध्यते। तस्मादकृतानामनुग्रहान्याय्यमिति मन्वाद्यनेकस्मृतिपर्यालोचनया द्विरूप धरेणैवं परमेश्वरतिथिविज्ञानेश्वर ... सर्ववर्णसाधारणमेवेति व्याख्यातं। पिंड ... विधीयते। जनन
अथ वा गिरसवचनस्यागवचनाद्विका शौचप्रतिपादकान्यनापद्विषयतया व्यवस्थापनीयानीति। अथ जननमरणाशौचे वर्णनियमेन कालनियमः। तत्र मनुः। दशाहं शावमाशौचं सपिंडेषु विधीयते। जनन
नेप्येवमेवस्यान्निपुणां शुद्धिमिच्छतामिति। महागुरुनिपाते ... आश्वलायननिको विशेषः। द्वादशरात्रं वा महागुरुषु दा नाध्ययने वर्जयेरन्निति। पुत्रा त्वाद्यसंस्कृत्य वेदार्थमाह त्रिसाहं वयो वेदवातिरामहागुरु। एतच्च वि
प्रविषयं। क्षत्रियादिविषये तु याज्ञवल्क्यः। क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तद् र्द्धं न्यायवर्तिनः इति। पाकयज्ञ ... इत्याद्यादिरहित शूद्रो न्यायवर्ती तस्य तदर्धं मासार्धं पाराशरोगिराः
व्यातातपौ वसिष्ठः। क्षत्रियस्य द्वादशाहेनैकादशाहेन पंचदशरात्रेण वा विशस्य मासदशाहेन विंशतिरात्रेण वा शूद्रस्य विंशतिरात्रेण सर्वेषां वर्णानां दशाहेन वस्तुतके मृतके च शुद्धिरित्युक्तं। तल्लोकसमाचारात् वादना
दरणीयमिति केचन मन्यंते। अथवादे चावारतो व्यवस्था विज्ञेया। उत्तमगुणवद्गुणवद्भिन्नविषयत्वेन संन्यूनाधिककल्पाश्रयेणेत्यनिवार्यः। किं वा आपदनापद्भेदेन व्यवस्था। एतच्च जननेन मरणे ज्ञातमेव। शुचिलापादके दशाहादिकं
लनियमः। स्वयमन्त्यादि शक्तस्य च वाग्मितंत्रविदेवात्स्वं शृणुयादिद्युपादानाच्छूयमाणमेव निमित्तमिति गम्यते। यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेदिति। मनुस्मरणात्। अत्र शृणुयादित्युपादानाच्छ्रुयमाणमेव निमित्तमिति गम्यते। यच्चेदं दशरात्रस्येत्यनेन चोक्तं तस्मादिप्रस
तीविदिति। मनुस्मरणात्। अत्र शृणुयादिद्युपादानाच्छ्रूयमाणमेव ... सपिंडानां शावसद्यः शौचं। तथा च याज्ञवल्क्यः
विधकालनियमो वगम्यते। तथा निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य शुद्धो भवति मानवः। आत्मत्यागिनां पाखंड्यादिप्रेतानां च संस्थिते तेषां सपिंडानां शावसद्यः शौचं। तथा च याज्ञवल्क्यः
हतानां नृपगो विप्रैरन्वक्षं चात्मघातिनां। अत्र च सद्यः शौचमित्यर्थः। नृपेण प्रमाददुष्टत्वेन चाहादिय मे वधो ... तस्य काहः। अत्र च गौतमः। गोब्राह्मणहतानामन्वक्षं राजक्रोधाच्चायुद्धे
हतानां च सद्यः शौचं ... कालांतरे हतस्यैकाहः। अत्र च गौतमः। ... तथा ह मनुः। उद्यतैराहवे शस्त्रैः क्षत्रधर्महत
स्य तद्धवस्य धर्मेण संग्रामे गणमेतस्य सद्यः शौचं। तथाह मनुः। ... अहेतुः एकरात्रमाशौचं क्षत्रधर्मेण संग्रामे ... स्य सद्यः शौचमिति। काहः ... षड्दशवादशाहस्य पक्षो मासस्य वा
यति क्रोधग्रहणं प्रमादव्यापादितनिरासार्थं। तथा ब्राह्मणार्थं विपन्नानां येषो जितस्य देहिया। आह च पिहतानां च एकरात्रमशौचं। ... हदेनेदवापद्यागृहस्तकस्ये सकेष्वोपन्यस्तः। सद्यः शौचमिति चे काह देवं ... तथा बृहस्पतिः। दशाहं शावमाशौचं सपिंडेषु विधीयते ... ह्विषयत्वेनापि वचनस्य चरिता
स्यवासद्यः संतिष्ठते यज्ञ तथा शौचमिति स्थितिः। यज्ञः पिंडदानादिरूपः। संतिष्ठते समाप्तो भवतीत्यर्थः। इदं चेन दत्तापद्यागृहस्तकेस्तकेष्वोपन्यस्ताः। सद्यः शौचमित्येकाहं ... विषयाः। तत्तस्मात् ... विषयत्वेनापि वचनस्य चरिता
मरणांतं तथा चान्यद् दयापदासु सूतका सूतकं चाहुराशौचोपलक्षणार्थं। अत्र सद्यः शौचादि मडहः पर्यंतिपरूपायाव— दीनां प्रक्विनाय त्रिविहिति। ताद्दशप्रतिग्रहान्मिहोनादिविषयं। ततस्मात् ... विषयत्वेनापि वचनस्य चरिता। नियाहा
मरणांतं ... अत्यंतास्वाप्यकृत्वाद्वा अन्नदत्वात् स्नात्वा द्विजः। एवंविधस्य विप्रस्य सर्वदा सूतकं सवेत्। व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा। क्रियाही
र्यावान्नदत्वा हादिकं पदास्तु ब्राह्मणादिवसे विषयाः। मरणांत विषयस्तु दक्षो नेवदंति। अस्नात्वाप्यकृत्वा चान्नदत्वा स्नात्वा द्विजः।

८५

नस्यमूर्खस्यस्त्रीजितस्यविक्षिप्ततः।व्यसनासक्तचित्तस्यपराधीनस्यमूर्खवत्।श्राद्धत्यागविहीनस्यतस्मातंसूतकंतथैव तु।आद्धत्यागःश्राद्धकरणं।एतच्चजननंमरणंरजोदर्शनंवापदद्याहारकालेएवनिष्पन्नंतदातद्दिनप्रत्यय
वेत्यपरः।प्रायुर्दयान्तूर्ध्वदिनप्रवृत्तेत्येवेतिद्वितीयः।यदाहकश्यपः।उदितेतुयदासूर्येनारीणांदृश्यतेरजः।जननंवाविपत्तिर्वायस्याहस्तस्यशर्वरी।अर्धरात्रावधिःकालःसूतकादौविधीयते।रात्रिंकुर्यात्त्रिभागंतुद्वौभागौपूर्व
एवउत्तमोश्वःप्रातःतेनयुज्यतेसूतंसूतकोरात्रावेवसमुत्पन्नेमृतेरजसिसूतकोपूर्वमेवदिनंग्राह्यंयावन्नाभ्युदितरविः।इतिअत्रदेशाचारंप्रमाणं।अत्रजननेपूर्वमेवकर्तव्यंनिहितासांप्रतमितिनत्रातिथीय
तातत्रमनुः।नविप्रंस्वेषुतिष्ठत्सुमृतंशूद्रेणहारयेत्।अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूषिता।स्वेषुतिष्ठत्सुमृतंविवक्षितार्थंअ– ग्याखादिदोषकथनात्।तथा।दक्षिणेनमृतंशूद्रंपुरद्वारेणनिर्हरेत्।प
श्चिमोत्तरपूर्वैस्तुयथायोगंद्विजातयः।यथायोगमितिविप्रादिक्रमेणेतिलोमक्रमेण।अतएवस्मात्तिप्रायप्रकटनार्थंप्रथमतः।स्वएवापासेत्रुवतेहारीतः।नग्रामाभिमुखंप्रेतंनिर्हरेयुः।याज्ञवल्क्यः।सद– –प
तस्त्रेदाहितासन्नाहनार्थवत्।उपेतः उपनीतः।स्मृत्यन्तरेवस्त्रद्वयग्रहणायोग्यकालीनउपनीतसदृशः।वस्त्रद्वयग्रहणंचाष्टवर्षादिषोडशवर्षमध्ये।आहिताग्निद
हवच्चन्याहाहादिकार्यं।तत्रायंविशेषः।अनुपनीतस्यलौकिकाग्निना।असमाहिताग्नेःस्वगृह्याग्निना।आहिताग्नेस्त्रेताग्निभिरिति।लौकिकाग्निश्चण्डालत्वादिव्यतिरिक्तः।चाण्डालाग्निरमेध्याग्निःसूतकं– चिकाहि
तु।पतिताग्निचिताग्निश्चनशिष्टग्रहणोचितेतिच्छन्दोगपरिशिष्टेविधिनाऽसौस्वर्गमुपलौकायस्वाहेतिऊरौर्घ्वेइत्युक्ताः।प्रचेताः।स्नातंप्रेतस्यपुत्राद्यैर्वस्त्राद्यैःपूजनंसतः।नग्नदेहंदहेन्नैवकिंचिद्देयंपरित्यजेत्।किंचिच्छ
बवस्त्रैकदेशंश्मशानवासिनेअर्थंपरित्यजेदित्यर्थः।निगमः।संध्यायांवातथारात्रौदाहःपाथेयकर्मचानव श्राद्धंचनोकुर्याद्द्वृतंनिःफलतांव्रजेत्।दाहानंतरंप्रचेताः।प्रेतस्यबांधवायथा।स्वमुदकमवतीर्यन
दृष्ट्वापुरुदकंतत्प्रतिपुरुषसव्ययज्ञोपवीतवामसोदक्षिणाभिमुखाब्राह्मणास्योदङ्मुखाःप्राङ्मु खाश्चराजन्यविशस्तथायारितिः।याज्ञवल्क्यः।सप्तमाद्दशमाद्वापिज्ञातयोभ्युपयन्त्यपःइति।अयनःआ
–वदह्यमानेनपितृदिङ्मुखाः।सप्तमदिवसाद्दशमदिवसाद्वाअर्वाक्ज्ञातयएकगोत्रसपिंडाः समानोदकाश्च।एतच्चविषमदिनेषुकार्यं।तथाचगोतमः।प्रथमतृतीयपंचमसप्तमनवमेषु
–दककर्म्मयतिवासिष्ठः।सद्यःत्रिरात्रंपाणिसंचउदकक्रियांकुर्वीरन्निति।उदकदानेसंख्यानियममाह।या ज्ञवल्क्यः।सकृत्प्रसिंचेदुदकंनामगोत्रेणवाग्यताः।नामगोत्रेणोपलक्षितमुदकं।नामगोत्रेसमुच्चा
र्यादकंसिंचेयुरित्यर्थः।प्रचेताः।त्रिःप्रसेकंकुर्युश्चतस्त्रिपक्षइति।तथा।दिनेदिनेजलांजलीन्दद्यात्सेतः कारणात्।नावद्दृश्चिकसंख्यायावत्पिंडःसमाप्यते।यावद्ग्रामपिंडःसमाप्यतइत्यर्थः।यमस्तुदि
नांतरमाह।सचैलस्नात्वाततःस्नाताःशुचिःप्रयतमानसः।पाषाणंततआदायविप्रेदद्याद्दशांजलीन्।द्वादशक्षत्रियेदद्याद्वैश्येपंचदशस्मृताः।त्रिंशच्छूद्रायदातव्यास्ततःसंप्रविशेद्गृहं।एतच्चोदकदानंमृतंमातामहंआ
चार्यंवाद्दिश्यनियमेनकार्यं।सखायादिषुसख्यामिच्छायांकार्यमसखायांन।यथाहयाज्ञवल्क्यः।एवंमातामहाचार्यप्रेतानामुदकंक्रिया।एवंअवकाशप्रकारेणनिषिद्धनेयेत्यर्थः।कामोदकंसखिप्रत्ताखस्रीयश्वशुरर्त्विजां।
कामोदकमित्युपादानादिदंसावकाशेदेवोनास्तीतिगम्यते।पिंडदानप्रकारमाहयाज्ञवल्क्यः।पिंडयज्ञावृतादेयंप्रेतायान्नंदिनत्रयं।जातमेकाहमाकाशेस्थाप्यंक्षीरंचमृन्मये।पिंडयज्ञावृत्ताइतिपिंडयज्ञक्रिययासव्य
नावीतत्वतिलदर्भादिसहितत्वरूपा।आकाशेशिक्यादौ।प्रचेताः।प्रेतान्नस्नायीच्चादकंस्थाप्यमिदंवेदमितिमन्त्रःक्षीरमिति।पिंडदानंचासंस्कृतानांस्थानेसंस्कृतानांतुकुशेषु।असंस्कृतानांभूमौपिंडंदद्यात्संस्कृतानांकु
शेष्वितिप्रचेताःस्मरणात्।पाषाणेपिमृतपिंडोदेयः।तथाचशंखः।तस्मैमात्यंपिंडंपानीयमुपलेखादद्युरिति।याज्ञवल्क्येनपिंडत्रयमेवात्रविहितं।विष्णुस्तुयावदशौचदिनानितावत्पिंडदानमाह।यावदशौचंतावत्प्रेत
स्योदकंपिंडंचदद्युरितिपारस्करः।प्रेतस्यसर्वकर्मस्त्यःपिंडान्दद्युर्दशैवतु।एवंपिंडोदकदानेगुरुलघुकल्पावाम्नातौ।नत्रयद्यप्यन्यतरपक्षानुष्ठानेपित्राथसिद्धिःतथापिगुरुकल्पप्रेतोपकारातिशयत्वान्न्याय्यः।
अन्यथात्वकृतरपक्षानुष्ठानानुपपत्तेः।एवंदत्तस्यपिंडस्यप्रतिपत्तिकमाहहरप्रचेताः।वाग्यताःप्रयताश्चैवतिष्ठेयुःपिंडसंनिधौ।नातोबाष्पंनिरस्येयुर्नहास्यंउपक्षिपेच्चतंइति।नद्यांनावेप्रशस्तोदकाशयेप्रक्षिपे
त्।यत्रवाशौचस्यन्हासस्तत्रापिदशपिंडादातव्याः।आशौचस्यन्हासेपिपिंडान्दद्याद्दशैवहिविशेषेणपरस्मरणात्।तथा।त्रिरात्रेणाशौचेपारस्करः।प्रथमेदिवसेदद्यात्त्रयःपिंडाःसमाहिताः।द्वितीयेचतुरोदद्यात्

ग

मदनपा०

४९

अस्थिसंचयनं तथा। पिंडद्रव्यादिनियममाह। स्मृत्यंतरे। फलमूलैश्च पयसा शाकेन च गुडेन च। तिलमिश्रं तु दर्भेण पिंडं दद्यात्ताहरेत्। द्वारदेशे प्रदातव्योदवनायतनेषु च। तूष्णीमेव तु कर्त्तव्यः धूपदीपं तथैव
च। शालिना सक्तुभिर्वापि — र्ष्णिवा निर्वपेत्। प्रथमेऽहनि यं दद्यात् तेन देवस्यादशाहिकमिति। कर्तृनियमोऽप्यपरिशिष्टे। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्
तु दशाहपर्यंतमवार्यं नियमः। अत एव तन्मध्ये दर्शान्तरच्छिन्नसन्निहितसपिंडपुत्राद्यागमनेऽपि प्रथमदिवसोपक्रांततत्तद्दशापिंडादानं पुत्रादिभिः सन्निहितैरपि दशाहानंतरं श्राद्धमेकादशाहा
दिकं सन्निहितसपिंडेन पुत्रादिना वा कार्यं। पुत्राद्यागमे तु प्रथमप्रक्रांतत्वे वा सपिंडीकरणं तु विशेषः। ससगोत्र एवेति के च स्मृता उदकदानं तु सर्वैः सपिंडादिभिः कार्यं पिंडदानं चैकमेव पुत्रादिना।
पुत्रवत्तु वे चितराजुमहत्यो ज्येष्ठो पीत्र्यादिदोषरहितेन। अनेनैवासिष्ठेयेन मरीचिः। सावित्रमतं तथा ज्येष्ठेन वा यत्कृतं द्रव्येण वा वित्तकेन सा वित्तवत्सवं तत्वेदिति। अवित्तकं तु द्रव्यमवित्तकाम
वा वित्तको ऽप्यव्ययस — दयास्यादनर्के चिकित्सितो धर्मादिहिकोपयुक्तं मुख्य तज्येष्ठाय निवेदयेत्। तदावतद्रव्यमवित्तकमिव नीतिद्रव्येण वा वित्तके नेत्यस्मृ निर्बूहः। वित्तकेषु तद्वैसमीकरणे निकसा
र्द्धं च षोडशश्राद्धादावेवानसौवसरिकादौ पिंडदानादिष्वधिकारिक्रममाह शंखः। पितृपुत्रेण कर्त्तव्या पिंडदानादिकक्रिया। पुत्राभावे तु पत्न्या वा पत्न्यभावे तु सोदरः। गौतमः। पुत्राभावे सपिंडा मातृ
सपिंड शिष्याः प्रदद्युः तदभावे त्विगाचार्यौ। अत्र शंखवचनानुरोधेन पुत्राभावे पत्नी तदभावे सपिंडा इति क्रमः। पुत्राश्च बादरविधिश्च औरसादयः। अत एवौरसादिपुत्रपरिगणनानंतरं याज्ञवल्क्यः
पिंडदो — हेश्चैषां पूर्वाभावे परः परः इति। तत्रापि औरसाभावे पौत्रः तदभावे प्रपौत्रः तदभावे तु — कादिक्रमः। अत एव स्मृतिसंग्रहे। पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव चेति। ऋष्यशृंगः। पुत्रश्चैव सभी
नि पुत्रान्यो वै कारयेत्स्वधां। अनुकल्पाः पुत्रस्य आर्द्धं कार्यस्मिन्नास्तिकः। बौधायनः। अपुत्रस्य प्रिया — कार्या पिंडश्राद्धं तथोदकं क्रियालोपान कर्त्तव्यः प्रेतस्य गतिर्भोक्ष्यति। यदात्वनुपनीतः पुत्रः सं
त्रिपत्नी वा तदाग्निदानमेव समंत्रकं कार्यं। तथा च कात्यायनः। असंस्कृतेन पत्न्या च ह्यग्निदानं समंत्र — कं कर्तव्यमितरत्सर्वकारयेदन्यमेव हीति। अत्र विशेषमाह सुमंतुः। अनुपेतापि कुर्वीत मंत्र
त्येष्टताधिकं यद्यसौ तन चूडः स्याद्यदि स्याच्च त्रिवत्सरः। वर्षत्रयात्तनंतरं चूडा तावे विसर्वतोऽर्ध्वदेहिकं मंत्र — वत्कुर्यात्। वर्षत्रयादर्वाक् कृतचूडोऽपि शाब्लेत्तु सर्वमंत्रवत्कुर्यात्। यद्यशक्तो अथ्यातो तत्पूर्वात्तदा सि
दानं मंत्रवत्कुर्यादिति वा अस्थाः। शंखः। नार्यापिंडं पतिर्दद्यात् स्त्रीनार्यातिथैव च स्वस्रादेस्नुषायैव तदा — तावेत्सा सोदरः। नार्यापिंडः पित्रादिभ्रात्रादि तावे बीजिने क्षेत्रिणा विषये मरीचिः। स्वगोत्रे वाऽन्यगोत्रे वा या
तवेद्विधवासुतः पिंडं श्राद्धं विधानं च क्षेत्रिणोः प्राग्विनिर्दिपेत्। बीजिनेऽत ततः पश्चात्क्षेत्री जीवति केचित्तु बीजिने दद्युरा — वमृते पश्चात् स्त्रदीयते क्षेत्री यदि मृतोऽस्याता बीजिनादौ तदा दद्यात्तदर्हे विमपादोन दत्तं स्य
बीजिनेनोपतिष्ठते क्षेत्रिणे अदत्वा बीजिने दत्तं न बीजिनेनोपतिष्ठत इत्यर्थः। एतच्च विधवानियोगविधिना यत्र नियोगस्तद्विषयं। अनियोगस्थले तु नारदोक्तं द्रष्टव्यं जानीयच्च नियुक्ताश्याश्च केन बहुलिकाश्या। आरि
कृताजसोसर्व्व बीजिनामेव ते सुताः। दद्युस्ते बीजिने पिंडं माता चेत् शुक्लेनोह्तता। अशुक्लोपनतायां तु पिंडदावो — रेव त इति। पिंडदा बीजिसाविंड मात्रमेव तेषां न पिंडदानाद्यधिकारः। तत्सुता वा तु रेवदंते रणए वेत्यर्थः।
पिंडदावो तु रेव तस्य पिपासा। सापिंडस्य पि ब्रह्मचर्यादिभिः। पिंडोदकदानादिकं न कर्त्तव्यं। तथा च याज्ञवल्क्यः। न ब्रह्मचारिणा कार्यमुदकं पतितैन वा उदकमिति। पिंडदानस्याप्युपलक्षणं। ब्रह्मचारिणा उदकदानादि
निषेधे मातापित्रादिव्यतिरिक्तविषयः। तथा च स एव। आचार्यं पि — पाध्यायं गुरुं वा पितृमातरौ। सकुटुंबं च नात्मीयान्न चाले सह संवसन्। अतो ब्रह्मचारी ब्रजेत्तान् स्वब्रह्मचर्यव्रतमंत्रः स्यदर्थः। स ब्रह्मचारी कदाचना
शौचान्नं नाश्नीयात्। निर्हृत्य चैव न नदाहाद्यौ — र्ध्वदेहिकं सकलमपि लक्षते। मातादिव्यतिरिक्तविषयमनुः। आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात्। समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्। आदिष्टी ब्रह्मचारी
के च न प्रक्रांतप्रायश्चित्तः आदिष्टी तिमच्चत्वा। जनेसमाप्तेऽप्युदकं दत्वा दिनत्रयमशुचिः स्यादित्यर्थः। वृद्धमनुः। क्लीबेष्वानोदकं कुर्युः स्तेनाव्रात्या विधर्मिणः। गर्भभर्तृद्रुहश्चैव सुरापाश्चैव योषितः। पूर्वोक्तब्रह्मचर्यादि
व्यतिरिक्तैरपि सपिंडैश्च न पाषंडाद्युद्दिशानोदकादि न कार्यं। तथा च याज्ञवल्क्यः। पाषंडानाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः। सुरापा आत्मत्यागिन्यो नाशौचोदकभाजनाः। — वबाह्यलिंगमात्रं पाषंडं अनाश्रि

य

४६

ना॥ अधिकारे सत्यप्याश्रमविशेषरहिताः स्त्रेना ब्राह्मणस्वर्णव्यतिरिक्तो न मनुष्यमहाविपत्ताः॥ पार्श्वआदिमरणस्याशौचादिनिमित्तत्वासावात्तन्मरणे सति सपिंडैस्तु उदकादिकं नाकर्तव्यमित्यर्थः॥ सुरापाद्या
दिषु लिंगम — वह्नितमुद्दिश्य गतत्वात्॥ आत्मन्याद्विषु विशेषमाह गौतमः॥ प्रायो कवास्त्राभिविषोदकोर्ध्वबन्धनप्रपतनैश्चेच्छतामिति॥ प्रायो महाप्रस्थानं॥ अनाशकमनशनं॥ प्रपतनं पर्वतशिखरादधःप
तनः॥ इत्यादिनिमित्तैः॥ शास्त्रानिरुतमार्गेणेच्छापूर्वकमृतानामाशौचादिकं न कर्तव्यमित्यर्थः॥ अंगिराः॥ चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि॥ दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां॥ उदकं पिंडदानं च श्राद्ध
ते येषु प्रदीयते॥ नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति॥ मनुः॥ वृथा संकरजातानां प्रव्रज्यासु च तिष्ठतां॥ आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया॥ वृथा संकरजातानां इति वृथा जाताः॥ पंचमहायज्ञादि
रहिताः॥ संकरजाताः प्रतिलोमजाः॥ प्रमादादस्त्वाविज्ञाननिमित्तैर्मरणं विद्यते सर्वाशौचादिकं॥ अत एवांगिराः॥ अथ काश्चित्प्रमादेन म्रियेतास्यूदकादिभिः॥ तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया॥ चंडालादिमृत
हिताग्नेरप्यादीनां प्रतिपत्तिश्च कर्मस्मृत्यंतरेऽभिहिता॥ वितानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे॥ पात्राणि तु दहेदग्नौ यजमाने वृथामृते॥ वृथामृत अविहितमार्गमृतः॥ आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया॥ तेषामपि
तथा गंगातोये संस्थापनं मतं॥ गंगादिष्वप्यनघूपलक्षणं॥ एवं च लोके निंदितमरणमृतानां स्नेहादिका न ... दैहिककारणे स्मृत्यंतरे प्रायश्चित्तमाम्नातं॥ तथाग्निमुदकं वा न स्पृशेन्न वहनं कथा॥ रज्जुच्छेदाश्रुपातं च त
प्रसक्तेः एतच्चबुद्धिपूर्वं प्रचेतोकाग्न्यादिकरणे॥ अबुद्धिपूर्वी वकुसंवर्तः॥ एषामन्यतमं प्रेतं यो वहेत दहेत वा॥ कटोदकक्रियां कृत्वा कृच्छ्रं सांतपनं चरेत्॥ यद्वा तु मन्वादि तिर्मासिंत्तै॥ दारास्त्रिषवणं वा तथा॥ एकरा
त्रोजनादिकं चाभिहितं॥ तदशक्तविषये देशकालाद्यनुसारेण योजनीयं॥ यस्तु दुष्टादिलुप्ततिथिक्रियस्तु स्यात्महननमप्यनुज्ञातमादिपुराणादिषु॥ दृढशौचस्तु तद्धर्म प्रख्यातस्तिषक्रिया॥ आत्मानं घात
येद्यस्तु स्वयमपनयनो वृत्तिः॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः॥ तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमा चरेत् तथा॥ गच्छेत्स्वयथा पथं वा पिंडपार गिरिमादरात्॥ प्रयागवटशाखायां देहत्यागं करोति वा॥ स्वयं देहवि
नाशस्य काले प्राप्ते महामतिः॥ उत्तमान्स लभेल्लोकान्नात्मघाती भवेत्क्वचित्॥ एतेषामधिकारस्तु सर्वेषां स वर्जं तु स्त्रीनराणामथवा नारीणां सर्ववर्णेषु सर्वदा॥ अशौचं स्याद्दहेत्तेषां वह्नानलद तत्पुत्रो वाराणस्यां म्रि
पृथक्पाकाद्यसंभवे संभूय श्राद्धसामग्रीसंपादनेन यच्छ्राद्धं क्रियते तद्गोष्ठीश्राद्धमिति ॥ निषेककाल इत्यादि ॥ एतच्च श्रौतस्मार्तकर्मोपलक्षणं ॥ एतच्च वृद्धिश्राद्धवत्कर्तव्यं ॥ कर्मांगं वृद्धिवत्कुलमिति पारस्करोऽपि विभ्र
ना तु कर्मांगसंज्ञा करणमकरणे कर्मवैगुण्यप्रयोजनार्थं ॥ दैविकं तु नित्यश्राद्धवत्कुर्यात् ॥ अतएव दैविकमियत्तु दृष्टोपारस्कर: ॥ तन्नित्यश्राद्धवत्कुर्याद्धि दत्तपादिषु यत्नत: इति ॥ गच्छन्देशान्तरमिति ॥ तीर्थयात्रार्थं दे
शांतरगमने समयेयात्रां स्तत्र पुनर्गृहप्रवेशे चेति ज्ञेयं ॥ सर्पिषा सपिंडप्रधानके नैव ॥ तथा शरीरोपचये शरीरावयवविशिष्टरसायनादिप्रयोगकाले ॥ ॥ अथाधिकारिण: ॥ तत्र श्रौत: स्मार्तश्च केन चाधिकारिणो निरूपिता: ॥
सांप्रतं केषांचित्कर्मविशेषेषु तत्प्रायस्यापनादि प्रयोगकाले ॥ ॥ अथाधिकारिण: ॥ तत्र श्रौत: स्मार्तश्च केन वाधिकारिण: ॥ तथा चि वोहरा: क्रिया: ॥ विज्ञकारा: ॥ क्रियाहेतवस्तस्मान्नेतद्गुणधर्मे ॥ अग्राह्यहावदग्राह्यं च मधेयास्युर्नि
यामता: ॥ प्रवसितामध्यमामासिमास्येकोद्दिष्टसंज्ञितं प्रेतत्वमापन्ने सपिंडीकरणाद्धत: क्रियते तया ॥ क्रिया: पित्र्या: ज्ञो व्यालतान्स्पोतरा: ॥ पितृमातृसपिंडेषु समानसलिलेषु च ॥ तत्संघातगतेषु वै राज्ञा वा धनहारिणा ॥ सर्वा:

^ ता० १

क्रियामध्यमा श्राद्धेन्द्रवौ वरा॥ द्वौ द्विर्विर्वनिरश्रेष्ठकार्या सा नूयनेन स्थितिः॥ संक्रियामध्यमा श्राद्धे कर्तव्या इति पार्थः॥ पुत्राद्यैर्नास्ति संनवेः॥ पुत्रः पौत्रः प्रपौत्रो वा बालरूपा आत्ससंततिरिति॥ तेनैवोक्तत्वात्॥ दौहित्रि द्वारा विषय

सुरूपो विशेषः॥ यथा ब्रतस्थो पितृसुतः पितृः कुर्यात् क्रियान्नृप॥ ऋद्धकाद्या महाब्राह्मो दौहित्रो पितृणामदिति॥ एवं च सारु च ब्रह्मचारिणः उदकदानादिकर्तव्याधिर्विनो नास्ति॥ तत्र ब्रतलोपो स्वती तिगम्यते॥ मातामहश्राद्धादिकारेषु

लक्ष्यः॥ मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः॥ तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनवः॥ पितृवच्छ्राद्धं पार्वणं तथा॥ पितृराय त्रस्त्वं ततत्र मातामहोऽपि वा॥ अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्॥ सर्वत्र पितृश्राद्धे मातामह श्रा

द्धमपि कर्तव्यमिति यावत्॥ अत्र च कः खिदपवादमाह कात्यायनः॥ कर्षूसमन्वितं मुक्त्वा तथान्यच्छ्राद्धषोडशम्॥ प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिः॥ कर्षूसमन्वितं सपिंडीकरणं॥ अयं च विवेकः॥ यस्तु धनहारी दौहित्रः सन स्वश्रा

द्धादिकमपि कुर्यात्॥ तत्र मातामहश्राद्धकरणे प्रत्यवेतिनं तु सपिंडीकरणादावेवेति॥ अथामश्राद्धाधिकारिणः॥ तत्र कात्यायनः॥॥ आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि॥ आमश्राद्धं प्रकुर्वीत भार्या रजस्वला क्रमे॥ यस्य यज

मानस्य भार्या ऋतुमतीति तत्र पाककर्तृत्वाभावे निद्यानैमित्तिकश्राद्धेषु मासिकसांवत्सरिकव्यतिरिक्तेषु यजमान आमश्राद्धाधिकारी॥ स वतीत्यर्थः॥ यद्यपि परक्रमधत्ते प्रतिपादितमन्यत्समदितएव श्राद्धं क्रियते तन्निय

वाम्यच्चेनोक्तया तत्कृतं तथासतितत् केवलं नित्यत्वबुध्याद्वयेन॥ अथवा यजमानभार्या रजस्वला तस्य वदिनां नरो ब्राह्मणाद्यसंसवः॥ पाकेकर्तृत्वासंभवश्च तदामावास्याश्राद्धवदेवामान्नेन कुर्यात्॥ अन्यकाम

नयोक्तं च पतेतत्रायदा त्वकुर्यात्तदा कुर्यादिति श्रा॥ यं तु व्ययपाकान्निष्पत्तौ पंचमहादिकं कर्तव्यं॥ एवं सकलपरश्राद्धं पवस्यादि विहितयं॥ बौधायनः॥ संक्रमे द्विजातीनां प्रवासे पुत्रजन्मनि॥ हेमश्राद्धं संग्रहे च द्विजः शूद्र

नभ्या॥ पत्नी नाम दावा

सम्यग्वरेत्॥ आमतावेदेम श्राद्धं संक्रमग्रहणयोस्तु आमहेमश्राद्धं पाकासंनवे ब्राह्मणासंनवे वा सवति॥ अ॥ चशिष्टाचारः प्रमाणं एवं तीर्थ श्राद्धं च सुमंतुः॥ पाकालावेधिकारः स्याद्द्विजादीनां नराधिप॥ अन्यत्कार्यं नरा

लावा

ला॥ आपद्यनग्नौ तीर्थे च प्रवासे पत्न्याः संनवे॥ चंद्रसूर्यग्रहे चैव दद्यात् तं विशेषतः॥ जमदग्निः॥ यावत्स्यान्ना॥ अ

ह्याविदेत्रगेमनादित्तिः॥ सदा चैव तु शूद्राणां आमश्राद्धं विदुर्बुधाः॥ आत्मनो देशकालात्यया विशेषे समुपागता॥ आपद्यनग्नौ तीर्थे च प्रवासे पत्न्याः संनवे॥ चंद्रसूर्यग्रहे चैव दद्यादामं विशेषतः॥ मासिकपक्षे दर्शपक्षान्नेनैव

संयुक्तं गच्छिन्नासिरथापि वा॥ आमश्राद्धं तथा कुर्याद्विधिना पार्वणेन तु॥ स्वपचः स्वयं पचः॥ द्विजः॥ श्राद्धवि॥ द्विजातीनां मामश्राद्धं प्रकीर्तितं॥ अमावास्यादि नियमं मास संवत्सराहते॥ मासिकमाद्यं च एवं

ध्वं चतुर्गुणं॥ यानि चदेवगुण्य विधायकानि वचनानि तानि वा द्विगुण्यदानशक्तौ वेदितव्यानि॥ या चतुर्गुणं पंच

कर्तव्यमिति नियमः॥ शूद्रस्य सर्वमामान्नमेव वा आमश्राद्धे विशेषमाह व्यासः॥ आमं दद्यात् कौतपं दद्या द यस्य ताय द्याद्व द्विजातिस्यः श्रितं वाश्रितमेव वा॥ पिंडदानं न वतीति शेषः॥ आमद्रव्यं गृहपाकसकुपायसे

पुरुषाहाराविहितव्याः॥ तथा॥ सिद्धान्नेतु विधिर्यस्मादामश्राद्धे प्यसौ विधिः॥ आवाहनादि सर्वं स्यात्पिंडदानं च सारतीय घाश्च द्विजातिभ्यः श्रितं वाश्रितमेव वा॥ अतएव मरीचिः॥ आवाहने स्वधाकारे मंत्रा

यथालं तं व्यवस्था॥ एतद्यामश्राद्धं हेमश्राद्धं च पार्वणश्राद्धाधिकारिणा पार्वणवदेव कर्तव्यं॥ यद्वा गंसारुनिषिद्धं यस्तु तत्प्रयोजनं तं निवर्तते॥ कस्तु विनं वेषु हो न पिनवति॥ अतएव मरीचिः॥ आवाहने स्वधाकारेन मोवः

जुहाविमौ तर्नि॥ अन्यत्कर्मप्यन्नह्या सु रामश्राद्धविधिस्मृतः॥ अयमर्थः॥ आवाहने आवाहनमंत्रे उशन्तस्त्वा आवह पितॄन् हविषे अत्तवे इत्यत्र अत्तवे इति पदस्थाने स्वीकर्तवा इति पदस्योहः कर्तव्यः॥ स्वधाकारे नमोवः

पितरइत्यादिमंत्रे अस्मद्यत इति पदस्थाने आमद्य इति पदस्योहः॥ विसर्जनमंत्रे वाजे वाजेवते तिमंत्रे रसायात पथिभिर्देवयानैरित्यत्र रसाइति पदगतनप्रत्ययस्थाने लोट् प्रत्ययोहे नत्वपंतऽयूहः कार्यः॥ अन्यकर्म

णि विष्णोहव्यं रक्षस्वेत्यादौ नेहऽइति॥॥ अथ श्राद्धदेशः॥ तत्र मनुः॥ शुचिं देशं विविक्तं च गोमयेनोपलेपयेत्॥ दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत्॥ स्वतः शुचितीर्थदेवभूम्युदकादि सर्पणयोग्यं कुर्यादित्यर्थः॥ यत्तु रोरवे न इति म

त्विनिषेधः स तु गोगजाश्वादि दृष्टेषु कृत्रिमायां तथा भुवि॥ न कुर्याच्छ्राद्धमेतेषु पारक्यासु च भूमिषु इति॥ अयं च निषेधश्च न तीसनवेदिकादिविषयः॥ विष्णुधर्मोत्तरे दक्षिणाप्रवणो देशं तीर्थादौ वा गृहेपि वा॥ भूसंस्कारादिसंयुक्ते श्राद्धं

यत्तियत्नतः॥ तीर्थमृषिसेवितं सलिलं॥ आदिशब्दो सृषिसेविताश्रमादिपरः॥ यमः॥ परकीयप्रदेशेषु पितॄणां निर्वपेत्तु यः॥ तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते॥ परकीयप्रदेशः परपरिगृहीतगृहानदीतीर्थादयः॥ तत्पापस्वामिकं दे

नसर्वस्याधारणात्॥ तथा च पुराणे स्मर्यते॥ अटवीपर्वताः पुण्या नदीतीराणि यानि च॥ सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रहः॥ वनानि गिरयो नद्यस्तीर्थान्यायतनानि वा॥ देवखाताश्च गर्ताश्च न स्वामी तेषु विद्यत इति॥ आयतनानि देवादिसे

वितानि गर्तऽपरत्र विमाः॥ विशेषाणां उत्पत्ययोन्यादयः॥ यमः॥ कृष्णं च मिहतं जीर्णं संकीर्णं निष्टगंधकं॥ देशं त्वनिष्टसंश्रवं यत्नेन वर्जयेच्छ्राद्धकर्मणि॥ अग्निदग्धमस्निग्धं वृक्षकृतं कर्दमसहितं जीर्णं॥ नाशदानुपयुक्तवस्त्वंतरेण संकीर्णं प्र

×गृहमध्ये चांवाद्यकृताशुचिपरिहारार्थं विविक्तं दोषादिरहितं तं गोमयेनोपलेपयेत्॥ तं देशं गुदनादिनिः दक्षिणाप्रवणं दक्षिणादिशं॥×पं×

निगंधकमनिष्टगंधकं । अत्र च वर्ज्येष्वपि तमनिष्टगंधं वर्ज्यं । काम्यदेशानाह शंखः । वाराणस्यां कुरुक्षेत्रे भृगुतुंगे हिमालये । नर्मदाबाहुदातीरे सर्वमानं च यद्भवेत् । गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा । सन्निहत्यां गयायां च दत्तमक्ष
यतां व्रजेत् । अन्येपि काम्यदेशाः स्मृतिपुराणेभ्यो विज्ञेयाः । विस्तरभयान्नेह प्रदर्शिताः ॥ ॥ अथ श्राद्धकालाः । तत्र याज्ञवल्क्यः । अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयं । द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः । व्यतीपातो गजच्छाया ग्रहणं
चंद्रसूर्ययोः । श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिताः । अमावास्या कृष्णपक्षपंचदशी तिथिः । अष्टका आश्वलायनोक्ताः । हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति । विष्णुस्तु त्रयमेवाह । अमावास्यास्तिस्रो
ष्टकास्तिस्रोऽन्वष्टका माघी प्रोष्ठपद्यूर्ध्वं कृष्णत्रयोदशी व्रीहियवपाकौ चेति । एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः । विष्णुस्मृतेरेव पाठांतरं । अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकास्तिस्रः सर्वेषु प्रोष्ठपद्यूर्ध्वं कृष्णपक्षे सीमाघ
देहेमंतशिशिरापरपक्षेषु त्रयोदशी व्रीहियवपाक इति । केचित्तु इह विष्णुवचनं मन्यंते । माघपौर्णमासी प्रोष्ठपद्यूर्ध्वं कृष्णत्रयोदशी माघत्रयोदशी तद्वद् विष्णुवाक्ये पित्र्यो दशी व वायुपुराणे पित्र्यदानाय मूलेषुर
ष्टकासु च सर्वदा । तत्र पक्षे वरिष्ठा हि सर्वा विंशतितास्तु ते । प्राजापत्या द्वितीया स्यात्तृतीया वैश्वदेविकी । आद्या पूपैः सदा कार्या मांसैरन्या तु वै तथा । शाकैः कार्या तृतीया स्यादेवं द्रव्यगतो विधिः । पित्र्यदानाय मूलेषु रिति । मूले प्रथम
नच्छान मिच्छार्थः । ब्रह्मपुराणे । ऐंद्र्यां तु प्रथमायां च शाकैः संतर्पयेत्पितॄन् । प्राजापत्यं द्वितीयायां मांसैः शुद्धैस्तु तर्पयेत् । शुद्धैः प्रयत्नतः । विश्वेदेवांस्तृतीयायां अपूपैश्च यथाक्रमं । वर्षाकृष्णमघोत्राके तु वृद्ध्यर्थामवसर्वदा । अत्र शाकादीनां
विकल्पः स्वस्वाचारानुसाराद्द्रष्टव्यः । वृद्धिः पुत्रजन्मादिः । कृष्णपक्षः प्रसिद्धः । तस्य च श्राद्धकालत्वं प्रतिपदः पराह्णधारेण । अयनद्वयं दक्षिणोत्तरात्मकं । द्रव्यं श्राद्धार्हं तस्य प्राप्तिर्यस्मिन्काले तथा पंक्तिपावनस्य ब्राह्मणस्य संपत्तिर्लाभोऽयम
स श्राद्धकालः । विषुवन्मेषतुलयोः सूर्यसंक्रमः । सूर्यस्य राशेः राश्यंतरगमनं । संक्रांतिग्रहणेनैवायनविषुवतोर्ग्र हणे सिद्धे पुनरुपादानं फलाधिक्यद्योतनार्थं । व्यतीपातो योगविशेषः पारिभाषिकी च । तथा च वृद्धमनुः । श्रवणाश्वि
धनिष्ठार्द्रानागदैवतमस्तके । यद्यमा रविवारेण व्यतीपातः स उच्यते । नागदैवतमश्लेषा सर्वत्र मस्तके इ तिर्मंबध्यतेऽमस्तके । प्रथमपादे यदि इत्याद्यर्थः । यद्वा मघाकर्कगे रवौ । गजच्छाया । तथा च श्रुतिका वकी । एत
द्धि देवपितॄणां चायनं । यच्च सिंहछाया । पारिभाषिकी च । तथा च स्मर्यते । यदेंदुः पितृदैवत्ये हंसश्चैव करे स्थितः । ति थिर्वैश्रवणी या च गजच्छायेति सा स्मृता । पितृदैवत्यं मघा । हंसः सूर्यः । करो हस्तनक्षत्रं । वैश्रवणी त्रयोदशी । ए
तत्त्रितयोगे गजच्छायास्थार्थः । ग्रहणमुपरागः । यदा कदाचिच्छ्राद्धं प्रति रुचिः प्रवर्तते तदापि श्राद्धकालः । चंद्राहश्च वि गादयोऽपि गृह्यंते । एते श्राद्धकालाः ॥ ॥ अथामावास्यादिश्राद्धानां वृद्धिश्राद्धव्यतिरिक्तानामपराह्णकालमा
ध्यतात् । अमावास्यायाश्चतुर्दशीप्रतिपद्विद्धे — श्राद्धमिच्छाकांक्षायामपराह्णव्यापित्वाव्यापित्वमुखेन श्राद्ध कालो निरूप्यते । तत्र च तदुपयोगित्वेन पक्षांतसंज्ञकं आधानकालः । अन्वाधानपिंडपितृयज्ञो दर्शश्राद्धमित्येतत्
त्रितयं वाजसनेयिव्यतिरिक्तानामेकस्मिन्नेवाह्नि दिने कर्तव्यमिति तत्प्रथममुपपादयामः । तत्र पर्वकालनिर्णयः । पर्वद्वयं पौर्णमासी च । अस्मिंश्च प्रकरणे मध्याह्नश्चाह आपो विविधा वितस्तकस्य मध्याह्नापरतः । तदेवावर्तनमित्युच्यते
पूर्वाह्णापराह्णा शाखा वपि विभक्ता वितस्तकस्य पूर्वापरौ सपरो । पूर्वप्रतिपदोः संधिर्मध्याह्नोत्तरः साद्यात् वेत् तदा संधिदिने यागः । न तत्पूर्वदिने आधानं ॥ ॥ यदाह गोभिलः । आवर्तनात्तु यदा संधिः पर्वप्रतिपदोर्भवेत् । तदहर्यागः इष्येत परत
श्चेत्परेतरः । संधिरिति ध्वहनि पर्वप्रतिपदोः संधिः रविगावर्तनाद्यदि तस्मिन्नहनि यष्टव्यं पूर्वेद्युः स्यादुपक्रमः । उपक्रम आधानं । यत्र दा मध्याह्नात्परतः संधिस्तथा संधिदिने आधानं परेद्युरिष्टिः । तथा च गोभिलः । आवर्तनात्पर
संधिर्यदि तस्मिन्ननुपक्रमः । परेद्युरिष्टिरित्येष पर्वद्वयविनिर्णयः । मध्याह्नात्प्राक् प्रतिपर्वसंधौ अपि संधिदिने चाधाय परेद्युरिष्टिर्वाजसनेयवर्ज्यानां । यदाह लौगाक्षिः । अपराह्णे यथा सायं यदि पर्व समाप्यते । उपोष्य तस्मिन्नहनि
श्वोभूते यागः इष्यते । आवर्तनादधः संधिर्यदि चाधाय तद्दिने परेद्युरिष्टिरित्याज्ञविक्रावाजसनेयिनः । पर्वप्रतिपत्संधिपरिज्ञानोपायमाह कात्यायनः । परेहि घटिका न्यूना तथैवात्यधिकाप्यया । त्रिंशात्तदर्धं रविभिर्ह्रासवृद्धी प्रकल्पयेत्
तु लोकाग्निरपि । तिथेः परस्या घटिकास्तु याः स्युर्न्यूनास्तथा वा त्वधिकाश्च तासां । अर्धं वियोज्यं च तथा प्रयोज्यं प्रासे च तद्वे प्रथमे दिने स्यात् । परस्यास्तिथेः प्रतिपदः पूर्वतिथ्यपेक्षया न्यूना घटिका यदा स्युरधो अर्धं प्रथमदिनपर्व
वियोज्यं । अर्धं पर्वदिनादि द्वयोज्यं । अर्धाहानि पर्वदिने तेयेयर्थः । एवं वृद्धाविवर्धं योज्यं । एतदुक्तं भवति । सूर्योदयानंतरमाविन्यायाः पर्वप्रतिपच्च घटिकाः खाएव तत्र ह्यपि तत्रार्धं पूर्वदिने अर्धं परदिने वियोज्यमिति । यागकालमा
ह च्यानातपः । पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः । यदा मध्याह्नादूर्ध्वं संधिः तदा तस्मिन्दिने चाधाय परेद्युरिष्टौ क्रियमाणायां कदाचित्प्रतिपच्चतुर्थांशोऽपि यागकाले भवति । तदा च

५३

नृ२

यन्निरासवचनांतारनिषिद्धत्वात् कुथमित्याकांक्षायां शातातपः। संधिर्यद्यपराह्णे स्याद्यागः प्रातः परेद्युः इति। ऊर्वाणाः प्रतिपद्यागेव ङ्कर्थे नकुथतीति। अयमभिप्रायः। पर्वणाय श्चउ पेंशि आद्याः प्रतिपद्द्वयं। इय
क्तकालसंसत्वेनिषेधकु—श्चउर्थेसागो निषिध्यते उक्तकालासंसत्वयागविधानात् शीघ्रादिकालेचमध्याह्नास्यषेडश्चासन्नदशार्द्धात्मकत्वात्। अमावास्यासूर्योदयोर्ध्वा गेष्यारंनविधानात् इष्टेश्चाद्यामसाध्यत्वात्।
उपक्रांतस्य कर्मणो विधिमंतरेणामध्येमध्ये विरम्य व्यापारानुपपन्नेश्च इष्टिदर्शपूर्णमासाभ्यां नेष्याथ। प्रतिपद्यप्र—र्यायदि सेष्टिः समाप्यते पुनः प्रणीयत्वाच्छि इष्टिं कृत्वा यागविहारमिति वचनन विरोधः प्रसज्येत
ति चन्नुमिर्वा। यदा सूर्योदयात्प्रभृत्युक्तकालआरस्य विहितकर्मेष्टिः क्रियमाणायां इष्टिकालस्तसामध्य मध्ये प्रतिपदि विद्यमानायां मपिपादवाधिकावस्थात् अमावास्यामेवस्तद्विषय चादस्थवसनस्य। संधिरुस्त्यातायज
तथ्यादिनामपिवाक्यानामयमेव विषयः। इयं चोक्तविषये प्रतिपदीष्टिसमाप्तिराहितान्येरेवनानाहितान्नेः। तस्य उ स्थालीपाकएवनेष्टिः सूर्येसिस्वसूर्योदयानंतरमेवारंतणीयः। तथास्वल्पकालसाध्यस्वा प्रयोगत्वात् तावस्यय
स्त्रविधानान्मध्ये विरामासंसवः। विरामामंतरेण च प्रतिपदि समापयितुं न शक्यः। नत्र शक्यं विदधाति शास्त्रं तस्मात्प्रतिपद्युविविशिष्टायां यदि चेष्टिः समाप्यत इत्येतदनाहिताग्निविषयं नस्थातानि। पौर्णमास्यां उ विशेषमाह
कात्यायनः। संधिश्चेत्संगवाद्ध्यर्वमवुगार्ध्वं नाहवेतु साप्पौर्णमासी विज्ञेयासद्यस्कालविधौतिथिरिति। हत्तैवात्राथनंतत्रैवयागश्चर्थी। अमावास्यायां विशेषमाह वृद्धशातातपः। द्वितीयात्रिमूर्तानी वितु प्रतिपद्या
परान्हिकी। अन्वाधानं तच्चीर्णे शानोपवरुः स्यद्यागस्यचउरोवित्सिः। नावंरयावुसर्वद्वृच्छ्योयश्चदग्गीपरतः सोमदर्शनाद्दिति। एतदप्यावर्त्तातततः पूर्वनासंधौवच्चैवस्यपन्वाधानविषयं। पद्धलोकादिवचनं। त्रीनंदा
नोपवस्थस्ययागस्य चउरोवित्सिः। धावंरयावसर्वद्रोयागेवन्नतकर्मणीति। यागेप्रतिपदस्त्यास्त्वअन्वाधा नेचउदर्व्यग्यां शास्यवर्ज्यमुक्तं तत्र प्रतिपदश्चउर्थाशानिषेधस्य व्यवस्थामाह शिलावचउर्दश्यामु आव
त्तीनोत्तरकालं पर्वप्रतिपत्संधौनिषेधः। यदावाधानदिने प्रातर्विस्मरणादिनाद्याधानादिकं न करोतीति न दासमारापितान्निश्चेतुपुनरग्निमवरोप्यप्रत्यवास्निश्चेदग्निं विकृत्य तोजनान्वाकुअन्वाधानादिकं कुर्यात्।
तत्रापिसंसवेसायंप्रात्यप्रसंसवेयागदिने प्रातः। पयिशदर्शिच्चरुवारचासद्यः कालविधिनानुष्ठानं नास्तीर्लिंकविद्वविद्विवलाअनुष्ठानं। स्थलेतयंप्रवीनः एवविधि। एवं प्रकृतोयागकालोभिहितः। अ
प्यविकृतियागस्याविधीयते। यत्र संपूर्णैवपंचदशी प्रतिपच्चतत्रपरत्वान्वाधानादिनेविकृतियागं समापि प्यानंतरं प्रकातरन्वाधानादिकं कुर्यात्। यदीष्ट्याय दिपशुनाद्यदि सोमेन यजेतामावास्यायां पौर्णमास्यां वा
यजेतेत्यापस्तंबेन प्रकृतिकालप्रासोसत्यां अपिपुनरमावास्यादिकालविधानात्। यदामध्याह्नेततः पूर्वं वा पर्वसंधिर्दिने प्रकृतियागानंतरं विकृतियागं कुर्यात्। मध्याह्नादूर्ध्वं संधौ तत्र संधिदिने प्रकृतिरन्वाधानादि
कं विधाय प्रकृतियागंवततेव तथापरेद्युः प्रकृतियागः कर्तव्यः। तथा च कात्यायनः। आवर्तनात्प्राग्यदि पर्वसंधिः कुर्यात्तदा तस्मिन्प्रकृतिं विकृत्या तदेवयागं परतोयदिस्यात्तस्मिंश्चिकृत्यां प्रकृतिः परेद्युरिति। अथान्वा
धानपिंडपितृयज्ञदर्शश्राद्धानामेकदिनकर्तव्यतानामित्यर्थो निरूप्यते। तत्र लोगाक्षिः। पत्न्यंतकर्मनिर्वर्त्य वैश्वदेवं वसाग्निकः। पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः। पत्न्यंतकर्मान्वाधानं। पिंडयज्ञः। पिंडपितृ
यज्ञः। अन्वाहार्यकं दर्शश्राद्धं। तथा च स्मृत्यंतरमपि। पिंडयज्ञकृता देयं दर्शश्राद्धे पिंडानितिहितापन्तु। पितृयज्ञस्तु कालस्तु दर्शश्राद्धे तवेदितिमत्वरपि। पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्निमान्। पिंडान्वाहार्यकं श्राद्धं कु
र्यान्मासोमासिकं मासानुमासिकं प्रतिमासि सर्वं। अतएव नित्यं पिंडपितृयज्ञविषयत्वाना हिताग्नेरिच्छनेन नवाकेनाग्निरप्य तिदिशात्। अतश्राद्धेनाग्नेर्भृत्यान्निश्चयोरप्यान्वाधानपिंडपितृयज्ञदर्शश्राद्धानि
कर्त्याणि। तान्येकस्मिन्दिने पूर्वोक्तवचनवचनान्निष्पाद्यानीति सिद्धं। अथापराह्णकालः। द्विधात्रेधापंचधापंचदशधा वादिनस्याह्नोविभागं विभजेत्। स्कंदपुराणे। आवर्तनात्तु पूर्वाह्णोह्यपराह्णस्ततः परं। शातात
पः। पूर्वाह्णो मध्याह्नो ऽपराह्णः। पूर्वाह्णो देवानां मध्याह्नो मनुष्याणामपराह्णः पितृणामिति। व्यासः। मुहूर्तत्रितयं प्रातस्तावानेवतु संगवः। मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्ततः परः। सायाह्नस्त्रिमुहूर्तश्च सर्वकर्म
गर्हितः। व्यासः। रौद्रश्चैवश्च रुद्राध्या सारटवस्तथा। सावित्रश्च जयंतश्च गांधर्वः कुतपस्तथा। रोहिणस्तु विरंचश्च विजयोनिर्ऋतिस्तथा। महेंद्रो वरुणश्चैव सतांपंचदशास्मृताः। इति। अत्र द्विधाविभागः। शुक्लपक्षे पि
त्र्यकर्मदेविकं च ग्राह्यं। एतच्चशुक्लपक्षश्राद्धप्रकरणोस्फुटीभविष्यति। त्रेधाविभागेयम पराह्णः स्मृतः। श्राद्धादौ अयमप्यर्थ आह्निककालनिरूपणप्रकरणेज्ञास्यते। परिशेषात् पंचधाविभागः। पंचदशधा विभ

नु५

मदनपा०

५५४

गस्यामावास्याश्राद्धादिषु ग्राह्या ।। अथामावास्याश्राद्धे पूर्वोत्तरविद्धाग्रहणे निर्णयः ।। त्रिविधामावास्या ।। शुद्धा विद्धा चेति विद्धा तु चतुर्विधा । चतुर्दश्यामेवापराह्णसंविधान प्रतिपदीति प्रथमः । प्रतिपद्येवाप
राह्णिकी न चतुर्दश्यामिति द्वितीयः । उभयत्रापराह्णसंबन्ध इति तृतीयः । उभयत्रापराह्णासंबन्ध इति चतुर्थः । तत्र प्रथमायाम् असंशयः । यतो विद्धा चतुर्दश्यामेवापराह्णसंबन्धा न प्रतिपदि सा पूर्वविद्धा ग्राह्या सर्वैरपि । तथा
च जाबालिः । पूर्वाह्णिके दमावास्या नापराह्णे स वेद्यदि । भूतविद्धैव सा ग्राह्या पितृकार्येषु सर्वदा । पूर्वाह्णिके चेदमावास्या चेत्तत्र प्रतिपदीति शेषः ।। तथा । प्रतिपद्यप्यमावास्या पूर्वाह्णव्यापिनी यदा । भूतविद्धैव सा कार्या पि
त्र्ये कर्मणि सर्वदा । पूर्वाह्णव्यापिनी अपराह्णं न व्याप्नोतीत्यर्थः । अन्वाधानं पिंडपितृयज्ञोऽपि भूतविद्धायामेव द्वितीयानिश्चितैव प्रतिपद्यापराह्णिकी अन्वाधानं चतुर्दश्यामिति वृद्धशातातपस्मरणात् । अमावा
स्यायामपराह्णे पिंडपितृयज्ञं यजेतेति । अमावास्यासंबन्धापराह्णस्यैवाश्वलायनेन पिंडपितृयज्ञाङ्गविधानात् । तथा चापस्तंबः --- मावास्यायां यदहश्चन्द्रमसं न पश्यन्ति --- स्यापराह्णकाले पिंडपितृयज्ञं गा
न विक्षयाधिदृष्टसूर्येति कालांतरमपि विहित । अपराह्णानुसारेण श्राद्धकालनिर्णयः । कथमिति चेत् । उच्यते । साग्निकस्य जीवत्पितृकस्य देवातिं पिंडपितृयज्ञकाले अपराह्णे व्यतिक्रांते सदाधिदृष्टसूर्येऽपि काले
गमिति विधीयते इत्युक्तं चैतत् । साकवलं पिंडपितृयज्ञे विधीयते न दर्शश्राद्धे तस्मात्तस्य स कालः । प्रमतापितृकस्य दर्शश्राद्धेऽप्यधिकारे न च पिंडपितृयज्ञानंतरमेव तथा वाधिदृष्टसूर्येऽपि पिंडपितृयज्ञकारिणे संध्यायां रात्रौ
वा दर्शश्राद्धं प्रसज्येत न तच्चानिषिद्धं तस्मात्सार्वत्रिक एव विषयः स्वीकार्यः । यदा प्रतिपद्येवापराह्णिकी न चतुर्दश्यां तदा प्रतिपद्येव । यदाह हारीतः । अपराह्णः पितृणां तु यापराह्णानुव्यापिनी । सा ग्राह्या पितृकार्ये तु न
पूर्वाह्णव्यापिनी । बौधायनः । मध्याह्नात्परतो यत्र चतुर्दश्यप्रवर्तते । सिनीवाली तु सा ज्ञेया पितृकार्येषु ति ः फला । अन्ये च दिनमध्यभागे परो मध्याह्नः । मध्याह्नात्परतः सायंकालपर्यन्तः कालः प्रतिनिः दृष्ट
दामावास्यां मोहाद्ज्ञानतोऽपि वा । श्राद्धकर्मणि येऽकुर्युस्तेषामायुः प्रहीयते । मोहो विपरीतज्ञानं अप्रतीतिः । अत्रैव चान्वाधानं पिंडपितृयज्ञश्चायात्र उभयत्रापराह्णसंबन्धा सा त्रिप्रकारा । तिथेः क्षयोपेता वृद्ध्युपेता
साम्योपेता चेति । तत्र तिथिक्षयपक्षे मे पिंडपितृयज्ञाधिकारिणामाहिताग्नीनामौपासनाग्नीनां च तु त विद्धामाश्रित्य पक्षाधिकारित्वं नाग्नीनां तथा विधुराणां स्त्रीणां शूद्राणां च प्रतिपन्मिश्रिता । तथा च कात्या
यनः । सिनीवाली द्विजैर्ग्राह्या साग्निकैः पितृकर्मणि । स्त्रीभिः शूद्रैः कुहूर्ग्राह्या तथा चानग्निकैर्द्विजैः ।। साग्निरौपासनाग्निरपि तस्याः पिंडपितृयज्ञविधानात् । तस्य चापराह्णसाध्यत्वाच्च । तिथिक्षये अकरविद्ध
दर्शी त्रयीयामे दर्शघटिकाश्च --- दपराह्णेऽनंतरदिनापेक्षया पूर्वदिनाद्यधिकामावास्यासंस्पर्शादन्वा धानं विधाय पिंडपितृयज्ञानंतरमाहिताग्न्याहार्यकं भूतविद्धायामेव कर्तव्यं । अनेनैवाभिप्रायेण बौधायनः । चतुर्दशी
च त्रयी मि अमायत्र न दृश्यते । श्वो भूते प्रतिपद्यानु भूते क -- दिक्राः क्रियाः । इति । अयमर्थः । चतुर्दशी च त्रयीम् च चतुर्दश्यां उत्तरार्धं चतुर्थयामे अपराह्णस्पृष्टे अमागणि तेन न दृश्यते । अपि तु तिथिक्षये वशाद्दनुप्रविष्टा दृश्य
न इति ता --- श्वो भूते परेद्युरित्यपराह्णे यद्दृश्यते तत्र चतुर्दश्यामेवेति । अनग्निकाः उच्छिन्नाग्न्यादयः । लक्ष्मामन्वाधानं पिंडपितृयज्ञयोरधिकारास्तावात् कामेव श्राद्धं तिथिवृद्धिपक्षे मेमान्येव सर्वेषां परेवायदाह प्रचेत
। दृष्टं वा सिनीवाली नष्टेन्दुकला कुहूर्मता । सिनीवाली कुहू सैव मुख्यत्वात् पितृकर्मणि । स्यातां तेयद्भि मध्याह्नात् आरुह्य तत्र कथं न वचनात् तिथिवृद्धौ स यो सिनीवाली तिथि दृष्टे कुहूर्मता । साम्ये पियकुहूर्ज्ञेया वेदवेदांगवेदिनि । मध्याह्नात्
तं मध्याह्नादुपरि अपराह्णे सर्वेतामित्यर्थः । अत्रापि यत्रापराह्णे अधिकस्पर्शस्तत्रैव पिंडपितृयज्ञो दर्शश्राद्धं चान्वाधानस्यु पिंडपितृयज्ञ पूर्वसाक्ष्येन तत्रैव प्रातरन्वाधानं यदा त्वमपराह्णाधिकसंस्पर्शविशालापूर्वविद्धायां
पिंडपितृयज्ञं दर्शश्राद्धं प्राप्नोति । अथ चपर्वकालनिर्णय वशात् पिंडपितृयज्ञ दर्शश्राद्धे तत्रैवाचान्वाधानं बहूनामनुग्रहो न्यायः इति न्यायः इति व्याप्तेनानेकानुग्रहस्य न्याय्यत्वात् । तथा च पर्वद्वितीयांशे प्रतिपच्चतुर्थांशे ... पिय
गानुष्ठानप्रसंगे न विरोधः । एवं च पर्व द्वितीयांशेऽपि प्रतिपच्चतुर्थांशे यागनिषेधमकवलं नान्ये विद्धकल व्यतिरिक्तविषये युज्यानि । उभयत्रापराह्णसंबन्धिनीति तृतीयपक्षः । सा च सार्वेषां परैव तत्रापराह्णव्यापित्वेपि कुतप
कालसंबन्धित्वात् । तथा च हारीतः । स्वल्पविद्धाप्यमावास्या प्रतिपन्मिश्रिता पि वा । पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी । गौतमोऽपि । पूर्वाह्णे चेत्प्रतिपदो भूते या या समाप्यते । आरभ्य कुतपे श्राद्धं रौहिणं न विलंघयेत् । प्रति
पदि पूर्वाह्णे कुतपेनापराह्णे भूते सायंकाल एव नापराह्णे तदा प्रतिपदि कुतपकालसंबन्धित्वात् । तत्र कुतपे श्राद्धमारभ्य अयं विधिः रौहिणं न लंघयेत् इति तात्पर्यार्थः । कुतपः दशममास्याष्टमो मुहूर्तः । अपरत्व बहुप्रकारां

नरेणाह्नकृतपाद्यान्कृत्वा श्रीनुद्यदस्यरतितास्कर॥ सकालः कृतपक्षश्च पितॄणां दत्तमक्षयमिति। ननु पूर्वोक्तिष्वपि देशेष्वचनसूतविद्धापि पिंडपितृयज्ञादिष्वगृहीता सा लघुक्ता तत्र चंद्रादर्शनासंभवात् चंद्रदर्शनेपि पितृ
यज्ञा विहित आपस्तंबेन। अमावास्यायां यददृश्यः चंद्रमास्तं न पश्यंतीति तत्स्मात् अदर्शनं नाम कालः स्वयं चंद्रस्य न च कुष्मापारगोचरं। तथा सति द्वयाजकं प्रहरमात्रं चतुर्दशीव्याप्तावपि चंद्रस्य च कुगोचरत्वात् तत्र पिंड
पितृयज्ञादि न स्यात्। तथा चापराह्णे पिंडपितृयज्ञादिविधायकवाक्यविरोधः प्रसज्येत। अदर्शने श्राद्धं क्षयपरा। तथा च कात्यायनः। पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते इति। तस्यापि कदा तत्त्वतीय पक्षायां स एवा
द्य अष्टमे वा चतुर्दश्याः क्षीणे तत्र तिथिचंद्रमाः। अमावास्याष्टमे वा च यदि न किल तत्र---। सर्वे उदये प्रहरे वर्तिष्यते चतुर्थ नागेन कलाविशिष्टः। तदत्र एव क्षयमेति नास्ना----यत्र विदो वदंति। आग्रहायणीमार्गशी
र्ष अमावास्या आद्यप्रहरे अमायां। न दर्शन अमातो। अत्राक विदेवं वा स्पर्ययेति। आग्रहायणीज्येष्ठामावास्यायां परेद्यु अपराह्णव्यापित्वे सर्वपरेद्युरेव पितृयज्ञादिकमित्येतद्युक्तं। अपराह्णः पितॄणामिति श्रुत्या वि
रोधात्। तथा ऽमावास्यायामपराह्णे पिंडपितृयज्ञा आश्वलायनादिवचनान्यपि विशेषेण। श्वदिने चतुर्थ्यादिविरोधः। अथ च द्वयोपि संप्रश्नः किल्वो स्विच चतुर्थ नागेन कलाविशिष्टत्वात्। परं तु क्षयशास्त्रस्य संकोचम
प्रमेव वाक्यविरोधमपेक्ष्या च संकोचः श्रेयान्। इति दिग्ज्योतिःशास्त्रे आग्रहायण्या --- चंद्रक्षयप्रति विशेषोक्तिः किमर्थमिति चेत्। उच्यते। अन्यमासेषु द्वितीयायाम्--- दृतीयस्तु रूत्विरमनागे चंद्रदर्शनं तत्र तिमा
र्गशीर्षज्येष्ठयोस्तु न किंतु अमावास्याष्टमांशे क्षीणत्वा द्वितीया। आद्यतृतीयसु रूत्तनांतरं चतुर्थ पंचमादिष्वपि शुद्धं चंद्रदर्शनमित्येतत् प्रतिपदनार्थं ज्योतिःशास्त्रस्य कालग्रहवारादिविषयत्वात् आद्यकम वि
धिप्राधान्याभावात्। अयं च संगृहीतार्थः। यत्र पूर्वविद्वारीत्या भूतविद्धा श्राद्धादिकृत्याह्या न घाति रिक्तविषया ॥ भूतविद्धायामन्वाधानादि पिंडपितृयज्ञदर्शश्राद्धविधायकवाक्यानि। मन्वोक्तरीत्या प्रतिपन्मिश्रितायाम
न्वाधानादीनि तद्व्यतिरिक्तविषयाणि प्रतिपद्विद्धायाममावास्यायामन्वाधानादिनिषेधवाक्यानीति। यत्तु हारीतवचनं कन्यामकरमीनेषु तुलायां मकरे तथा। भूतविद्धैव सा वर्ज्या ह्यमा सत्वविफला इति त
द्विषयं। अतएवास्यां जाबालिः। तुलायां मकरे मीने कन्यायां मिथुने---। भूतविद्धा व्रते ग्राह्या। [...] तां त्वेव प्रतिपद्युतेति। अमावास्यायामिव अष्टकामन्वंतरयुगाद्यपरपक्षेपि श्राद्धकालनिर्णयो वि
ज्ञेयः। अत्र पिंडपितृयज्ञाः सावा कुतपएव श्राद्धस्याधिकम्। अमावास्यायां त्वपराह्णे पिंडपितृयज्ञानंत [...] रं दर्शश्राद्धीयानि स्वस्वकालपद्धश्राद्धानि पौर्णमास्यां वैशाखस्यतीयादिष्वविहितानि तानि तु कुतपक
ल प्राधान्येनानुष्ठेयानि। एतदुक्तं भवति। यथामावास्यायामपराह्णप्राधान्येन तिथेः क्षये पूर्वा वृद्धौ मा [...] स्येव परा। तत्राप्यल्पत्वमहत्वास्यां निर्णयः। एवं कुतपप्राधान्येन निर्णय इति। अन्ये तु वातिप्रायेणामार्कं दे
ये। अकोपदस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः। चरम पक्षे परान्हेतु रोहिणं न विलंघयेदिति। अत्र पूर्वाह्णशब्दो द्विभावित [...] स्यात्। पूर्वत्रागपरः। यद्यप्यत्र सामान्येन पूर्वाह्ण इत्युपात्तस्तथापि पित्र्ये कर्मणि विद्वद्भिः माध्याह्न
तपकालिकीन पैत्रकर्मभात्रीयत्वात् कुतपकालस्य तत्सहिष्ट एव पूर्वाह्णता गोग्राह्यः। अवर्त्तिसन्निकृष्टकालः शुक्लपक्षश्राद्धोपक्रमे गामिन्यर्थः। मुख्यतस्तोपि कुतपः। तथा च स्मर्यते। त्वर्मियत्वगोत्ति। का स्मेतियन्नरसी प
तिथापक्षयेक्षणो। सकालः कुतपो नाम श्राद्धं तत्र प्रदीयते इति॥ ॥अथ मृताहकालः। तत्र मासस्य सौरादिभेदेन भिन्नत्वात् कस्मिन् मासे मृताहः कार्यो गार्ग्यः। विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः। आब्दिके पि
तृकार्ये च चांद्रो मासः प्रशस्यते॥ स्कंदपुराणे। अत्युदये रवेर्मसिश्चांद्रः स्यात् पितृकर्मणि। यज्ञे सावनमित्याहुः सर्वव्रतेषु च। आर्दीनां च सौरो न च न वृद्धिविभि प्रतिमाससाध्यव्रतादिविषयर्थः। आद्यस्त्रो वस्त्यायमर्थः। यज्ञादेर्मा
स संवत्सरसाध्ययज्ञप्रवर्त्त प्रायश्चित्तक्रियादिषु। मासंसाध्ययज्ञ। मासं दर्शपौर्णमासात्त्यायज्ञेन मासं वैश्वदेवेन द्वादशपायिनो तयेन मासमभिहोत्वा इद्वीयादिवाक्ये विहितः। मासस्साध्यानि व्रतानि मासोपवासा
दीनि माससाध्यानि प्रायश्चित्तक्रिया। गोष्ठे च सब्रह्मचारी मासमेकं पयोव्रतस्त्यादिवचनैर्विहिता। संवत्सरसाध्ययज्ञाः--- मयनादिसंज्ञकाः। सत्रयागः। संवत्सरसाध्यानि व्रतानि अजस्य तु नाश्नीयादित्यादिषु श्रुति वि
हितानि। अजः संवत्सरात् अत्रान्न नमोदनादेर्न पयः प्रकृतीनां। संवत्सरसाध्यप्रायश्चित्तक्रिया द्वादशवार्षिकास्याव्याब्दिके सांवत्सरिके। पितृकार्ये च मासिकश्राद्धादौ अपि च द्वाद्यन्तव्यतिरिक्तमाससंवत्सरसाध्ये देव
कार्ये तथा च पितामहः। दैवे कर्मणि पित्र्ये च मासश्चांद्रमसः स्मृतः॥ एषां च लासतांते दोब्रह्मसिद्धांते ति हितः। दर्शादिदर्शपर्यंतः त्रिंशद्दिवससु सावनो मासः। रविसंक्रांतिकविजः सौरमासो निगद्यते तत्तदेशः। तथा चांद्र

× परविद्धैव ग्राह्या। नशाच्चेगोतिलः। त्रिमुहूर्त्तापि वेश्राद्धामरेद्युः कुर्तव्येहि सेति। यदा स्वेद्युः सायाह्ने त्रिमुहूर्त्तव्यापिनी तिथिर्हद्वितीयापरेद्युरपराह्णे समयगामिनी वदा × पं ८

श्रीदत्तपा० ५५

शुक्लादिदर्शा—ः सावनस्त्रिंशता दिनैः। एकराशौ रविर्यावत्कालं मासः स सौरकः। सावनाद्यहोरात्रव्यवस्थिति। ब्रह्मसिद्धांते। सावनं स्यादहोरात्रमुदया— दयस्त्वे॥ सौरं त्रिंशत्सु राशीश तिथिसंयोगभेदं वा यावता

कालेन रविर्भमादिराशीनां त्रिंशदंशं भुंक्ते स कालः। सौरोहोरात्रः। चंद्रस्य प्रतिपदादितिथिसंयोगपरिमितिः। कालश्चांद्रोहोरात्रमित्यर्थः। एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरामः। तथाह विशेषस्मृत्यंतरे मासप

क्षतिथिस्पष्टे यस्मिन्नयो म्रियते हनि। प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति। तिथिश्चांद्राहोरात्रः। सा च यदा शुद्धा न दानसंशयः। यदा तु विद्धा तदा यत्र सायाह्ने त्रिमुहूर्त्तव्यापिनी तिथिः सा ग्राह्या। तदाह गोभि

लः। द्व्यहव्यापिनी चेत्स्यान्मृताहस्य यदा स्थितिः। पूर्वविद्धैव कर्त्तव्या त्रिमुहूर्त्ता न वेद्यदि। सायं त्रिमुहूर्त्तेत्यर्थः। यत्तु कार्ष्णाजिनिनोक्तं। अपराह्णसमनवेलायां कलामात्रापि या तिथिः। सैव प्रत्याब्दिके ज्ञेया ना— पुत्रहानिदे

तिलत्वर्विद्धा प्रशंसार्थं कलामात्रापि ग्राह्या किमुत त्रिमुहूर्त्ता। यत्तु दिनांतपंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिरिति। उदये तु तथा पित्र्ये दैवे वैवच कर्मणीति। यत्तु सायंकालीनापंचनाडीनां पुण्यत्वं प्रतिपादयति। तच्च व्याप्ति

नाड्यामपुण्यत्वप्रतिपादनपरं नारदीयपुराणे। पारणे मरणे नृणां तिथिस्तात्कालिकी मता। पित्र्ये स्तमयवेलायां स्पृष्टा पूर्वा निगद्यते। अस्तमयवेलायां सायंकालमुहूर्त्तत्रययुक्तेत्यर्थः। श्रुतिरपि। तस्मात्तिरस्यः पूर्वेद्युः क्रियत

मिति। तथा। पूर्वाह्णे दैवानां मध्यंदिने मनुष्याणां अपराह्णे पितॄणामपि त्रिधा विभक्तस्याह्नस्तृतीयभागः। तत्केपराह्णे मुहूर्त्तत्रयव्यापित्वात् अपराह्णसंबंधापि सा तिथिर्भवति। सा तिथिः सकला ज्ञेया यस्यामस्तंगतो रविः। इत्ये

कदेशव्यापित्वेपि संपूर्णत्वमस्तीति तत्प्रकृत एवोपक्रमः। तस्य सकलपितृश्राद्धशेषत्वात्। एवं च या निर्व्विद्धा प्रापका निस्त्रिमुहूर्त्ता विद्धा विषया ज्ञातव्या। यदा पूर्वेद्युः सायंकाले मुहूर्त्तत्रयव्यापित्वं नास्ति तदा परे द्यु

वा तन्न कृतपासमययोः संबंधात्। तथा च मरीचिः। अपराह्णव्यापिनी स्याद्दा एकस्य यदा तिथिः। मृहतीयत्र तद्धि — ध्वंसंति महर्षयः। यत्र सायंकालेपि वर्त्तेत नत्वस्तमनसमये तदा पूर्वेद्युः। यदाह नारदः। दर्शं च पौर्णमासं च पु

उः सांवत्सरं दिनं। पूर्वविद्धामकुर्वाणो नरकं प्रतिपद्यते इति। यतः शृंगग्राहिकतया मृतातिथेरस्तमयसंबद्धाया एवोपादानं कृतं। अपराह्णसमयवेलायामित्यादिवचनैः। अतः पूर्वेद्युरेव युक्तं। एवं षाण्मासिकादिष्वपि विज्ञेयं। ने

बामपि मृतासद्दृशापस्तस्य स्पष्टतिथिकर्त्तव्यताविशेषात्। एकोद्दिष्टे त्वयं विशेषः। मध्यादिने त्वपक्रमात् — षिवद इति। यथा च स्मर्यते। पूर्वाह्णे दैविकं कर्म अपराह्णे तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमि

तियां निवमृताहव्यतिरिक्ता नापारपद्धिकस्पर्शनाप्रतिपादकारुण्यश्राद्धादीन्येकोद्दिष्टानि। शस्त्रहतस्य — वत्तुदस्येकोद्दिष्टश्राद्धं च वर्तिम मध्याह्नकालस्य प्रधानत्वात् कालाधिकस्य स्पर्शविधायाप्रतिपदादितिथौ कर्त्त

वानि। तर्षां मृतसद्दृशापद्धस्पृष्टतिथिकर्त्तव्यतानियमस्यासंभवात्। नियमतावश्यस्तु कपक्षमृतस्य चतुर्दश्य — व्यतिरिक्ततिथौ मृतस्यापि तत्र श्राद्धकरणात्। मृततिथिरेव सायाह्ने त्रिमुहूर्त्तव्यापिन्यामेवानापात्तश्चावक्रिव

यवस्था। यत्रोत्तयत्र मध्याह्नकालसंस्पर्शनावस्तत्र पूर्वेद्युरेव पितृकार्ये पूर्वविद्धायाः प्रशस्तत्वात्। मृताहं पालन निर्णयप्रसंगात् ग्रहणदिने आब्दिकप्राप्तौ विशेषो विधीयते॥ ॥तत्र यदा ग्रहणदिने सांवत्सरिकं प्राप्तं तदा

संत्तवे आमेन। तदसंत्तवे हेम्ना वा कुर्यात्। यदाह गोतिलः। दारैरविघ्रहे पित्रोः प्रत्याब्दिकमुपस्थिते। आमेनासंत्तवे हेम्ना कुर्यादामेन वा सुतः इति। अत्र दारैरविघ्रहेत्युक्तत्वात् पदर्शनार्थः। न्यायस्य समानत्वात्। अतश्च

ग्रहणेप्यावत्याकसपिंडादौ दीर्घेन श्राद्धादिकारिणा आमश्राद्धादिकं कर्त्तव्यं। एवं मासिकेपि ज्ञेयं। एवं च श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितं। अमावास्यादिनियतं मासि संवत्सरादृते इति मासिक सांवत्सरिक विषय

यायमामश्राद्धनिषेधः स ग्रहणव्यतिरिक्तविषयः। मृताहे श्राप्रेयस्य तार्या रजस्वला भवति स तस्मिन्नेव दिने न श्राद्धं कुर्यात्। न मे कालांतरे वाप्यवस्मृ शंतरं। आद्दिकं समनुप्राप्ते यस्य तार्या रजस्वला। पंचमेहनि तच्छ्राद्धं न तु

यन्नमृतेहनीति। तस्य प्रत्याब्दिके अपकाप नीसच्यमेव कर्ष्यं यदि रजस्वला भवेत्। तद्विषयमेतद्वचनं। अप्रजीवय दा तार्यासु प्राप्तेतु राद्धिके रजस्वलासवेत्तु कुर्यात् पंचमेहनीति गोतमस्मरणात्। अथ मृताहपरि

हनेकालः। तत्र बृहस्पतिः। न ज्ञायते मृताहश्चेत्प्रमीतप्रोषिते सति। मासश्चेत्प्रतिविज्ञातस्तद्दर्शे स्यान्मृताहनि। मृताहनि मृतदिनो यत्कर्त्तव्यं तत्प्रतिविज्ञातदर्शे विज्ञातमासोममावास्यायां कर्त्तव्यमित्यर्थः। यदा मासो न वि

ज्ञाते विज्ञाते दिनमेव तु। तथा मार्गशिरे मासि माघे वा तद्दिनं भवेत्। दिनमासौ न विज्ञातौ मरणस्य यदा पुनः। प्रस्थान दिनमासौ तु ग्राह्यौ प्रोक्तक्रियादिशा। अत्र दिनशब्दस्तिथिपरः। मरीचिः। आद्यविघ्ने समुत्पन्ने अविज्ञाते मृता

हनि कुर्यादंतन्नस्नायामेकादश्यां विधुक्षये। श्राद्धविघ्नप्रमादादिना सांवत्सरिकमासिकविघ्ने तत्तिथ्यतिक्रमे जाते। तत्रांतरनाविरक्षैकादश्यां दर्शे वा कर्त्तव्यमित्यर्थः। आशौचेन सूतकेन वा श्राद्धविघ्ने सत्याशौचादिके व्यतीत

श्रीं ४ श्रै ८ न५

—ना८ ५५

कर्तव्यं। तत्रापाकरणे तदनंतरं तस्मिकादश्यां दर्शे वा कर्तव्यं। तथा च ऋष्यशृंगः। यदा ये विदूरेणां श्राद्धे आशौचं जायात तयदा। आशौचे व्यतिक्रांते तिस्य श्राद्धं प्रदीयते। यद्युभ्यंतरं। यदहस्येमसुच्येत केन विद्भुक्तेन वा
तकानंतरं कुर्यात् उनस्तदहरेव चेति। ...... एतच्च स्तकानंतरं प्रमादादिनाकरणे मासांतरे तद्दिने पिलात इति प्रदर्शनार्थं। अतस्तदहरेकादश्यां दर्शे इति गोणः कालः। तत्र च प्रत्यासन्नकाले ग्राह्य इति विवेकः।
अथामश्राद्धकालनिर्णयः॥ ॥ तत्रात्मनो देशकालानां विप्लवे समुपस्थिते। आमश्राद्धं द्विजैः कार्यं शूद्रेण तु सदैव हि। इति द्विजस्य देवविप्लवादौ ---- शूद्रस्य तु सर्वदा मश्राद्धाधिकारः। एतदुक्तं भवति। शूद्रस्याम
श्राद्धं नित्यं द्विजस्य नैमित्तिकमिति। नित्यत्वं चैवं नार्यो रतः श्ववि[illegible] तत्तच्छ्राद्धक्रियापरः। इत्यादि वचनेः शूद्रस्य श्राद्धाधिकारे सत्यपि समंत्रकना। न पक्वं भोजयेद्विप्रान्शूद्रो [illegible] पिकदाचन। [illegible] स्यान्नवत
फलं तदिति ब्राह्मणभोजनं निषिद्धं कथं तर्हि श्राद्धप्रयोग इत्यपेक्षायामाम श्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैव हि इति। तेनामान्नं गुणो विधीयते। अथ ब्राह्मणभोजने निषिद्धे अर्थाद्भोजनोपयुक्तसन्निहितमामा
न्नमेव षाष्ठमिति त्रिगुणस्यामान्नस्य प्राप्तत्वाद[illegible]ते शूद्रः कुर्यात् सदैव हीति। अतः शूद्रस्यामश्राद्धं नित्यं। अथोच्यते। ब्राह्मणभोजनं तावन्निषिद्धं। निषेधस्य प्राप्तिपूर्वकः। प्राप्तिश्च विधिशिर्विका एवं चाविधिनिषेधयोः
शास्त्रगम्यत्वात्। षोडशिग्रहणाग्रहणवद्विकल्पः। तथा न पक्वेन भोजनं न पक्वे आमान्नमिति। नानित्यत्वनितिनैव तत्सारं। गतः प्राप्तस्यापि कलिंगस्त्वणादेर्निषिद्धत्वात्। यदि ना गतः प्राप्तवपि विकल्पः कलिं जस्य द्राणमपि
विकल्पेन तस्मात् शूद्रस्यामश्राद्धं नित्यमिति। एवं नित्यत्वे सिद्धे आमश्राद्धं तन्निपूर्वकं इति शातातप इति वचनं क्रिटीकव तिष्ठते। नित्यं तु श्राद्धं गत्ताता पराह्नसंबंधत्वादपराह्ने कर्तव्यं। अनेनास्ति प्रायेण शातात
पनेनोक्तं। मध्यमन्हे [illegible] लापयन्नुक्तेन पासमुदाहृतः। आममात्रेण तत्रैव पितृणां दत्तमक्षय्यमिति। अतस्तदा। [illegible] परा द्विजः सर्वान्हे। एवं व्यवस्थायां क्रियमाणायां शातातपोक्तवचनं व्यासेरेव परस्परविरोधोपि परिहृतः स्यात्
नूयत्त्वमावास्यायां पिंडपितृयज्ञाधिकारी द्विजस्तस्य पिंडाः पितृयज्ञकालानुरोधेन पिंडान्वाहार्यमश्राद्धं ॥ मध्याह्ने परान्हे एव सर्वान्हे कृत्यद्विति तच्चिंत्यं। तद्यथा। तएव सर्वं तिस्त्रद्धकर्तृकामश्राद्धे पूर्वकालो विधीयते
प्रवासादिनिमित्तद्विजकर्तृकामश्राद्धे तु अतिदेशतः सर्वान्हः स्वीकारः इति व्यापारत्रयं अस्माकं तु स्याद्विजकर्तृकामश्राद्धे सर्वान्हकालस्योपदेशात् एवं स्वीकार इति महान् विशेषः। तस्मादस्मदुक्तरीतिः
नुसरणीया। एतच्च यस्मिन्दिने अमावास्यादिश्राद्धं विहितं तत्रैव सर्वान्हो एवं च यलेखितुं यदा तिथिर्दिन द्वयसंबद्धं तदा कुतपकालीनधीकसंबंधवशान्निर्णयः। कुतपस्य पितृश्राद्धकालत्वात् सन्निहितत्वात् पूर्वा
न्यायं तु साधपदवस्तूनां कालः प्रातस्तनात् ऊर्ध्वं त्रिमुहूर्तं न्निपतिष्ठिः। आमश्राद्धं तत्र कुर्यात् हि मुहूर्ते पिवास्तदेवेति। एतदपि प्राप्तकालानंतरं त्रिमुहूर्तमध्ये च कर्तव्यताप्रतिपादनपरं। न त्वमावास्यादितिथ्य
स्ता- त्वपि तत्रैव कर्तव्यतापरं। तथा सति पूर्वोक्तः सर्वान्हकुतपादिसर्वंस्यत्यपि परेद्युः श्राद्धप्रसक्तेः। तथा चानेकवाक्यविरोधः। तस्मात्सर्वोक्तैव व्यवस्था॥ ॥ अथ श्राद्धकालप्रसंगादावश्यकनित्यनैमित्तिक श्राद्धसं
सवप्रत्याम्नातं तच्चदेवलः। यदेव तर्पयेत्सद्भिः राहिता निर्दिष्टे दिने पितरो नैव माप्नोति दाताकादिक्रियाफलं। पिंडमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः। श्राद्धाहनि तु संप्राप्ते नवे निरसनात्पिवा। निरसात च स्व
पिंडदानासंभवे पाणिना सावपरं तु चापि तृप्यन्ति पितरः। निर्दिष्टे [illegible] स्तुच्छयय तत्पात्रगतानामिति। पितृयज्ञविधिः श्राद्धं विशिष्ट [illegible] संकल्पपर्यंतं [illegible] यत्र पात्रं ब्राह्मणां दर्शप्रतिनदत्तं बावत्तरेद्धादि
त्यर्थः। सर्वसा वाक्षिप्य देशेनेव दद्यात् यथास्तु वा। ततु प्रमाणस्पल्पो [illegible] प्रकस्य विशेषतः। सर्वसा वित्तस्य [illegible] मधमरूपपात्रासावे [illegible] वसिष्ठः। अग्निता वा देहं [illegible] स्यात्तु श्राद्धकाले समागते। तुमिन्नेप्रवसेदरी
जपेद्धा श्राद्धसंहितां। विष्णुपुराणे। सर्वसाभावे वनं गत्वा [illegible] मूलप्रदर्शकः सूर्यादिलोकपालानां इदमुच्चैरपतिष्यति। नमे [illegible] वित्तं धनं तवान्यच्छ्राद्धोपयोग्यं स्वपितॄन्नतोस्मि तृप्यन्तु भक्त्या पितरो मयैतौ भुजौ वि
वर्त्मनि मारुतस्य। इत्येतत् पितृयज्ञीत सा वा सा वश्य भोजनाय करोति इत्ति तत्र श्राद्धं भवति पार्थिव। सा वा सा वोद्धथ्य ब्राह्मणादि स [illegible] वासस्थाने एव पक्षेष्वपि [illegible] विकल्पाः॥ ॥ अथापरपक्ष
विषयं किं चिल्लिख्यते। याज्ञवल्क्यवचने विहितानि अमावास्याश्राद्धादीनि कानिचिन्नैमित्तिकानि। यावश्यकानि एतान्येव फलसंयोगात् काम्यानि। अतो निहतादिवत् तयाम्यकानि। तत्र तत्र पक्ष[illegible]
न सामान्येन सकलापरपक्षाणां श्राद्धकालत्वे विशिष्टे पिताद्यपरपक्षे विधीयते। तत्र ब्रह्मांडपुराणे॥ कन्यागते सवितरि यान्यहानि तु षोडश। क्रतुभिस्तानि तुल्यानि तत्त्वदत्तमथाक्षयं। शुक्लपक्षस्य प्रतिपदा

मदनपा०

५९

मनित्तविघ्वोडशश्राद्धसंख्यापूरणं। तथा च युक्तं पक्षे तु श्राद्धं कुर्याद्दिने दिने। तिथिहानौ तिथिवृद्धौ चार्धमितं वा। अष्टकृष्णपक्ष इति पौर्णमास्यन्तमासोऽभिप्रायः। दिने इति प्रतिदिनं समाप्तापि पक्षश्चित्यर्थः।

तागहीनं पंचमीमारभ्य कर्तव्यमित्यर्थः। आद्याश्चतस्रस्तिथयश्चतुर्दशी चेति पंचदशीयं तत्र तिथिहानता। एवं तिथिनागपक्षादिष्वपि। तिथिनागे च दशमीमारभ्य अर्धमष्टमीमारभ्य विदेवा शक्त्यपेक्षया विकल्पः।

यम। आषाढीमवधिं कृत्वा यः पक्षः पंचमो भवेत्। तत्र श्राद्धं प्रकुर्वीत कन्यास्थेर्कि भवेन्न वा। कदाचित्समासाधारपक्षे पि पंचमो भवतीति तत्रापि श्राद्धं प्रसक्तौ स्मृत्यु। एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवे

त्। तत्र श्राद्धं प्रकुर्वीत कन्यास्थेऽर्कि भवेन्नवा। कदाचिन्मलमासापरपक्षे पंचमो भवतीति तत्रापि श्राद्धप्रसक्तौ स्मृत्यु। द्व्यकृत्यक्रिया। स्यात्तदा ह्येयोऽधिमासकः। इति श्राद्धं तथा सोमयाध्येयं महालयं राजाभि

षिक्तं काम्यं च न कुर्यात्। शास्त्रविधिना इति महालयमापरपक्षिकं श्राद्धं तत्र युक्तं यमेन। कन्यास्थेऽर्कि भवेद्देतिलत्त्वात्पक्रमाभिप्रायं। अतः पक्षस्यादिमध्यावसानेषु च कन्यागतत्वेनैव नियतव्यं। अनेना

भिप्रायेण ---- । न तस्य पक्षापरेपक्षे तिथिद्विबोडशकं तु यत्नात्। कन्यागतं ---- । तत्तु श्राद्धकाल श्राद्धकर्मत्रयेति। कार्ष्णाजिनिः। आदौ मध्ये वसाने वा यत्र कन्यां व्रजेद्रविः। सपक्षः सकलः पूर्वः श्राद्धषोडशकं प्रति। अत्र सा

दैवतं श्राद्धं। तदा हागोत्तमः। पितरो यत्र पूज्यन्ते तत्र मातामहा अपि। अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्। महालये मातृश्राद्धं पृथक् न सहैव भवति। अत एवापरार्के गयामहालयादौ तु पृथक् सह वा स्यादिति

लिरितिसिद्धमिति। स्मृत्यर्थसारेपि। तत्र मातृश्राद्धं पृथगिति कृष्णास्त्रमिति। तत्रापरपक्षे चतुर्विंशतिमतेपि। पाकस्विद्विहितं नारीणां पृथक् श्राद्धं महालये। इति। अन्वष्टकादिषु मातृश्राद्धं पृथगेव कुर्यादिति नियमः।

तथा च शातातपः। अन्वष्टकासु वृद्धौ च गयायां च क्षयेहनि। तथा। अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह। तथा। अष्टकासु च वृद्धौ च गयायां च मृतेहनि। मातुः श्राद्धं पृथक् कुर्यादन्यत्र पतिना सह। शंखः। अन्वष्ट

कामातृश्राद्धं चैव मृतेहनि। एकोद्दिष्टं तथा मुक्त्वा स्त्रीणां नानाः पृथक् क्रियेत्। एकोद्दिष्टशब्देन प्रेतस्य वि- मुक्त्वा पादकषोडशश्राद्धं सपिंडीकरणसहितमुच्यते। अन्वष्टकादीनेकोद्दिष्टानि कार्याणीत्यत्र तिथीयते

न च विश्वेदेवाः पूर्वश्राद्धविधानात्। अत्रापरपक्षे आचार्यादीनुद्देशेनानेकसन्निपाते क्रमेण वा श्राद्धं कर्तव्यं तथा चतुर्विंशतिमते ---- । स्त्रयं गुरु शिष्ये च सखि संबन्धिनस्तथा एव चानतया नीयस्व संबन्धिनस्तथैव

च बंधुजातीनां पिंडं तेभ्यः स दद्यात् दद्याच्छ्राद्धे पदे नरः। तीर्थे पित्रे विवसा देवमाघमासे मघासु वा। ए कस्मिन्ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत्। दर्शे पादर्शा वा पिंडान्दद्यात्करणं नतु तालयोगिका विधिना

नं पक्षे वै पंचमे स्मृतः। न भिन्दर्भं दद्विर्नूनं पितॄणामकृयेत्तवेत्। एकस्मिन्ब्राह्मणे इत्येतदसमर्थविषयं। ॥ यद्वैकस्मिन्नेव दिने नदालेकेए वपाकः। तथा स्मृत्युं। एककालेगता स्तेषां बहूनामथवा द्वयोः। तंत्रेणाश्र

पणं कृत्वा कुर्याच्छ्राद्धं पृथक् पृथक्। पूर्वं कस्य मृतस्यादौ द्वितीयस्य ततः पुनः। तृतीयस्य ततः कुर्यादित्यसिद्धायोनौ संनिपातस्त्वयं क्रमः इति। संनिपात एकस्मिन्समये मातापित्रोः श्राद्धकर्तव्यता प्राप्तिः। एतेषामेकोद्दिष्टमेवान

च्याच्छुमं च। सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते। अनेन तेन तेनैव त्रायश्चापि नेमात्रलायवा। मित्रायुः राज्ञश्राद्धमेकोद्दिष्टं न पार्वणं। ॥ अथ काम्यकालः। तत्र मनुः। कृष्णपक्षे तु निपदि श्राद्धं सुरूपीं लभते सुतं। कन्यकां तु द्वितीयायां तृतीयायां च ---- । पश्चन्न दोषश्चन्नुश्यां पि पंचम्यां शोभनान्सुतान्। षष्ठ्यां द्यूतं कृषिं वापि सप्तम्यां लभते नरः। अष्टम्यामपि वाणिज्यं लभते श्राद्धदः सदा। स्यान्नवम्यामेकखुरं दशम्यां द्विखुरं बहु। एकादश्यां तथा रू

प्यं द्वादश्यां जातरूपं च रजतं कुप्यमेव वा। ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु कुप्रजां। प्रियंते पितरस्तस्यां यस्तु श्राद्धं ददाति यो। पक्षे प्यादि विनिर्दिष्टान्विपुलान्मनसः प्रियान्। श्राद्धदः पंचदश्यां च सर्वान्कामान्समश्नुते।

बंदिनः सुतिपातकाः। स्तुतोत्सवती यर्थः। द्यूतं द्यूते जयं। जातरूपं हेम। कुप्यं तु वर्णरजतव्यतिरिक्तं ---- द्विपक्षतिः प्रतिपत्। नन्दादितिथिषु विहितानि यानि फलानि तेषु स्वीयमानमत्तोष्टानसर्वान्कामान्प्राप्नोति रूपिणः

चतुर्दश्यामनुष्ठितेन श्राद्धेनैकैनैकफलकामः। एवममावास्यां लयद्यछितेनाम्नेनेनश्राद्धेन तत्कामइति क्रमेणाभिलवितासिद्धिः। यमपादितं चैतन्मीमांसायां। सर्वेष्यः कामेभ्यो य दर्शपौर्णमासाविति तद्वाक्य

वरे। यत्र स्मर्यते रेवतीषिप्रबारनक्षत्रप्रधुः क्वापूर्वकुफलानुपानानि। तत्र सर्वकिरीयानेकफलसिद्धिरिष्टव्या। विष्णुः। अलतमा दियाक्रिश्राद्धकर्ता तारो ग्यमाप्नोति। सोमार्थमांडे समरविजयं। जे। सर्वकाममेको

विद्यामसी हांज्जीवीधनं शोको जीवितमानेश्वरो हति। ब्रह्मपुराणे। अश्विन्यां प्राप्नुयाद श्वान्नरभ्यामायुरुत्तमं। कृत्तिकायां विद्वरत्नं श्राद्धकृद्यमवाप्नुयात्। प्राजापत्ये तथा तुष्टिं सौम्ये वेदं तु श्रोतसं। आर्द्रायां तु वरां सिद्धिं चान

× ब्रह्मवर्चस्वितापरं ५५

× कौ२

५६ १

मदनपा०

८१

वि ८

तिथौ शास्त्रहतस्यैव चतुर्दश्यां नान्यस्येति । तदयुक्तं । यस्य पिता शस्त्रहतस्तस्य चतुर्दश्यामेव । पितुरेकोद्दिष्टं पितामहादित्रयाणां स्यात् । पितामहस्य तु दर्शादावेव । विहितत्वात् परपक्षमकरणे पितामहादेरपि तर्पणीयत्वात् ।
द्वितीयचतुर्थीस्य । पक्षसमधुसं ... तस्यानां शास्त्रविधिना तर्पयित्वा यसेत ... त्रिमिश्रेण । इति द्वितीयपुराणवचन — — तिथ्यन्तरकर्तव्यतां प्रतिपादयति । आह वेत्र विपन्नानां जलाग्निद्रव्यपातिनां । चतुर्दश्यां सदैव
स्वजाह्वमावास्यां तु कामिनां । स्वजाश्राद्धं अमावास्येति तिथ्यांतरोपलक्षणार्थं । अपरकेसत्रैवैक — शास्त्रहतस्य एकोद्दिष्टविधानेन त्रयाणां । तथा च पार्वणमेवेत्यनेन ग्रन्थेन त्रयाणां शास्त्रहते पार्वणमेवेत्यभिहितं स्मृतिचं
द्रिकायामपि । एकस्मिन्द्वयोर्वैकोद्दिष्टविधिरिति स्मार्तवचनमुपन्यस्यैकस्मिन्द्वयोर्वेत्यतिधना त्रिषु पितृपितामहप्रपितामहेषु नैकोद्दिष्टविधिरिति गम्यते इत्युक्तं तच्चिन्त्यं । तथाहि आदह्यलावद्वचनं नास्ति त्रिषु नैकोद्दिष्टप
र्वणमेव कर्तव्यमिति । एकोद्दिष्टं तु कर्तव्यमित्येतद्वचनप्राप्तौ एकस्मिन्द्वयोर्वेत्येतदपि द्वयोरेकोद्दिष्टप्रापकं न तृतीयकस्य निवर्तकं तथा चैतादृशतदाकाल्पेतदप्रसक्ते न सपरिसंख्या — वणस्तु चिंतं दोषत्रयापत्तेः । तस्मात्त्रिष्वादिषु
निषु मृतेष्वप्येकोद्दिष्टमेवेति सिद्धं य दावस्यामेव चतुर्दश्यां मित्रादिसंवत्सरिकं पार्वणात्मकं एकोद्दिष्टात्मकं चतुर्दश्यां श्राद्धं । यदा वस्यस्यैव चतुर्दश्यां पितासांवत्सरिकं प्राप्तं च तदा समर्थां गपार्वणं ... कोद्दिष्टस्य
तत्त्वविस्पष्टकरत्वाद्देशकालकर्तॄणां देवतायाश्चाभिरूपफलस्यैकत्वात् तन्त्रेण पार्वणैकोद्दिष्टयोरनुष्ठानं न पृथगिति निर्णयः । एतदभिहितं सकलोप्येष ... । सूर्ये कन्यास्थिते कुर्याच्छ्राद्धं यो न तिथ
हामीधनं पुत्रान्कुलं तस्य पितृपीठ श्वासपिना ... । एवं दीपान्विता राजन् ख्यातापंचदशी तु विभाव्यां दद्यान्न चेदन्नं पितृणां वै महालये । दीपान्वितापंचदशीति तुलासंक्रमणकालोपलक्षकं । कार्तिकजिनि: । कन्यागते सवितरि पि
तरियांति विष्णुतानानावत्रैत पुरीस्त्यायाव वृश्चिकदर्शनं इति ॥ ॥ अथ संक्रांतिकालः ॥ तत्र वृद्धवसिष्ठः ॥ अयने द्वे विषुवे द्वे चतस्रः षडशीतयः । चतस्रो विष्णुपादाः स्युः संक्रांत्यो द्वादश स्मृताः । मृगकर्कटसंक्रांती द्वे तूद
ग्दक्षिणायने । विषुवे तु तुलामेषे गोलमध्ये तथापरा इति । मृगो मकरः । गोलमध्ये अयन विषुवगोलमध्ये गालं वलनं । ततोपराः संक्रांतयः स्युरित्यर्थः । ज्योतिर्वसिष्ठः । वृषवृश्चिककुम्भेषु सिंहे चैव यदा रविः । एत
द्विष्णुपदं नाम विषुवादधिकं फलं । कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः । षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः । अयं च संक्रमणकालो निमेषादपि सूक्ष्मतर इति । दीर्घकालसाध्यकर्मस्विंगत्वमस्य कथं
व्याकांक्षायां स एव संक्रांतिसमयस्य सूक्ष्मो दुर्ज्ञेयः प्रशितचक्षुः ... विना नाड्यः पवित्र काश इति । पन घसमोन्येन सकालसंक्रांतिक्षण संस्पृष्टपूर्वोत्तरकालस्य पवित्रत्वमाह यतिविशेषमाह स्मृतिष
सनांतरे स्यो वर्गतयः । तथा च वृद्धवसिष्ठः । अतीतानागते पुण्ये द्वे उदग्दक्षिणायने । त्रिंशत्कर्कटके नाड्यो मकरे चैव दशाधिकाः । वर्तमाने तु अयने विंशतिः पूर्वे मकरे विंशतिः परे संनिहितनाडीनां विज्ञातः पुण्यतमत्वप्रतिपादनार्थं
अत एव वसिष्ठे । याया संनिहिता नाड्यस्तास्ताः पुण्यतमा मता इति संनिधिविशेषात्फलविशेषः । कथ्यते एतदुक्तं भवति सर्वत्र — हिं शन्नाड्यः पुण्यकालः । क्वचिदधिकं क्वचिदर्धमेव क्वचित् तत्रापि दशादिदंडपरिमि
तः कालः पुण्यतरः । तत्रापि संनिहितः पुण्यतमः इति एवं च सकलवचनविरोधः परिहृतो भवेत् । वृद्धवसिष्ठः । वर्तमाने तुलामेषे नाड्यस्तूभयतो दश । तथा पुण्यायां विष्णुपद्यां षडशीत्यां दपि षोडश । षडशीत्यां व्यतीतायां
षष्टिरुक्तास्तु नाडिकाः पुण्याः । तद्विष्णुपद्यायनविज्ञो वर्तमाने तथा विधौ । षडशीतिमुखे चैव व्यापतीतस्य वा त्र रायूने । वर्तमाने विषौ मध्यस्यार्थाः समन्वयतस्म पि मध्ये विष्णुवति दानं विष्णुपदे दक्षिणायने चा दौ । षडशीतिमु
खे तीते तथा सूर्यनेत्रसूरि फलं । ज्योतिर्वसिष्ठः । अहः संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं संक्रमणे तु नियोग्य स्यात् पूर्वपश्चिमा संक्रांतिकाले विज्ञेया स्नानदानादिकं चरेत् । वृद्धवसिष्ठः । अह्नि संक्रमणे पुण्यमहः कृ
त्स्नं प्रकीर्तितं रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः । द्वितीयानाड्यो व्याख्याताः स्मृतिचंद्रिकाकारेण व्यवहितमपि दिनार्धमेव पुण्यं न तु संनिहित रात्रिगतानां नाड्यः पुण्या इत्यर्थः । इति एतदयुक्तं । रात्रौ संक्रमणे पुण्य
मित्युक्तवाक्यं । न सावदमुमर्थं प्रत्यपयति सारुतत्व — नापि वाक्यांतरं । प्रत्युत विपरीतार्थद्योतकं । बाधकमस्ति । यथा यस्यां संनिहिता नाड्यस्ताः पुण्यतमा इति । किंच राहुदर्शने संक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्या
न्निशि काम्यव्रतेषु च । रात्रावपि स्नानाद्यधिकारासंनिहितैरात्रिगतनाडीमध्ये यागकारणत्वात् । अयं संक्रांतिरात्रिप्रायणपर इति । स्मृतिचंद्रिकाकार आह । नवाय प्रतिप्रसवः सर्वसंक्रांतिषु युज्यते अयनद्वयवालेति तं
संक्रांतौ रात्रिगतायां दिन एव संक्रांतिकृत्यविधानादित्यनेन ग्रन्थेन । रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः प्रतिप्रसवः । दिने संक्रांतिकृत्याविधायकं वचनं वसिष्ठसंहिता हर्ता ... तस्मिन्नेव प्रकारेण अधरात्रादधस्तस्मिन्मध्या

विंशतिः स्मृता ए — इतिपा०३

रू०६

प०प्रा

प०

धं १०

ग्रामाः ५

कस्योपरि क्रिया। ऊर्ध्वं संक्रमणे चोर्ध्वं उदयात्प्रहरद्वयं। सर्वे विदर्द्धरात्रे तु यदा संक्रमते रविः। प्राक् दिनद्वयं तु पुण्यं तु क्राम करकर्कटौ विति। अत्रापि दिनाएव कर्तव्यं न रात्रौ विषयमर्थेन प्रतीयते दिनस्यापि पुण्यकाल
त्वप्रतिपादनत्वे नाप्युपपत्तेः। तस्मादयमर्थः। अहः संक्रमणे वहः पुण्यकालं रात्रावर्द्धरात्रादर्वाक् चेदपराह्णे पि अर्द्धरात्रे चेदिह दिनद्वयं मध्यं विस्तारेण पूर्वाह्णोपीति अत्रापि पुण्याः संनिहितात्ताद्ध्यस्यतु संध्येयमक
रकर्कटयो — — — मुक्काम करकर्कटौ विति स्मरणात्। तर्हि तत्र कथमियाकांक्षायां इदमुपतिष्ठते। अयने विंशतिः पूर्वा मकरे विंशतिः परेति। अत्रापि विशेषो स विष्णोत्तरे। मिथुनात्कर्कटं संक्रांतिर्यदि स्यादंशुमालिनः। प्रभा
तेपानिशीथे वा कुर्यादहनि पूर्वतः। कार्मुकं तु परित्यज्य झषं यातियदा रविः। प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनीति। कुंभे मकरः। कार्मुकं धनुः। तथा वृद्धगार्ग्यः। पूर्ववामय वेलायां मकरं याति भास्करः। प्रदोषे वार्द्ध
रात्रे वा स्नानं दानं परेहनि। अर्धरात्रे तदर्ध्वं वा संक्रांतौ दक्षिणायने। पूर्वमेव दिनं ग्राह्यं मावन्नोदयते रविः। अत्रापि कर्कटे पूर्वतन विंशति घटिका मकर काल। मकरे परे विंशति घटिकात्मक स्पष्टपुण्यतरस्त्येव। अत
एव पुण्यतरपूर्वकाल संनिहितः पूर्वदिनकालः पुण्यतरकालसंनिहितः परदिनकालश्च कर्कटमकरयोः आद्यादिषु ग्राह्यः। संनिहितकाले पूर्वसंनिहितः पूर्वदिनकालः पुण्यतरपरकालसंनिहितः परदिनकालश्च कर्कटमक
रयोः आद्यादिपु कार्यः। ग्राह्यः संनिहितपूर्वपरकालासंभवे॥ ॥अथ ग्रहणकालः। तत्र वृद्धगार्ग्यः। दर्शसमाप्रतिपत्संधौ राहुः संस्पर्शमंडलं। ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरे। ब्रह्मा सिद्धांते। यावत्कालः पर्वणो तन्नाक्ष
तिपदादिमाः। रवेर्ग्रहणान्नेहास पुण्यो मि — णाश्चेतु। प्रवक्ष्यकालेयास कालदर्पणदादिकालेमोक्षकालः। व्यासः। दृष्टे दृष्ट्वा स्पर्शसमये स्यादिति वितरस्तथा। मनुष्या मध्यकालेषु चतुमसमध्यमकं निष्ठकालस्य र्थेग
। विष्णुः। संध्यमरात्रेर्धक्रवीय श्राद्धं च तु विवर्जयेत्। द्वयोरपि च कर्तव्यं आदिश्यादाकू दर्शनं। मत्स्यपुराणे॥ चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि। मलमासेपि देयं स्याद्दत्तमक्षयकारकं। लिंगपुराणे। चंद्रसूर्यग्रहे स्नाया
न्मृतकेसूतकेपिवा। अस्नायी मृत्युमाप्नोति स्नायी मृत्युं न विंदति। सूतकं मृतकं चैव न दोषो राहुदर्शने। तावदेव तदेवहु विमुक्तिर्न दृश्यते। एकग्रंथस्य वचनं द्वयमध्ये पूर्ववचनं स्नानपरं ग्रहस्यादृद्वा
नादिपरं। अन्यथा पोनरुक्त्यापत्तेः। अंगिराः। सर्वेषामेव वर्णानां सूतके मृतके राहुदर्शने स्नानाद्याः अर्हक वीर — नरा स्वविवर्जितं तृप्तव तिष्ठ। ग्रहणे संक्रमे वापि न स्नायाद्यदि मानवः। स सप्तजन्मनि कुष्ठी स्या
दुःखभागी तिजायते। मार्कंडेयः। चंद्रे च सूर्ये चहरेराहोमहाग्रहे अदयंकथितं पुण्यतमं केतु विशेषतः॥ हरोथ उपरापारता न्मे घाद्यन्नस्नानाद्यधिकारो नास्ति तथा स्वरारिग्रहणे पेक्षा वाहदृष्टाय स्नानादि
कं कर्तव्यं इति केचन वदंति तन्न चित्तारणीयं। असति बाधके दर्शनीयं यत्तु व्यापार एव न तु दर्शनयोग्यताय दिसाकां श्व चक्षुर्पात एवदर्शनं राहुना त्वच्छाते तर्हि सूर्यग्रहस्य राशौ चंद्रग्रहणस्य च दिवा च तु विषयत्वा
सावास्नानदानाद्यधिकारो रात्रावन्निनादि निषिद्धेनोपपद्यते। निषिद्धव्यर्थ हि शान्मते सूर्यग्रहो यदा रात्रो दिवा चंद्रग्रहस्तथा। तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति। तस्मादितद्वचनमलादर्शनं नाम शास्त्रोणीतो दृश्य
नम — — — अतो मेघादिछन्नेपि दिवा सूर्यग्रहणे वरा स्नानाद्यधिकारो स्त्येव यदि परं विशेषः। परिकल्प्येततर्हि विकल्पनीयं। यत्तु गोचरश्च वश्चिकं फलं तद्दसीवेतततो न्यूनमिति। यत्तु मरुद्भिशन्मते पिलिकेसि — तितर्षामकरा
र्क विशाने श्वरवंदि काकारहेमाद्रिपु नत्यति नदीकर्तव्या। एवं च ग्रस्तास्तमये द्वितीयदिने मेघादिसिद्धौ दर्शनपि शास्त्रदर्शनसंभवात्। मुख्यतो जनाधिकारो स्तीति न्यायतु श्राप्यावप वादस्माद मनुः। चंद्रसूर्यग्रहे
याद्द्यास्नाया विमुक्तयोः। अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेहनीति। महाभारते अर्वाग्यामत्रयादिहोर्वग्रहणे तु जिमावरेत्। वृद्धग्रामादधश्चैव राहुग्रस्ते दिवाकरे। एतच्च बालादिव्यतिरिक्तविषयं। तथा च वृद्ध
वसिष्ठः। सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं। चंद्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना। बालादिविषये तु मत्स्यः। अपराह्णे मध्याह्ने न तु संगवे। भुंजीत संगवेषु स्यान्न पूर्वं भोजनक्रियाः। समर्थाः संनिधिकाले तु
केतवकात्यायनः। यो हरसूर्यग्रहे तु स्यात्पाय स्थितेनग्राह्यति। तस्मिन्नेव दिने उत्कालिन्नात्रौ तौ च पश्यति ग्रहणं मुक्तो प्राजापत्यं ततः। पूर्वकाले निषिद्धकाले तु निरावमिति विवेकः। यदा चंद्रग्रहणे ग्रस्तोदय हादातन्नि
न्नहनि नाश्नीयात्। तथा च मार्कंडेयः। चंद्रस्य यदि वा सानो दये न स्मिन्नहनि त्विविः। नतदेव च तत्सर्वां सवेषां सोहन क्रिया। नावदेव यदुदैवं वैदनघावाक्तुप्रपगते। यावत्स्यान्नोदयस्तस्य जानीयात्तावदेव तु। मुक्तिं दृष्ट्वा तु भुंजी
तस्नानं च ततः परं। दृष्ट्वेति ज्ञानोपलक्षणं तथा च वृद्धगौतमः। चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः। राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनं। यत्तु विष्णुधर्मे अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहे यदा। मुक्तिं दृष्ट्वा तु सं

115

५८
मदनपा०

कार्यं स्नानं चंद्रात तः परमिति। एतदपि ग्रस्तास्तमयविषयं। सूर्ये ग्रस्तास्तंगते सोग्रहणात्सर्वं तु गि्यहणे नरसाविनी रात्रिरहोरात्रेणान्न निवेधः। चंद्रग्रस्तास्तंगते ग्रहणारात्रि ग्रसमहस्थे अहोरात्रं अग्रस्ताद्वमा
स्यकं। तथा च लिंगपुराणे। सर्वे — मपि कर्तव्यं श्राद्धं विराङ्दर्शीन। मधुकवीणास्तु तद्श्राद्धं पंके गौरिवसीदति। थलग्याप ख्रिरात्रमुपोष्येत ग्रहणे चंद्रसूर्ययोः। स्नात्वा दत्वा नविधिवन्मोदते ब्रह्मणा सहाए कुरु चक्षुपो
षीवस्नाप्यादत्वा सहान्तितः। ऊर्द्धं मुकादावाप्तार्थस्य निःस्तितः पापको रुप्ता॥ ॥अथ युगादिमन्वादिकाला॥ तत्र विष्णुपुराणे। वैशाखमासस्य तु तृतीया नवम्यसौ कार्तिकशुक्लपक्षे। नतस्य मासस्य च कृष्णपक्षे त्रयोदशी
पंचदशी च माघे। माघे पंचदशी अमावास्यां। तथा च नारदीयपुराणे। विष्णुः लोकेषु तथा कृष्णयुगाद्याः कवयो विदुः। विष्णुलोके वैशाखतृतीया कार्तिकनवमी च। ह्रस्व सिते भाद्रपदे त्रयोदशी माघामावास्या च ब्रह्मपुराणानुसारेण
माघे पंचदशी पौर्णमासी वैशाखशुक्लपक्षस्य तृतीयायां कृतयुगं। कार्तिकशुक्लपक्षस्य त्रेता च नवमेहनि। अथ भाद्रपदे कृष्णे त्रयोदश्यां तु द्वापरं। माघे तु पौर्णमास्यां तु घोरं कलियुगं तथा। युगादिरंना स्मृतियो ये युगाद्या
न विश्रुता। सूर्यस्य सिंहसंक्रांताव संत कृतयुगस्य तु। अथ वृश्चिकसंक्रांत्यां वम — त्रेतायुगस्य तु ज्ञेयं तु वृषसंक्रांत्यां द्वापरं तावसंख्यया। तथा च कर्कसंक्रांत्यामंत कालियुगस्य तु। युगादिषु युगां तस्य आद्य तं तु चोक्तं तस्मा
कल्पसंदेन माघपंचदश्यां व्यवस्थेति काचितु वयं तु देशाचारानुसारेण व्यवस्थापयामः। पुलस्त्यः। अयनद्वितये श्राद्धं विषुवद्वितये तथा। युगादिषु च सर्वासु पिंडनिर्वपणादृते। मत्स्यपुराणे। अयनद्वितये श्राद्धं विषुवद्वितयं
तथा। संक्रांतिषु च सर्वासु पिंडनिर्वपणादृते। वैशाखस्य तृतीयायां नवम्यां कार्तिकस्य च। श्राद्धं कार्यं च कृष्णायां संक्रांतिविधिना नरैः। मन्वादयो मत्स्यपुराणे। अश्वयुक्शुक्लनवमी कार्तिकी द्वादशी तथा। तृतीया चैत्रमासस्य
तथा भाद्रपदस्य च। फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा। आषाढस्यापि नवमी माघमासस्य सप्तमी ॥श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा। कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी सिता। मन्वंतरादयश्चैते
दत्तस्याक्षयकारकाः। यत्र कृष्णेति विशेषनिर्देशः तत्र कृष्णैव यत्र विशेषनिर्देशाभावस्तत्र सितैव। हेमाद्रौ — एषा च भाद्रपदसित तृतीयया फाल्गुनामावास्यायाः द्वादशी श्रावणाष्टमी विहिता मन्वंतरादयः कथिताः।
अश्वयुक्शुक्लनवमी कार्तिके द्वादशी सिता। तृतीया चैत्रमासस्य ज्येष्ठे पंचदशी सिता। सप्तमी माघमा — सस्य पुष्यस्यामा तथापरा। वृश्चिके चाष्टमी कृष्णा माघे चैकादशी सिता। गोविंद द्वादशी केसि मेषपंचदशी
सिता। मन्वंतरादयश्चैतास्तु निर्दिष्टाः परिकीर्तिताः॥ इति श्राद्धापिस्तीर्णद्वयस्य॥ ॥अथ जीवत्पितृकस्याधिकाराला — ॥ह॥ तत्र पितुः पितृकल्पेषु अधिकारो न विद्यते। न जीवन्तमतिक्रम्य किंचिद्दद्यादिति श्रुतिः। श्राद्धं च यद्वदामे
त्रयाणीयपरिशिष्टे ग्रहणे हि पुत्रजनने पित्रोः श्राद्धं सोमिके चमसी। तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः। एते बद्धा — लाद्यर्थं। पितृश्राद्धं च सोमिके षु। तथा पिंडपितृयज्ञे। सोमिके मखे सोमादौ तु श्राद्धश्रात्पिंडदानं च। अन्यच्च वि
